संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 136 पुष्पम्

# लक्षणावादः

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादकः
**प्रो. शिवशङ्करमिश्रः**
शोधविभागाध्यक्षः

लेखकः
**डॉ. सौरभदुबे**

**शोध-प्रकाशनविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नवदेहली-110016**

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 136 पुष्प

# लक्षणावादः

प्रधान-सम्पादकः

**प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

सम्पादकः

**प्रो. शिवशङ्करमिश्रः**

शोधविभागाध्यक्षः

लेखकः

**डॉ. सौरभदुबे**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नई दिल्ली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीनः

प्रकाशनवर्षम् : 2024

ISBN : 978-81-972035-8-9

मूल्यम् : ₹ 700.00

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# विषयानुक्रमणिका


| क्रम. | | विषयवस्तु | लेखकः | पृष्ठसङ्ख्या |
|---|---|---|---|---|
| 1. | | विषयानुक्रमणिका | - | iii-iv |
| 2. | | प्ररोचना | प्रधानसम्पादकः | vii-viii |
| 3. | | सम्पादकीयम् | सम्पादकः | ix |
| 4. | | आधमर्ण्यज्ञप्तिः | लेखकः | xi-xiv |
| 5. | | आमुखम् | - | xv-xxv |
| 6. | | सङ्केताक्षरसूची | - | xxvii-xxix |
| 7. | | मङ्गलम् | - | xxxi |
| 8. | | प्रथमाध्यायः | - | 1-35 |
| 9. | | द्वितीयाध्यायः | - | 36-79 |
| 10. | | तृतीयाध्यायः | - | 80-124 |
| 11. | | चतुर्थाध्यायः | - | 125-163 |
| 12. | | पञ्चमाध्यायः | - | 164-226 |
| 13. | | परिशिष्टम् | - | 227-232 |
| 14. | | सन्दर्भग्रन्थसूची | - | 233-240 |

- **प्रथमाध्यायो नामशब्दार्थसम्बन्धः** **1-35**
  - व्याकरणकोशादिग्रन्थदृष्ट्याशब्दनिष्पत्तिः तन्निर्वचनञ्च।
  - शब्दपदस्याभिधेयार्थः।
  - शब्दपदस्य व्युत्पत्तिः।
  - शब्दपदस्य पर्यायाः।
  - कण्ठविवरादितः शब्दस्योत्पत्तिः।

- शब्दस्य तात्त्विकस्वरूपम्।
- श्रुतिप्रतिपादितशब्दतत्त्वम्।
- व्याकरणशास्त्रप्रतिपादितशब्दतत्त्वम्।
- मीमांसाशास्त्रप्रतिपादितशब्दतत्त्वम्।
- न्यायशास्त्रप्रतिपादितशब्दतत्त्वम्।
- अलङ्कारशास्त्रप्रतिपादितशब्दतत्त्वम्।
- श्रुतिप्रतिपादितार्थतत्त्वम्।
- व्याकरणशास्त्रप्रतिपादितार्थतत्त्वम्।
- मीमांसाशास्त्रप्रतिपादितार्थतत्त्वम्।
- न्यायशास्त्रप्रतिपादितार्थतत्त्वम्।
- अलङ्कारशास्त्रप्रतिपादितार्थतत्त्वम्।
- श्रुतिप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्।
- व्याकरणशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्।
- मीमांसाशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्।
- न्यायशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्।
- अलङ्कारशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्।

➢ **द्वितीयाध्यायो नाम विविधशास्त्रदृशा वृत्तिविमर्शः** **36-79**

- वृत्तिपदार्थः।
- वृत्तिशब्दस्य निष्पत्तिः।
- वृत्तिशब्दस्य व्युत्पत्तिः।
- कोशादिग्रन्थदिशा तदर्थाः।
- व्याकरणप्रभृतिशास्त्रालोके वृत्तिपदस्य उपात्तार्थः।
- शास्त्रानुसारं वृत्तिस्वरूपम्।

- व्याकरणशास्त्रदृशा वृत्तिः।
- मीमांसाशास्त्रदृशा वृत्तिः।
- न्यायशास्त्रदृशा वृत्तिः।
- काव्यशास्त्रदृशा वृत्तिः।
- वृत्तिप्रकाराः।
- व्याकरणशास्त्रप्रतिपादिताभिधावृत्तिः।
- मीमांसाशास्त्रदृशा अभिधावृत्तिः।
- न्यायशास्त्रदृशा अभिधावृत्तिः।
- काव्यशास्त्रदृशा अभिधावृत्तिः।
- व्याकरणशास्त्रदृशा लक्षणावृत्तिः।
- मीमांसाशास्त्रदृशा लक्षणावृत्तिः।
- न्यायशास्त्रदृशा लक्षणावृत्तिः।
- काव्यशास्त्रदृशा लक्षणावृत्तिः।
- व्याकरणशास्त्रदृशा व्यञ्जनावृत्तिः।
- मीमांसाशास्त्रदृशा व्यञ्जनावृत्तिः।
- न्यायशास्त्रदृशा व्यञ्जनावृत्तिः।
- काव्यशास्त्रदृशा व्यञ्जनावृत्तिः।
- तात्पर्याख्यावृत्तिः।
- वृत्तिविमर्शः।

➢ **तृतीयाध्यायो नाम प्राक्तनालङ्कारिकोदीरित-लक्षणावृत्तिविमर्शः** **80-124**

- ‘लक्षणा’पदनिष्पत्तिः कोशादिदृशा तदर्थश्च।
- लक्षणाया उद्भवो विस्तरश्च।
- काव्यशास्त्रोपजीव्येषु नाट्यशास्त्रप्रभृतिषु लक्षणावस्थितिः।

- लक्षणाभ्युपगमनाय बीजं किम् ?
- भामहाचार्यमारभ्य मम्मटराजानकपर्यन्तानां प्रागालङ्कारिकाणां तत्तद्ग्रन्थानामालोके लक्षणाशक्तेः स्वरूपं मतभेदश्च।

➢ **चतुर्थाध्यायो नाम अर्वाक्तनालङ्कारिकोदीरित-लक्षणावृत्तिविमर्शः** **125-163**

- रुय्यकात्प्रभृत्याशाधरभट्टपर्यन्तानाम् अर्वागालङ्कारिकाणां यथाग्रन्थं लक्षणावृत्तिविवेचनम्।
- लक्षणावृत्तिविषयी मतभेदविमर्शः।
- लक्षणावृत्त्यर्थकप्रयुक्तपदानाम् अर्थविचारः।

➢ **पञ्चमाध्यायो नाम लक्षणाभेदविमर्शः** **164-226**

- लक्षणाभेदकं बीजम्।
- लक्षणायाः भेदप्रभेदस्वरूपम्।
- प्राचीनालङ्कारिकाणां दृशा लक्षणाभेदाः।
- अर्वाचीनालङ्कारिकाणां दृशा लक्षणाभेदाः।
- उभयेषामप्यालङ्कारिकाणांयथाग्रन्थानुसारं लक्षणावृत्तिविषयको भेदविमर्शः।

➢ **परिशिष्टम्** **227-232**

- 1 उद्धृतलक्षणालक्षणसूची
- 2 उद्धृतकारिकासूची

➢ **सन्दर्भग्रन्थसूची** **233-240**

- Referred websites

# प्ररोचना

नैतदपह्नुतं मतिमतां वैदुष्यजुषां यदतिपुराकालादद्यावधि भागीरथीव त्रिपथं प्रवहन्ती देववाणी अगण्यरचनाधारासु शास्त्रपरम्परासु लौकिकजीवने समुद्योतं प्रकिरन्ती शोशुभ्यते। विसदृशोऽयमस्याः प्रवाहो यत्र स्नपिता नैके साहित्यकारा रचनाकाराः शास्त्रकाराश्च स्वकीयैः रमणीयैः काव्यैः वाङ्मयसुमनोभिर्देवीमादधिरे **सा वाग्वै ब्रह्मे**ति वेदरूपतया शास्त्ररूपतया वाचो ब्रह्मत्वं योगाङ्गानुष्ठानपरायणैर्योगिभिरनुभूयते। यतोहि शब्दशास्त्रजल-प्रक्षालितस्याध्येतुः परब्रह्माधिगमत्वात्। तदुक्तमपि **शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति** - तदेव प्रकारान्तरेणाह भाष्यकारः- **एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवति** शब्दस्य सम्यग्व्युत्पत्पत्ति-प्रयुक्त्युत्तरैहिकामुष्मिकफललभ्यत्वात् शास्त्राधिगमः। शब्दज्योतिरसद्भावे निखिलजगत्तमोवृत्तिसत्त्वात् लोकयात्रा न प्रवर्तेतेति। शब्दशास्त्रज्योतिरुपास्य-मित्याशिश्ये कविर्दण्डी। पुरुषप्रवृत्तिनिवृत्तिपरकवाक्यस्य काव्यस्य सिद्धे शास्त्रत्वे तच्छास्त्रान्तरातिगमत्वं चतुर्वर्गप्राप्तिसौलभ्यत्वात् सिद्ध्यति। लोकवृत्तमादाय सहृदयहृदयसंवेद्यलोकोत्तराह्लादजनकतया कान्तेव काव्यस्य उपदेशत्वात् लोकव्यवहारनियामकता सिद्ध्यति शास्त्रान्तरप्रमेयवत् रसगुण-दोषादिवस्तुजातसुबोधाय यत्काव्यभावनापटीयस्त्वं पाठकगतं प्रस्फुरेदित्यतः प्राक् काव्याधिगमस्य शब्दज्ञानाधीनतया आचार्यैः काव्यलक्ष्म-विधायिभिर्वृत्तिविचार इति प्रकरणमुपन्यस्तम्।

**अनन्तो हि वाग्व्यापारः** इत्यतः अर्थप्रत्यायकस्य शब्दस्य अभिधादिव्यापारो वेद्यते। वाच्यलक्ष्यव्यङ्ग्यार्थाश्रितः काव्यजगद्व्यवहारः। लोके हि कलिङ्गदेशवासी साहसिक इति वक्तव्ये कलिङ्गः साहसिक इत्युच्यते। लोके शास्त्रे च महान्तो लाक्षणिका व्यञ्जकाश्च शब्दायोयुज्यन्त इत्थङ्करो विषयो व्याकरणादिशास्त्रकारैः बहुधा व्याख्यायि। तत्रोक्तविषयस्य

दुर्बोधत्वात् लक्षणावृत्तिगतमेतदनुबन्धि वस्तुजातं प्रज्ञानिकषोपले सम्परीक्ष्य यथायथमागुम्फ्य च मननजलधेरन्तरुदरस्पर्शेण विदुषा डॉ. दुबेसौरभमहाभागेन रचितो **लक्षणावाद** इत्याख्यो ग्रन्थोऽधिजिगांसूनां साहित्यवीथीपान्थानां काव्यशास्त्ररहस्यव्यवसायिनां सहृदयानां शास्त्रान्तरदत्तैकचित्तानामपि विमल-हृदयमधिरुह्य शब्दवृत्तिविषयकनिर्भ्रान्तप्रतिपत्त्या लक्षणां सर्वथा प्रकाश्य विलसतुतमाम् इत्याशंसामि।

कुलपतिः

**प्रो. मुरलीमनोहरपाठकः**

# सम्पादकीयम्

नूनमेव शास्त्रप्रमेयाभिधायी ग्रन्थः पाठधारां प्रविशन् मोदातिरेकं पुष्णातीति विपश्चितां वचः, तदद्य पुरोवर्तिनं ग्रन्थमेनं समीक्षमाणोऽनुभवामि। शास्त्राकुण्ठितशेमुषीमता श्रीमता दुबे-सौरभेण "लक्षणावादः" इत्यभिधानो ग्रन्थः निरमायि, यत्र मनोहरपदविलासरुचिरा संस्कृतगीर्विलसति। लक्षणादि-पदार्थानां विषये छात्राणां बोधसौकर्यं यथा सम्भवि तथा यत्नं चिकिर्षुः ग्रन्थकारः पाठयन्निव प्रबन्धमकार्षीदित्यपि योग्यं निश्चेतुम्, पुनरयमत्र विशेषः समवलोकि यत् प्रमेयगतदुरूहत्वप्रकाशनेऽपि भाषागतं सौम्यम् आर्जवञ्च सर्वथा रक्षितं भाति। लक्षणेति दर्शनव्याकरणादिशास्त्रेतरसाधारणोऽपि विषय इहापूर्वतया व्यामर्शीति तत्प्रतिपादकैरन्यैः पुरा ग्रन्थैरस्य गतार्थत्वं न कथमपीति आरम्भणीयेयं कृतिः। तत्र आचार्यसौरभस्य अनल्पश्रमपरिणतिरूपं ग्रन्थरत्न-मिदं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कतविश्वविद्यालयस्य प्रकाशनेन लोकमुखं यातीति गौरवमादधानस्तादृशापूर्वप्रमेयप्रत्यायकप्रबन्धनिर्माणमेव पारमार्थिकी सारस्वती सपर्या इति भावयन्नैषा निर्मितिर्ग्रन्थकृतो यशः केतनं लोकत्रय्यां प्रसारयन्ती गुणज्ञानां हृदि आस्पदं कल्पिषीष्ट इति कामये।

सम्पादकः

**प्रो. शिवशङ्करमिश्रः**

# आधमर्ण्यज्ञप्तिः

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते** इत्याद्याभाणकैरभियुक्तैः शाब्दमहत्त्वं जोघुष्यते। व्याकरणसरणिः शाब्दज्ञानसम्पादनायालं नार्थज्ञान-विधये इति शब्दार्थसाहित्याधिकारः कार्यः। तच्च वृत्त्याधीनो वृत्तावपि लक्षणाश्रितः। जागतिकसाहित्यिकव्यपदेशः प्रायो लक्षणाश्रितः तदेतद्ग्रन्थ-लेखनप्रवृत्तिरधिगता। रामादिप्रवर्तितव्यं न रावणादिवदित्यादिकृत्याकृत्य-प्रवृत्तिनिवृत्त्युपदेशद्वारं काव्यमिति काव्यलक्ष्मविधायिनां प्राचामुद्घोषः। पुरुषप्रवृत्तिनिवृत्त्युपदेशपरकाणि काव्यशतानि सन्ति। तत्र प्राचामभिमतेन काव्यवर्त्मनैव वाक् समभ्यर्चनीया। काव्यं च गुणदोषालङ्कारैर्निरूपणीयं विशेष्यतावच्छेदकं भवति तादृशस्य काव्यस्य निर्दुष्टतापादनाय शब्दार्थ-व्युत्पत्तिरावश्यकी तच्च सकलकामदुहा काव्यशास्त्रेण सम्भवति। तदुक्तमपि-

**एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवति**। किम्बहुना

**न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**

इत्यादिशब्दशासनात् इदं वेद्यते सर्वविधापि संवित् शब्दमुखादेव प्रादुर्भवति। शब्दार्थव्युत्पत्तये शब्दप्रपञ्चः ज्ञेयो येन वृत्तिविचारः सम्यगभ्यस्यः। विषयोऽयमत्यन्तं गभीरो दुर्बोधश्च। काव्यशास्त्रेयथायं विषयः शब्दशक्तिप्रकरणे तैस्तैरालङ्कारिकैः सिद्धान्तितः स नूनं रमणीयो वर्तते काव्यशास्त्रस्याध्येतॄणां परमुपादेयश्च। अयञ्च विषयः व्याकरणदर्शनाद्यशास्त्रेपि दत्तः। शब्दशक्तिविषयस्याध्ययनेन काव्यरहस्यानि चिरात् हृद्यानि भवन्ति इतरथा शुकपाठवत् बोधस्तस्य स्यात्। एतादृशीं विसङ्गतिमनुभूय पाठकजनबोधदार्ढ्याय काव्यानुषङ्गिकतया मया इत्थङ्कारो ग्रन्थः लिख्यते एतत्प्राक् अमुमेव विषयमाश्रित्य मया राष्ट्रियसंस्कृतविश्वविद्यालयस्य

शृङ्गेरीपरिसरे साहित्यविषये विद्यावारिध्युपाधये प्रबन्धः प्रास्तावि। तमेव विषयं विशदीकृत्य संशोध्य परिष्कृत्य व्यवस्थाप्य चाधुना रच्यत इति सूच्यते।

अत्र व्याकरणमीमांसान्यायादिशास्त्रदृशा तदनु काव्यशास्त्रधिया शब्दार्थसम्बन्धं वृत्तिविचारं च निरूप्य लक्षणावृत्तिः प्राचाम् अर्वाचीनानां च मतानुसारं प्रपञ्चितेति गुम्फित एष बन्धः सर्वशास्त्रपाठकेभ्यः अध्येतृभ्यश्च नितान्तमुपकारको विलसतितमामिति।

भगवत्याः शारदाया गणेशस्य च निरवधिकेन अनुग्रहेण, गुरूणामाशीःसन्तत्या च ममेदं लेखनकर्म इतिभावमगात्। एतत्प्रसङ्गे ये बहुविधेन साहाय्येन मामन्वग्रहीषुः तेषामाधमर्ण्यविवक्षया आभारप्रकट-नायात्मानं व्यापारयामि। सर्वादौदक्षिणाम्नाय-श्रीशारदापीठाधीश्वराणां सारस्वतानां विद्यावैराग्यधनानां परमपूज्यानां जगद्गुरूणाम् अनन्तश्रीविभूषितानां श्रीश्रीभारतीतीर्थमहास्वामिनां तथा तत्करकमलसञ्जातानां नैकशास्त्रनैपुणी-चणानाम् अनन्तश्रीविभूषितानां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्च चरण-सरसिजयोः पौनःपुन्येन प्रणतिततीः समर्पयामि। यत्कृपाकटाक्षोर्मिचल-शृङ्गेरीपुर्यामेतदविषयाध्ययनस्य दीप्तिरवापि। यज्जठररक्तमासविशेष-संवर्धितत्वादेष एतत्कार्यकरणार्हः समजनि। तद्धेतुभूताभ्यां तत्रभवद्भ्यां ताभ्यां मत्पितृभ्यां प्रणतिततिमाल्यमर्पयामि।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य साहित्य-विभागाध्यक्षाः विविधशास्त्रनदीष्णाः चलच्छास्त्राः सर्वतन्त्रस्वतन्त्राः श्रीगुरवः आचार्याः रामकुमारशर्ममहोदयाः सबहुमानं प्रणामसहस्रैः सास्मर्यन्ते। ये हि स्वसाहित्यसरिता मादृशञ्जनमाप्लावितवन्तः। येषां प्रदत्तज्ञानमन्दाकिन्या रससिक्तं ममेदं कार्यं पर्य्यशुद्ध्यत्। तेभ्यः नतिततिपूर्विकां कार्तज्ञतां निवेदयामि।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य तत्रभवन्तो भवन्तः हस्तामलकीकृतव्याकरणसाहित्यवेदस्मृतिज्योतिषप्रस्थानत्रय्या-दिशास्त्राः विद्योतितान्तःकरणाः माननीयाः कुलपतयः प्रो. मुरलीमनोहर-

पाठकाः अभिसन्दर्भं प्रणतिपुरस्सरं कार्तज्ञेन सभाज्यन्ते। येषां सत्प्रेरणया इदं कार्यं निर्विघ्नं प्राकाश्यमायात् ।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्यकुलसचिवमहोदयः कुशलप्रशासकः श्रीमान् सन्तोषकुमारश्रीवास्तवः अपि प्रणतिपुरस्सरं सभाज्यते। यत्साहाय्येन इदं कार्यं शुल्कात्विप्रकृष्टं गतम्।

तदनु प्राक्कुलपतिवर्याः प्रातः स्मरणीयाः सदाचारविग्रहाः शास्त्राचार-पूतान्तःकरणाः पूज्याः आचार्याः रमेश कुमारपाण्डेयमहाभागाः मया विस्मर्तुं न शक्या यैः प्रथमः अवकाशो मयि कल्पितः तदभावे कार्यमिदं चिन्तनातीतमेव जायताम्। तान्प्रति हृत्सिन्धुना सश्रद्धं नमनानि प्रयच्छामि।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकवर्याणां प्रो. रमाकान्तपाण्डेयमहोदयानामपि प्रणामं निवेदयामि येषां सत्प्रेरणया एतद्विषयस्य चयनार्थम् अविस्मरणीयमवदानं प्राप्तम्।

मम मार्गदर्शकस्य प्रो. राघवेन्द्रभट्टमहोदयस्यापि अवसरात्र सनति हार्दं धन्यवादं प्रकाशयामि। येन एतद्विषयस्य दिशा निर्दिष्टा।

प्रो. शिवशङ्करमिश्रमहाभागाः शोधविभागाध्यक्षाः अपि मयि स्निह्यन्ति येषां शैक्षणिकयात्रा मां किञ्चित्करणाय प्रैरिरत् ये चाविरलं प्रकाशनकार्यार्थं प्राचूचुदन्। तेषां मिश्रमहोदयानां स्वीयं सप्रणामं आभाराञ्जलिं प्रकाशयामि।

आधमर्ण्यप्रकाशश्रृङ्खलायाममुष्यां व्याकरणसाहित्यविद्या-पारदृश्वानः आचार्यजयकान्तसिंहशर्मवर्याः सप्रणामं सभाज्यन्ते साधुवाद-वचोभिः यदीयसाहाय्यबलेन मयि भाषासम्बद्धं बलमागतम्।

अस्मद्विश्वविद्यालयस्य शोधसहायकानां डॉ. ज्ञानधरपाठक-महोदयानां, डॉ. जीवनभटराईमहाभागानां, सङ्गणक-सहायकानां श्रीविष्णु-महाभागानाञ्च नतिभावेन हृदयेन साधुवादाः। येभ्यः समये समये महान् सहयोगः प्राप्तः।

अनुजकल्पः डॉ. अभिषेक उपाध्यायः  सहायकाचार्यः, गुजरात-प्रदेशस्थशासकीयमहाविद्यालयोऽपि बहुधा स्मर्यते येन आपदि महती उपकृतिराचरिता। सोऽपि धन्यवादार्हः।

किम्बहुना धन्यवादं कथयामि यैः सर्वथा उपकारः कृतः। तेषु अस्मत्प्रेष्ठःप्राक्छात्रः सुनीलशर्मा सौरवसेमवालः अन्ये च ते समेऽपि साधुवादैश्च आशीर्भिश्च सभाज्यन्ते यैः मत्कार्ये तकनीकिसहयोगः व्यधायि। अपि च पुस्तकालयपरिवारसदस्याः स्मर्यन्ते। यथा- राजेशकुमारपाण्डेय-महाभागः असिस्टेंट लाइब्रेरियन्, सुनीलमिश्रमहोदयः इत्यादयः सर्वेऽपि धन्यवादशतैरभिनन्द्यन्ते। येषां सततसहयोगेन पुस्तकीयभावना मम अक्षुण्णा स्थिता। साहित्यसंस्कृतिपीठप्रमुखाणां प्रो. कल्पनाजैनमहाभागानां पुराण-विद्यापीठप्रमुखाणां प्रो. शीतलाप्रसादशुक्लमहाशयानां हार्दं धन्यवादं प्रकाशयामि येषाम् एतद्ग्रन्थलेखनकार्ये महान् सहयोगो व्यधायि। पुनश्च डॉ. डॉ. अनमोलशर्ममहोदयस्य, सहायकाचार्यस्य डॉ. देवेन्द्रप्रसादमिश्रमहोदयस्य डॉ. बी.कामाक्षम्मामहाशयायाः, सहायकाचार्यायाःअपि विशेषतः धन्यवादाः सन्ति। एवं प्रत्यक्षपरोक्षरूपेण वा ये मित्रबान्धवादयः आग्रन्थलेखनसमाप्तेः मां सहाकार्षुः तेभ्यः सर्वेभ्योऽपि आधमर्ण्यं प्रकटयामि।

बुधजनविधेयः

**लेखकः**

# आमुखम्

भूमिरिव भूमिका इति न्यायात् ग्रन्थविषयकुक्षितया प्रबन्धवेदिकापरतया वा किञ्चिदुच्यते। लोके एकमेव वस्तु बोधयितुं तद्वाचकशब्दः समान एव किन्तु तद्बोधनशैल्या तत्पृथक्-पृथक् नीयते। तद्व्यक्तुं वक्तुः वाग्व्यापारे काचिद् वाग्विच्छित्तिः विलक्षणता प्रकटनशैली वा यथा लोक्यते, तथैव शास्त्रेऽपि भरतमुनिभामहप्रभृतीनां काव्यशासनविधायिनां काव्यस्वरूप-शब्दवृत्ति-रस-गुणालङ्कारादिकाव्यप्रमेयानां प्रतिपादने कश्चिद् विच्छित्तिविशेषो लक्ष्यते मतवैभिन्न्यानि चाकल्यन्ते। अन्यशास्त्रपरम्परेव काव्यशास्त्रपरम्परापि प्राचीनतमा वेदपुरुषाच्चाविर्भूता। विश्वस्य प्राचीना कृतिः ऋग्वेदः। तत्र दशममण्डलस्थो यमयम्योः संवादः[1] तृतीयमण्डलस्थो विश्वामित्र-नदीसंवादः[2] इत्यादिसन्दर्भाः काव्यचिन्तकैः काव्यबीजतया उपादीयन्त। श्वेताश्वतरोपनिषदि एकां जीवेश्वरयोः स्वरूपप्रतिपादिकाम् ऋचां परिशील्य विविधालङ्काराः कविभिः साक्षात्कृताः। यथा-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्योऽभिचाकशीति॥[3]

जीवेश्वरयोः पक्षिविशेषयोः आरोपाद्रूपकालङ्कारः, पिप्पलभुक्तिः कान्तेः हेतुः, पिप्पलभुक्तिरूपकारणविरहे कान्तिरूपकार्यस्य प्रकाशत्वे विभावना भुक्तिरूपकारणसत्वेऽपि कान्तिरूपकार्यस्याप्रकाशत्वे विशेषोक्त्य-लङ्कारता एवमलङ्कारान्तरदर्शनात् काव्यशास्त्रस्यपुरातनत्वमालोकितम्। एवमेव व्यासर्षिप्रणीतपुराणान्तर्गतगोपीगीतादि-संवादतया काव्यजीवितत्त्वानि

---

1. ऋक् द.मं.,यमयमीसंवादः
2. ऋक् तृ मं.,विश्वानदीसंवादः
3. श्वेत.उप..

आलङ्कारिकैः गृहीतानि। अग्निपुराणान्तर्गताः रसालङ्कारादयः प्रमेया उपनिबद्धाः सन्ति।

रामायणमहाभारतादीनि आर्षकाव्यानि आश्रित्य उत्तरवर्त्तिकाव्यानि प्रणीतानि।

यद्यपि काव्यशास्त्रपरम्परायां प्रथमकृतित्वेन मुनिप्रणीतनाट्य-शास्त्रमस्ति परं तत्र दृश्यकाव्यतत्त्वान्येव उपपादितानि न तु श्रव्यकाव्यस्य। सम्प्रदायस्यास्य व्यवहाराय सरस्वतीकण्ठाभरणे प्रचलितानि षण्णामानि निरदिश्यन्त-

काव्यं शास्त्रेतिहासः काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्॥[1]

काव्यं, शास्त्रम्, इतिहासः, काव्यशास्त्रम्, काव्येतिहासः, शास्त्रेतिहासः, इति। अलङ्कारशास्त्रपरम्परायां भामहप्रणीतकाव्यालङ्कारः आद्यः काव्यशास्त्रीयो ग्रन्थः विद्यते। तत्र काव्यशास्त्रस्य विविधसिद्धान्ताः सविशदं प्रत्यपादिषत। तदुत्तरं पश्चाद्वर्तिनः आलङ्कारिकादण्ड्यानन्द-मम्मटाचार्यप्रभृतयः स्वकाव्यशास्त्रीयग्रन्थान् निबबन्धुः। अत एव काव्यशास्त्रस्य महत्त्वविषये राजशेखरोक्ता भणितिः प्रसिद्धा **उपकार-कत्वादलङ्कारः सप्तममङ्गम्** इति यायावरीयः, पञ्चमीसाहित्यविद्या इति[2]। एवमेव अत्रापि अन्यशास्त्रसम्मिता सूत्रशैली वृत्तिशैली भाष्यशैली टीकाशैली चोपालभिषत। यथा सूत्रशैल्यां वामनकृतकाव्यालङ्कारः तत्रैव वृत्तिभागः, भाष्यम्-नाट्यशास्त्रस्यास्य अभिनवगुप्तभारतीटीका, ध्वन्यालोकस्य लोचनटीका। अतः काव्यशास्त्रपरम्परापि पुरातनत्वं दधाति। एवं काव्यजीवातुतत्त्वाभ्युपेयात्। अलङ्कारशास्त्रस्य प्रधानतया षट् सम्प्रदायाः काव्यतत्त्वपरिशीलकानां मतिभेदात् प्रावर्तन्त। ते च सम्प्रदायाः

---

1. का.मी, द्वि.अ., पृ.४
2. तत्रैव, पृ.८

अलङ्कारसर्वस्वस्य व्याख्याने समुद्रबन्धेन ऐदम्प्राथम्येन उदलिख्यन्त। तद्यथा-

'इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन-व्यापारमुखेन व्यङ्ग्यमुखेन वेति त्रयः पक्षाः। आद्येऽप्यलङ्कारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्। इति पञ्चसु पक्षेष्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्ति-जीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन।'[1]

समुद्रबन्धस्य मतानुसारेण विशिष्टौ शब्दार्थौ काव्यम् इत्युच्यते। विशिष्टता च धर्ममुखेन, व्यापारमुखेन, व्यङ्ग्यमुखेन चेति प्रकारत्रयेण सम्भवति। तत्र धर्मो नित्यानित्यभेदेन द्विविधः। काव्यस्य नित्यधर्मो गुणः, अनित्यधर्मःअलङ्कारः। एवं धर्ममुखेन रीतिसम्प्रदायः, अलङ्कारसम्प्रदायश्च पर्यगण्येताम्। विशिष्टा पदरचना रीतिः[2], विशेषो गुणात्मा[3] इति वामनस्य वचनानुसारेण अत्र नित्यधर्मपक्षे गुणशब्देन रीतिसम्प्रदायः स्व्यकारि।

व्यापारमुखेन विशिष्टता वक्रोक्त्या भोगकृत्त्वेन च सम्भवति। उक्तिवैचित्र्यमेव वक्रोक्तिशब्देन व्यपदिश्यते। भोगकृत्त्वव्यापारश्च भट्टनायकेन रससूत्रस्य व्याख्यानावसरे उररीकृतः। अमुं व्यापारम् अतिरिक्ततया अनभ्युपेत्य भरतमुनेःरससम्प्रदाये एव अस्य अन्तर्भावः सुशकः। यतो भट्टनायकेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तौ भोगकृत्त्वव्यापारः अभ्युपागमि। एवं व्यापारमुखेन वक्रोक्तिसम्प्रदायः रससम्प्रदायश्च पर्यगण्येताम्।

व्यङ्ग्यमुखेन शब्दार्थयोः विशिष्टता ध्वनौ सम्भवतीति ध्वनि-सम्प्रदायोऽपि पर्यगण्यत। समुद्रबन्धेन भरतस्य रससम्प्रदायः, क्षेमेन्द्रस्य औचित्यसम्प्रदायश्च नोल्लिखिताविति विशेषः।

---

1. अलम्. स. पृ.सं. ३
2. का.सू.१.२.७
3. का.सू.वृ. १.२.८

**सम्प्रदायाःतत्प्रवर्तकाश्च-**

| सम्प्रदायाः | प्रवर्तका आचार्याः |
|---|---|
| १. रसः | भरतमुनिः |
| २. अलङ्कारः | भामहादयः |
| ३. रीतिः | वामनः |
| ४. वक्रोक्तिः | कुन्तकः |
| ५. ध्वनिः | आनन्दवर्धनः |
| ६. औचित्यम् | क्षेमेन्द्रः |

**रससम्प्रदायः**

नन्दिकेश्वरः परमेष्ठिन उपदेशेन प्रथमतया रसं निरूपयामासेति राजशेखर उल्लिलेख। परन्तु अद्यावधिः नन्दिकेश्वरस्य रसनिरूपणपरको न कोऽपि ग्रन्थ उपलब्धः। एतावदवधि उपलब्धेषु ग्रन्थेषु रससिद्धान्तस्य मूलं भरतविरचितनाट्यशास्त्रे दृश्यते। नाट्यशास्त्रस्य षष्ठे सप्तमे च अध्याये रसानां तथा भावानां निरूपणमकारि।

'विभानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'[1] इति भरतमुनेः रससूत्रम्। विभावयति रत्यादिम् उद्बोधयति, उद्बुद्धं च परिपोषयतीति विभावः। स आलम्बनम् उद्दीपनं चेति द्विविधः। यमालम्ब्य रत्यादिरुद्भवति स आलम्बन-विभावः, यथा शकुन्तलादुष्यन्तादिः। यो रत्यादिमुद्दीपयति सउद्दीपनविभावः, यथा मधुमासचन्द्रोदयादिः। अनुभावयति कार्यभूतत्वात् रत्यादिं सम्यक् प्रत्याययतीति अनुभावः, यथा स्तम्भस्वेदादिः कटाक्षविक्षेपादिश्च। तयोरादिमः चित्तवृत्तित्वात् आन्तरः, अन्तिमस्तु बाह्यः। विशेषात् आभिमुख्येन चरन्ति समनियततया आविर्भवन्तिइति व्यभिचारिणः, यथा निर्वेदादयः त्रयस्त्रिंशत् देवादिविषयिका रतिश्च। एतेषां संयोगात् स्थायिरूपस्य रसस्य निष्पत्तिरित्यर्थः।

1. नाट्य. ६.३१वृत्तिभागे

प्रधानतया एतत्सूत्रस्य व्याख्याकाराः चत्वारः सन्ति, ये च भट्टलोल्लटः शङ्कुकः भट्टनायकः अभिनवगुप्तश्च। उत्पत्तिवादी भट्टलोल्लटः रसो विभावादेः कार्यमित्यभिप्रैति। अनुमितिवादी शङ्कुकः रसो विभावादिना अनुमेय इत्यभिप्रैति। भुक्तिवादी भट्टनायकः विभावादेः रसेन सह भोज्य-भोजकभावसम्बन्धमङ्गीकरोति। तदर्थं तेन अभिधातिरिक्ततया भावकत्वं भोजकत्वं चेति व्यापारद्वयमुररीकृतम्। अभिनवगुप्तः व्यक्तिवादी। तन्मतेन रत्यादयः स्थायिभावाः वासनारूपेण सहृदयानां चित्ते अवतिष्ठन्ते। विभावादिभिः व्यक्तास्ते रसरूपतामाप्नुवन्तीति तन्मतम्।

भरतेन नाट्ये शृङ्गारादयः अष्टौ रसा अङ्गीकृताः। श्रव्यकाव्ये तु शान्ताख्यो नवमोऽपि रसः दृश्यते। महाभारते शान्तरसप्रधानत्वं वर्तत इति आनन्दवर्धनेन साधु निरूपितम्। रुद्रटः प्रेयानिति, विश्वनाथो वात्सल्यमिति रसं च अधिकतया उररीचकार।

**अलङ्कारसम्प्रदायः**

अलङ्क्रियते अनेन इत्यलङ्कारः शोभाधायको धर्मइत्यर्थः। स च शब्दाश्रितत्वात् शब्दालङ्कारः, यमकानुप्रासादिः, अर्थाश्रितत्वात् अर्थालङ्कारः उपमारूपकादिः। प्राचां मतानुसारंसुन्दरं शब्दार्थयुगलं काव्यमित्युच्यते। शब्दार्थयुगले तादृशं सौन्दर्यम् अलङ्कारेण भवतीतिकाव्ये तस्यैव प्राधान्यम्। तस्माद् स एव आत्मशब्देन व्यवह्रियते। काव्यालङ्कार-कारो भामहः अस्य सम्प्रदायस्य प्रवर्तकः। जयदेवादयोऽपि अमुमेवपन्थान-मनुसरन्ति। तदुक्तं जयदेवेन-

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥[1]

रसवत्प्रेयः प्रभृतीनामलङ्काराणाम् अङ्गीकरणेन एतेषां मतेन रसादयोऽपि अलङ्कारा एव।

---

1. चन्द्रा. १.८

तत्र भरतः उपमादीन् चतुरोऽलङ्कारान् उररीचकार, भामह एकोनचत्वारिंशतम्, उद्भट एकचत्वारिंशतम्, जयदेवश्च शतम्। एवं क्रमेण शास्त्रग्रन्थेषु अलङ्काराणां सङ्ख्यायां विकासो दृश्यते। कविप्रतिभाया आनन्त्येन कल्पनाप्रकारा अपि अनन्ता एव भवन्ति।

**रीतिसम्प्रदायः**

आचार्यो वामनो रीतिसम्प्रदायस्य प्रवर्तकः। सः स्वेन विरचितायां काव्यालङ्कारसूत्रवृत्तौ रीतेरात्मत्वं प्रतिपादयामास। तदुक्तं तेन 'रीतिरात्मा काव्यस्य[1], विशिष्टा पदरचना रीतिः[2], विशेषो गुणात्मा[3]' इति। रीतिरियं दण्डिकुन्तकादिभिः मार्गशब्देन, मम्मटादिभिः वृत्तिशब्देन, उद्भटानन्द-वर्धनादिभिस्तु सङ्घटनाशब्देन व्यपदिश्यते।

वामनस्य मते शब्दार्थयोः शोभाकारिणोधर्मागुणाः, तदतिशयहेतवः अलङ्काराः। गुणवतः पदविन्यासस्य रीतित्वाद् गुणानिरूपणीयताम् अर्हन्ति। ते च कारिकायामस्यां संगृहीताः-

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥[4]

एते समानाभिधानाः दशशब्दगुणाः, दश अर्थगताश्च। तेषां विंशतेर्गुणानां लक्षणानि भिन्नानि। रीतिः वैदर्भी गौडीया पाञ्चाली चेति त्रैविध्यमृच्छति। तत्र वैदर्भी समग्रगुणा। गौडीया ओजः कान्तिमती। पाञ्चाली माधुर्यसौकुमार्योपपन्ना। एतासु पूर्वपूर्वा ग्राह्या भवतीति वामनस्य मतम्।

**ध्वनिसम्प्रदायः**

शब्दार्थकात् ध्वनधातोः 'सर्वधातुभ्य इन्'[1] इत्यौणादिकेन सूत्रेण इन्प्रत्यये ध्वनिशब्दो निष्पद्यते। तत्र ध्वनतीति व्युत्पत्त्या ध्वनिः व्यञ्जकः

---

1. का.सू. १.२.६
2. का.सू. १.२.७
3. का.सू. १.२.८
4. काव्या. १.४१

शब्दोऽर्थश्च। ध्वन्यते इति व्यङ्ग्यः। ध्वननमिति व्यञ्जनाव्यापारः। ध्वन्यतेऽत्रेति काव्यविशेष इति ध्वनिशब्दस्य पञ्चधा व्याख्यानं क्रियते। यथा अङ्गनासु अवयवेभ्योऽतिरिक्तं लावण्यं भवति तथा काव्ये वाच्य-लक्ष्याभ्यामतिरिक्तः कश्चिदर्थो वर्तते यश्चव्यङ्ग्यशब्देन व्यपदिश्यते। आनन्दवर्धनेन तल्लक्षणमिदमुक्तं यत्-

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥[2]

यत्र शब्दो गुणीभूतार्थः अर्थो वा गुणीभूतस्वरूपः तं प्रतीयमानमर्थं व्यञ्जयतः स काव्यविशेषो ध्वनिरित्यर्थः।

केचित् ध्वनेरभावमामनन्ति। अपरे ध्वनिमभ्युपगच्छन्ति, परन्तु तं लक्षणा वेद्यम् इति अभिप्रयन्ति। अन्ये तु व्यञ्जनाविषयत्वेन तं जानन्तोऽपि अनिर्वचनीयं कथयन्ति। एवं ध्वनौ विषये तिस्रो विप्रतिपत्तयो विद्यन्ते, ये च अभाववादः, भाक्तत्ववादः, अनिर्वचनीयतावादश्चेति नाम्ना व्यवह्रियन्ते। एते त्रयोऽपिवादाः ध्वन्यालोककारेण निरस्ताः। आलङ्कारिकेषु लोल्लटः, भट्टनायकः, कुन्तकः, महिमभट्टः, धनिकः, मुकुल इत्यादय आलङ्कारिका ध्वनिविरोधिनः।

वस्तुतः आनन्दवर्धनेन ध्वनिसामान्यस्य आत्मत्वमभिहितम्, तथापि लोचनकारो वस्त्वलङ्कारयोः रसे पर्यवसायित्वात् अप्राधान्यमित्यभिप्रयन् काव्यस्यात्मा स एवार्थ इत्यत्र रसध्वनेरेव काव्यस्यात्मत्वमिति व्याख्याति। ध्वनिसम्प्रदायो रससम्प्रदायात् नातीव विलक्षणः, यतो ध्वनिसम्प्रदाये वस्त्वलङ्काररसानां त्रयाणामपि ध्वनेरात्मत्वम्, रससम्प्रदाये तु केवलं रसस्य।

**औचित्यसम्प्रदायः**

औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् इति निरूपयन् क्षेमेन्द्रः औचित्यसम्प्रदायस्य प्रवर्तकः। काव्ये गुणरसालङ्कारादिषु बहुष्वंशेषु सत्स्वपि

---

1. उणादि. ४.५५७
2. ध्वन्या १.१३

औचित्यस्यैव प्राधान्यम्। यदितन्नास्ति तदाकाव्यं उपहास्यतां याति। तदुक्तं क्षेमेन्द्रेण–

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यताम्
औचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणः ॥[1]

उचितस्य यो भावः तदौचित्यम्। यस्य यत्सदृशं तस्य तदुचितम्। तदुक्तं क्षेमेन्द्रेण–

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥[2]

उचितशब्दात् 'गुणवचनब्राह्मणादिभ्यः ष्यञ्'[3] इति सूत्रेण भावे ष्यञि औचित्यशब्दोनिष्पद्यते। क्षेमेन्द्रः औचित्यमेतत् पदवाक्यप्रबन्धार्थादिषु सम्भवतीति प्रतिपादयति। औचित्येनसाकम् अनौचित्यमपि उदाहरति। तत्र पदे औचित्यं यथा-

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं प्रशिथिलभुजाक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्त्रशयनम् ॥

अत्र सागरिकायाः कृशाङ्गीति विशेषणं विरहावस्थाया अतिशयं सूचयति।

**वक्रोक्तिसम्प्रदायः**

वक्रोक्तिसम्प्रदायस्य प्रवर्तकः कुन्तकः। वक्रा चासौ उक्तिश्च वक्रोक्तिः। वक्रा इत्यस्य चमत्कारजनिका इत्यर्थः, उक्तिरित्यस्य अभिधाव्यापार इत्यर्थः।

---

1. औचित्य ६
2. औचित्य. ७
3. अष्टा. ५.१.१२४

कुन्तकः प्राभाकरमतानुयायी। तन्मते अभिधातिरिक्तो व्यापारो नास्ति। विवक्षितेऽर्थे प्रतिपादनीये सामान्यानां यादृशो वाक्प्रयोगः, न तथा प्रतिभावताम्। तेषाम् अभिधानं चमत्कारकारि भवति। वक्रोक्तेर्लक्षणं तावदिदम्–

वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।[1]

वक्रोक्तिर्नाम प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। वैदग्ध्य-विशिष्टं वचनमिति यावत्। इयं च शब्दार्थयुगलरूपस्य काव्यस्य काचिदलङ्कृतिः।

वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, पदपरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता चेति षट्प्रभेदाः कृताः। तत्र वर्णविन्यासवक्रता यथा– सौन्दर्यधुर्यं स्मितम्। अत्र रेफयकारसंयोगस्य सकृदावृत्तिः शब्दे परां शोभामादधाति। यमकम् अनुप्रासश्चेति सर्वोऽपि शब्दालङ्कारः अस्मिन्नेव प्रभेदेऽन्तर्भवति।

पदवक्रतायां पूर्वार्धवक्रता परार्धवक्रता चेति द्वौ भेदौ। तत्र पूर्वार्धं धातुप्रातिपदिकान्यतरा प्रकृतिः, परार्धं च प्रत्ययः। तत्र पदपूर्वार्धवक्रतायां रूढिवैचित्र्यवक्रता, पर्यायवक्रता, उपचारवक्रता, विशेषणवक्रता, संवृति-वक्रता, वृत्तिवैचित्र्यवक्रता, लिङ्गवक्रता, क्रियावक्रता चेति अष्टौ प्रभेदाः सन्ति। संख्यावैचित्र्यवक्रता, कारकवैचित्र्यवक्रता, पुरुषवैचित्र्यवक्रता चेति-परार्धवक्रतायां त्रयः प्रभेदाः।

वाक्यवक्रतायां रसादिः, प्रायेण सर्वेऽप्यलङ्कारा अन्तर्भवन्ति। तदुक्तं कुन्तकेन–

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥[2]

---

1. वक्र.जी. १.१०
2. वक्र.जी. १.२०

अभिज्ञानशाकुन्तले दुर्वाससः शापवृत्तान्तः कल्पितः, तेन नायके निर्दोषत्वमायातमिति प्रकरणवक्रता। प्रबन्धवक्रताया उदाहरणं रामचरितप्रधाने काव्ये 'रामादिवद्वर्तितव्यम् न रावणादिवत्' इत्युपदेशः।

एवं वक्रोक्तेः षट्सु प्रभेदेषु अर्वाचीनैः आलङ्कारिकैः प्रतिपादिता ध्वनिगुणालङ्कारादयः सर्वेऽपि वाग्विशेषा अन्तर्भवन्ति। एवं रीत्या काव्यशास्त्रे सम्प्रदायानुरोधिनो विविधा ग्रन्थाः प्रणीता लभ्यन्ते। यत्र विस्तरेण मङ्गलात्परं काव्यस्य प्रयोजन-हेतु-कारण-लक्षण-शब्द-अर्थ-व्यापार-गुण-रीति-रस-अलङ्कारपदार्थानां सिद्धान्ताः विवेचिषत। यथा –

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयं।
यदि शब्दाह्वयञ्ज्योतिरासंसारं न दीप्यते॥[1]

शब्दज्योतिषः अभावे भुवनत्रयस्य लोकयात्रा एव न प्रवर्तते इत्युदघोषत महाकविर्दण्डी। एतेन आचार्याणां शब्द-अर्थ-स्वरूपविचारः परिलक्ष्यते। काव्यप्रकाशादिकाराः शब्दार्थस्वरूपविषयं सविशदम् उपपादयन्। अमुं विचारं ते शब्दवृत्तिप्रसङ्गे व्यदधुः। शास्त्रेशब्दस्य अर्थप्रतिपादनात्त्रयो व्यापाराः सम्भवन्ति। अभिधा लक्षणा व्यञ्जना चेति। व्यापारपदमेव शब्दस्य शक्तिपर्यायतया गृहीतमपि भवति। अभिधाव्यापारस्तु शब्दस्य सङ्केतितार्थ-बोधने अङ्गीकृतः। व्यञ्जनाव्यापारस्तु शब्दस्य सङ्केतितार्थे बाधा भूत्वा लक्ष्यार्थद्वारा यस्य प्रयोजनस्य सिद्ध्यर्थं वक्तृप्रयुक्तं वाक्यन्तस्य प्रयोजनातिशयार्थे अभ्युपागमि। लक्षणाव्यापारस्तु यदा सङ्केतितार्थेन तात्पर्यसिद्धिर्न भवति तदा सङ्केतितार्थेन सहितार्थान्तरबोधः स्वीक्रियते, तत्र तस्य स्वीकारः। 'काकेभ्यो दधि रक्ष्यताम्' इत्युक्तवाक्यश्रवणेन उपस्थापितस्यार्थस्य ग्रहणेन कथयितुः अभीष्टार्थः तावन्न उपपद्यते यावत् तदुक्तवाक्यार्थस्य तात्पर्यप्रतीतिः न भवतीत्यतः अभिधया उपस्थापितस्य काकमात्रपरकस्य अर्थस्य तात्पर्यानुपपत्तौ बाधे सति लक्षणया शक्त्या

---

1. काव्या., १.४

काकेभ्यः इति पदस्य काकसहितदधिविघातकसकलजीवरूपः अर्थः प्रतिपाद्यते, ततः वक्तृप्रयुक्तवाक्यं गतार्थतां यातीति।

एवंविधानां प्रयुक्तवाक्यानां श्रवणमात्रेण मुख्यार्थे व्यवहिते पुनस्तस्य अर्थस्य समन्वयाय अर्थान्तरस्य परिकल्पना जायते। तथैव शास्त्रेऽपि बाधितवाक्यार्थस्य अन्यार्थे सङ्क्रान्तिः लक्ष्यते उपर्युक्तविषयात्।
काव्यप्रकाशकारोऽप्याह-

मुख्यार्थबाधे तद्योगे रूढितोऽथप्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।[1]

अपि च साहित्यदर्पणे-

मुख्यार्थबाधे तद्युक्तः ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता।।[2]

जगन्नाथः 'स्वशक्यसम्बन्धः लक्षणा[3]' इति लक्षणालक्षणम् अचकथत्।

अमुना प्रकारेणप्राच्यानां मम्मटादीनां पाश्चात्यानां विविधालङ्कारिकाणां तदीयग्रन्थेषुलक्षणायाः स्वरूपविषये तदभ्युपायार्थं निमित्तविषये महान् भेदः परिलक्ष्यते। तस्मात्तेषां लक्षणायाः परिभाषास्तत्र मतभेदमभिलक्ष्य अत्र प्रबन्धो विरचि।

---

1. का. प्र., २/९
2. सा.द. ल.टी.,पृ.३५
3. रस.द्वि.आ.,पृ.१६२

# सङ्केताक्षरसूची

बृहद – बृहदारण्यकोपनिषद्
वाक्य - वाक्यपदीयम्
रघु.म.– रघुवंशमहाकाव्यम् (मल्लिनाथटीकोपेतम्)
सा.द. ल.- लक्ष्मीटीकासहितः साहित्यदर्पणः
वै.सि.उ.- वैयाकरणसिद्धान्तकौमुदी (उणादिप्रकरणम्)
अमर - अमरकोशः
शब्द - शब्दचन्द्रिका
ऋग् - ऋग्वेदः
शत -शतपथब्राह्मणम्
गो.ब्रा.-गोपथब्राह्मणम्
श्वेत.उप.-श्वेताश्वेतरोपनिषद्
मध्यसि -मध्यसिद्धान्तकौमुदी
वाक्य.ब्र.- वाक्यपदीयब्रह्मकाण्डम्
न्या.भा. - न्यायभाष्यम्
ता.टी. - तात्पर्यटीका
न्या.मं. - न्यायमञ्जरी
तर्क - तर्कभाषा
त.सं. - तर्कसङ्ग्रहः
न्याय - न्यायलीलावती
मी.सू.वृ.-मीमांसासूत्रवृति
प्र.पं.-प्रकरणपञ्चिका
स्फो.सि.-स्फोटसिद्धिः
श्लोक -श्लोकवार्त्तिकम्
वक्र.जी.-वक्रोक्तिजीवितम्
प्रताप. – प्रतापरुद्रयशोभूषणम्
लघु.- परमलघुमञ्जूषा
त्रिवे -त्रिवेणिका
अष्टा -पाणिनीयाष्टाध्यायी
मेदि -मेदिनीकोश
सिद्धान्त- वैयाकरणसिद्धान्तकौमुदी
भारत - महाभारतम्
भा.प.- भाषापरिच्छेदः
पू.मी.सू.-पूर्वमीमांसासूत्रम्
तैत्ति -तैत्तिरीयसंहिता
ऐतरे -ऐतरेयब्राह्मणम्
दुर्ग -दुर्गवृत्ति (निरुक्तटीका)
न्या.सू.-न्यायसूत्रम्
पू.मी.सू.भा.- पूर्वमीमांसासूत्रभाष्यम्
त.वा. - तन्त्रवार्तिकम्

महा -व्याकरणमहाभाष्यम्
काव्या -काव्यादर्शः
भामह.-भामहकाव्यालङ्कारः
रुद्रट.-रुद्रटकाव्यालङ्कारः
का.सा.-
काव्यालङ्कारसारसङ्ग्रहः
का.सा.ल.-
काव्यालङ्कारसारसङ्ग्रहः(लघु
वृत्ति)
का.सू. – काव्यालङ्कार-
सूत्रवृत्तिः
नाट्य - नाट्यशास्त्रम्
का.प्र.-काव्यप्रकाशः
तत्त्व -तत्त्वविवेकः
श.श.प्र. -शब्दशक्तिप्रकाशिका
चिन्ता -भट्टचिन्तामणिः
वे.क. - वेदान्तकल्पलता
मी.न्याय. -मीमांसान्यायप्रकाशः
दीपिका - तर्कसङ्ग्रहदीपिका
मुक्ता -न्यायसिद्धान्तमुक्तावली
वे.प.- वेदान्तपरिभाषा
वृत्ति - वृत्तिदीपिका
अलम् –अलङ्कारशेखरः
प्र.प.पृ. – प्रथमः परिच्छेदः पृष्ठम्
जटा.को- जटाधरकोशः
का.द. – काव्यदर्पणः
ता.टी. – तात्पर्यटीका

न्या.भा. – न्यायभाष्यम्
न्या.सू – न्यायसूत्रम्
शक्ति – शक्तिवादः
व्यु. वा. – व्युत्पत्तिवादः
निरु- निरुक्तम्
शब्दक – शब्दकल्पद्रुमः
परम. स्फो. नि.- परमलघुमञ्जूषा
स्फोटनिरूपणम्
रत्नश्री – काव्यादर्श
(रत्नश्रीटीका)
का.प्र. वा. टी.,
काव्यप्रकाशवामनीटीका
त. बि.– तत्त्वबिन्दुः
छान्द – छान्दोग्योपनिषद्
आ. - अध्यायः ,आह्निकम्
का.-कारिका, काण्डम्
स्फो. सि.– स्फोटसिद्धिः
कोवि – कोविदानन्दः
नञ्जरा- नञ्जराजयशोभूषणम्
भा.विव – भामहविवरणम्
प्रमेय -प्रमेयकमलमार्त्तण्डः
न्या.सू.च.आ. – न्यायसूत्रम्
चतुर्थाह्निकम्
शा.भा.मी.द.–
शाबरभाष्यमीमांसादर्शनम्
मु. कि.टी. – मुक्तावली,
किरणावली टीका

अं.स. – अलङ्कारसर्वस्वम्
सु.सा.टी- सुधासागरी टीका
हे.का. –
हेमचन्द्रकाव्यानुशासनम्
भा.प्र. ष. अ. –भावप्रकाशनम्, षष्ठाध्यायः
अ.महो.द्वि.त.– अलङ्कारमहोदधि, द्वितीयतरङ्गिणी
अलम् – अलङ्काररत्नाकरः
सा.सु.- साहित्यसुधासिन्धुः
वृ. वा. – वृत्तिवार्तिकम्
अलं सा.- अलङ्कारसारः
अ.कौ.द्वि.कि.- अलङ्कारकौस्तुभम्द्वितीयकिरण
म.म.च. – मन्दारमरन्दचम्पूः
उ.रा.च. - उत्तररामायणचम्पूः
अ.शे. – अलङ्कारशेखर
हेम – हेमचन्द्रकोशः
विद्धशा – विद्धशालाभञ्जिका
चन्द्रिका - रसचन्द्रिका
विलासः – रसविलासः

चन्द्रा - चन्द्रालोकः
सा. भू. – साहित्यभूषणम्
का.लो. – काव्यालोकः
प्र. - प्रथमम्
वि. विमर्शः
उन् – उन्मेषः
द्वि.आ. - द्वितीय आनन
मनु – मनुस्मृतिः
भूषण – वैयाकरणभूषणसारः।
सां. त. कौ. –
साङ्ख्यतत्त्वकौमुदी
यो.सू. योगसूत्रम्
साहि- साहित्यमीमांसा
ध्वन्या -ध्वन्यालोकः
अभिधा -अभिधावृत्तिमातृका
ध्व.लो. -सलोचनो ध्वन्यालोकः
व्यक्ति -व्यक्तिविवेकः
सरस्वती -सरस्वतीकण्ठाभरणम्
शृङ्ग –शृङ्गारप्रकाशः
रस–रसगङ्गाधरः
चन्द्रा–चन्द्रालोकः

## ।। अथ मङ्गलम्।।

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे।।

गणेशं कामदं वन्दे भक्तरक्षणतत्परम्।
सर्वकार्यसमारम्भे सुरासुरनमस्कृतम् ॥

या दुग्धाऽपि न दुग्धेव कविदोग्धृभिरन्वहम्।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती।।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती।।

यं प्राप्य सर्वागमसिन्धुसङ्घः
पूर्णत्वमभ्येति कृतार्थतां च।
तं नौम्यहं शाम्भवतत्त्वचिन्ता-
रत्नौघसारं परमागमाब्धिम्।।

प्रथमोऽध्यायः

# शब्दार्थसम्बन्धः

**लक्षणावाद इति** बन्धस्य 'शब्दार्थसम्बन्धः' इत्याख्यः प्रथमाध्यायो भवति। अत्र शब्दपदस्य निष्पत्तिः, निर्वचनम्, तदर्थः, कोशार्थः, व्युत्पत्तिश्चेति विषयाः श्रुतिव्याकरणमीमांसान्यायकाव्यशास्त्रेषु शब्द-अर्थ-तत्सम्बन्धविचारः अनुसन्धानोपयोगिनो मत्त्वा गवेषणधिया सविधि कार्यमिदं प्रवर्तते।

**शब्दः**

व्यवहारः संसारस्य सर्वाभीष्टं कर्मानुष्ठानं विद्यते, यस्मादृते चैतन्यशीलेन सामाजिकेन आह्लादमयजीवनं स्वचरमता च नावाप्तुं शक्यते। वाच्यवाचकत्वेन प्रवर्तमानः स व्यवहारो जगति विविधरूपेषु दृग्गोचरीभवति। मनुष्यः स्वकीयविचारान् अन्यान् सम्प्रेषयितुंशब्दरूपं वाग्व्यवहारमाश्रयते। अतः शब्दापरपर्यायाया वाण्याः प्राधान्यमावहति।

व्यावहारिके जगति विशिष्य च वाङ्मये सर्वविधं ज्ञानं शब्दादेव भवति। शब्दः प्रकाशरूपः, यस्याभावे अशेषसंसारस्य प्रतीतिः अन्धत्वस्य पराकाष्ठायां निपतति। प्रकाशरूपस्य शब्दस्य आलोकः प्राथम्येन वेदेभ्यः निस्स्यन्दन् व्याकरणमीमांसान्यायवैशेषिककाव्यशास्त्रादिषु अभिनिविशमानः भाषा-विज्ञानस्य वैज्ञानिकपरिधिपर्यन्तमागत्य विविधरूपेषु परिणमय्य शब्दतत्त्व-चिन्तनस्य प्रथम-प्रमेयत्वेन पर्यवसित इति। परमार्थतो लौकिकः पारमार्थिकश्चसमस्तोऽपि व्यवहारः शब्दाधीनो वर्तते। इह खलु लौकिकाः परीक्षकाश्च बुभुत्सितं अनधिगतमर्थं श्रोतृपुरुषान् बोधयितुमिच्छन्तो वाक्यमुच्चारयन्ति, प्रतिपत्तुमिष्टं च पदार्थं पृच्छन्ति बोद्धारः। एवं लोकयात्रां निर्वहति शब्दः। काव्यादर्शकारोऽपि शब्दं सर्वार्थप्रकाशकमाह। यथा-

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते[1]॥

अपि च वाक्यपदीये भर्तृहरिणा गद्यते। यथा–

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्[2]। इति

'अर्थः शम्भुः शिवा वाणी' इति आस्तिकैः विद्वद्भिः उद्घोष्यते। कविकुलगुरुकालिदासेनापि रघुवंशमहाकाव्ये शब्दाऽर्थयोः पार्वतीपरमेश्वर-सम्मितनित्यत्वैक्यम् ऊरीकृतम्। यथा-

वागर्थाविव सम्पृक्तौ वागर्थप्रतित्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ[3]॥ इति

एवमेव वायुपुराणेऽपि अशेषशब्दसमुदायस्य धारयित्री भगवती उमासमस्तार्थजातस्य च धारकः शिवइति निर्दिष्टम्। यथा-

शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा
अर्थरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः[4]॥

विष्णुपुराणेऽपि सकलवाङ्मयप्रलापशब्दराशियुतस्य भगवतो विष्णोरंशतया शब्द उपपादितः पुराणकारेण व्यासर्षिणा। यथा-

काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः[5]॥इति

**व्याकरणकोशादिशास्त्रानुरोधेन शब्दपदस्यनिष्पत्तिः निर्वचनञ्च-**

चुरादिगणपठितात्क्रियार्थकोपसर्गादाविष्कारार्थकात् शब्दधातुद्वयाद्भावे घञा प्रत्ययेनशब्दपदं निष्पद्यते।

---

1. काव्या,१.४
2. वाक्य १.१३
3. रघु. म. १.१
4. रघु.म.,सर्ग.१, पृ.२
5. सा.द.ल.,,प्र.प., पृ. ७

दिवादिगणस्थाद् उभयपदिनः आक्रोशार्थकशप्धातोः 'शाशपिभ्यां ददनौ[1]' इत्यौणादिकसूत्रात् दनिप्रत्यये पकारस्य बकारे सति शब्दपदमुपपद्यते।

**शब्दपदस्याभिधेयार्थः**

अर्थप्रतिपादनपरः वस्तुप्रत्याय्यनक्षमः, श्रोत्रग्राह्यगुणपदार्थविशेषः शब्दः इति।

**शब्दपदस्य व्युत्पत्त्यः**

शब्दयति स्मारयति बोधयति यद्वा शब्द्यते व्यज्यते इति शब्दः।

**शब्दपदस्य पर्यायवाचिनः**

शब्दपदस्य पर्यायत्वेन निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्हादः, नादः, निःस्वनः, आरवः, आरावः, संरावः, विरावः इत्येतानि पदानि अमरकोशे निर्दिष्टानि [2]। एवं संरवः, रावः इति शब्दचन्द्रिकायां निर्दिष्टम्[3]। घोषः इति जटाधरकोशग्रन्थे च उक्तम्[4]।

**कण्ठविवरादितः शब्दस्योत्पत्तिः**

भाषापरिच्छेदे कण्ठविवरादिप्रदेशात् शब्दस्य उत्पत्तिविषयिण्यः कारिका निर्दिष्टाः। यथा-

कण्ठसंयोगादिजन्या वर्णास्ते कादयोमताः
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते॥
उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता।
सोऽयं क इतिबुद्धिस्तु साजात्यमवलम्बते।
तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ॥[5] इति।

---

1. वैया.सि.उ., ४
2. भा.प.,(मदनमोहनझानिर्मितसंस्कृत-एप्स-अमरकोशः)
3. शब्द, (मदनमोहनझानिर्मितसंस्कृत-एप्स- अमरकोश-ऐप्सान्तर्गतशब्दचन्द्रिका
4. जटा.को., (मदनमोहनझानिर्मितसंस्कृत-एप्स- अमरकोशान्तर्गतजटाधरकोशः)
5. मदनमोहनझानिर्मितसंस्कृत-ऐप्स- शब्दकल्पद्रुमः,

**शब्दनिरूपणम्-**

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥

इति नभोवृत्तिराकाशसमवेतः। दूरस्थस्य शब्दस्य अग्रहणेनश्रोत्रोत्पन्न इत्युक्तम्। कण्ठसंयोगादिजन्या वर्णास्ते कादयो मता इत्युपन्यस्तम्। मृदङ्गाद्यवच्छेदेन उत्पन्नस्य शब्दस्य श्रोत्रे कथम् उत्पत्तिः इत्यतः आह - वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता इति। शब्दस्य श्रोत्रोत्पत्तिस्तु, वक्तृमुखात् निसृतस्य शब्दस्य दशदिगवच्छिन्नत्वात् आद्योत्पन्नात् शब्दात् अन्ये शब्दाः प्रतिध्वन्यमानाः आकर्णयितुः श्रवणविषयतां लभन्ते। कदम्ब-गोलकन्यायादुत्पत्तिः कस्यचिन्मते इति। नित्यस्य शब्दस्य कथमुत्पत्तिरित्याह। उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता इति।

शब्दानामुत्पत्तिविनाशप्रत्ययशालित्वात् अनित्यत्वमित्यर्थः। तथाहि-स एवायं ककार इतिप्रत्यभिज्ञानाच्छब्दानां कथं नित्यत्वम् इत्थञ्चोत्पत्ति-विनाशबुद्धिभ्रमरूपाशब्दा इत्यतआह - सोऽयं क इति वुद्धिस्तु साजात्य-मवलम्बत इति। तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् इति। तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयः।

**दशविधशब्दाः**

षड्जर्षभसगान्धारमध्यमः पञ्चमस्तथा।
अतः परन्तु विज्ञेयो निषादो धैवतस्तथा।
इष्टश्चानिष्टशब्दश्च संहतः प्रविभागवान्॥
इति आश्वमेधिकपर्वणि महर्षिव्यासेनोक्तम्।

**शब्दविशेषाणां नामविशेषाः**

शब्दस्योत्पादकभेदात् तन्नामान्यपि भिद्यन्ते। यथा-

शब्दो गुणानुरागोत्थः प्रणादः शीत्कृतं नृणाम्।
पर्द्दनं गुदजे शब्दे कर्द्दनं कुक्षिसम्भवे॥
क्ष्वेडा तु सिंहनादोऽथ क्रन्दनं सुभटध्वनिः।
कोलाहलःकलकलस्तुमुलो व्याकुलो रवः॥

मर्मरो वस्त्रपर्णादेर्भूषणानान्तु शिञ्जितम्।
हेषा ह्वेषा तुरङ्गाणां गजानां गर्ज्जबृंहिते॥
विस्फारो धनुषां हम्भारम्भे गोर्जलदस्य च।
स्तनितं गर्जितं गर्ज्जिः स्वनितं रसितादि च॥
कूजितं स्याद्विहङ्गानां तिरश्चां रुतवाशिते।
वृकस्य रेषणं रेवा बुक्कनं भषणं शुनः॥
पीडितानान्तु क्वणितं मणितं रतकूजितम्।
प्रक्काणः प्रक्कणस्तन्त्र्या मर्द्दलस्य तु गुन्दलः॥
क्षीजनन्तु कीचकानां भेर्यानादस्तु टट्टरः।
तारोऽत्युच्चैर्ध्वनिर्मन्द्रो गम्भीरो मधुरः कलः॥
काकली तुकलः सूक्ष्म एकतालो लयानुगः।
काकुर्ध्वनेर्विकारः स्यात् प्रतिश्रुतन्तु प्रतिध्वनिः॥

इति हेमचन्द्रकोशः[1]।

**शब्दस्य तात्त्विकस्वरूपम्**

उपर्युक्तरीत्या शब्दस्य व्यावहारिकजगति लौकिकस्वरूपं प्रतिपादितम्। अधुना तावत्तात्त्विकरूपेण शब्दस्वरूपविषयो विचार्यते।

बहुभिः विद्वद्भिः सर्वेषुदर्शनेषु, शास्त्रेषु च शब्दस्वरूपविषयः सम्प्रदायानुसारं स्वव्याख्यानैः गाम्भीर्येण व्यचार्यत। वेदपुरुषस्य मुखरूपस्य सर्वशास्त्रसम्मताग्रवर्तिनः व्याकरणशास्त्रस्याद्यशास्त्रतया शब्दविदः पाणिनि-प्रभृतयः शब्दस्य उत्पत्तित आरभ्य तन्नित्यतायां विचारमुपस्थापयामासुः। शब्दस्य उत्पत्तितः प्रतितिपर्यन्तनित्यत्वानित्यत्वपरोविचारः ग्रन्थान्तरेषूप-लभ्यते।

भारतीयदर्शनग्रन्थेषु शब्दतत्त्वविषये बहुविधं चिन्तनं वरीवर्ति। शब्दः नित्योऽनित्यो वेतिमतद्वयम्- प्रथमन्तावत् शब्दोऽनित्य इति पक्षपोषके न्यायवैशेषिके। शब्दः नित्य इति पक्षधरे व्याकरणमीमांसे, आलङ्कारिकास्तु

1. शब्दक, पृ.५/०२१

व्याकरणमतानुसारेण तत्पक्षमेव अवलम्बन्ते।

**श्रुतिप्रतिपादितशब्दतत्त्वम्**

भारतीयचिन्तनपरम्परायां भाषायाः महत्त्वपूर्णं स्थानं वरीवृत्यते। भारतीयवाङ्मये वैशद्येन शब्दविषयकं चिन्तनं व्याकरणन्यायमीमांसादिशास्त्रेषु विशेषतः प्राप्यते।

एतस्या विचारसरणेः पूर्वं वैदिकपरम्परायान्तु शब्दस्य आविर्भूतिः सृष्टेः प्रागमन्यत। एतदवलम्ब्य संस्कृतकाव्यशास्त्रेऽपि असौ विषयः विस्तरेण प्रतिपादितो वर्तते। कृत्स्नवैदिकसाहित्ये शब्द उत वाणी अपौरुषेयमिति स्वीकृतम्। भगवती श्रुतिरपिबृहदारण्यकोपनिषदि वाणीं परमं ब्रह्म सम्राड्[1] इत्यभणत्।

ऐतरेयब्राह्मणे `वाग्वै ब्रह्म च सुब्रह्म चेति[2] अचकथत्। वागिति सर्वेदेवाः इति जैमिनीयोपनिषद् उद्घोषितवती।

छान्दोग्योपनोषदि तु वाण्याः महिमा एवम् उक्तो वर्तते-

यद् वै वाङ् नाभविष्यत् न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत् सर्वं विज्ञापयति वाचमुपास्वेति[3]।

वैदिकवाङ्मये शब्दः ‘वाक्’ इति पदेन अभ्यधायि। ऋक्संहितायां वाचो महिमानं प्रतिपादयन्ति अनेकानि सूक्तानि प्राप्यन्ते। अथ च उत्तर-वैदिकवाङ्मयेऽपि वाक्सम्बद्धानि अनेकानि आख्यानानि लभ्यन्ते। यैः वाचः विविधाः स्तराः निरदिश्यन्त। ऋक्संहितायांवाग्विषयकाणि त्रीणि सूक्तानि परमर्षिभिःसाक्षात्कृतानि। तान्येव अत्र शब्दस्वरूपविषयतया चितानि सन्ति। प्रथममण्डलस्थं चतुष्षष्ट्युत्तरैकशततमसूक्तम् (१६४)। दशममण्डलस्थम् एकसप्ततितमसूक्तम् (७१)। दशममण्डलस्थं पञ्चविंशत्यधिकैकशततमसूक्तम्

---

1. बृहद.४.२, सर्वाणि च भूतानि वाचैव सम्राट् प्रजायन्ते। वाग्वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति॥
2. ऐतरे., ६/३
3. छान्द., ७.२.१

(१२५) इति। इमानि सूक्तानि क्रमशः – अस्यवामीयसूक्तम्, बृहस्पतिसूक्तम्, वाक्सूक्तञ्चेति नाम्नाभिधीयते। एतत्प्रमुखसूक्तान्यतिरिच्य तत्रैव तन्महत्त्वोद्घाट-कान्यन्यसूक्तान्यपि उपात्तानि सन्ति।

ऋग्वेदीयवामीयसूक्तस्य केचन मन्त्रा वाक्तत्त्वं निरूपयन्ति। सूक्तस्यास्य चतुर्विंशे मन्त्रे स्पष्टतया उक्तं यत् देवताः विविधच्छन्दोमय्याः वाण्याः प्रतिरचनाः व्यदधुः। यथा-

गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्तवाणीः[1]॥

पञ्चत्रिंशत्तमे मन्त्रे इदमिङ्गितम् यत् अस्याः वेदरूपवाण्याः अनन्ताकाशमन्त्रस्य पाठकः विप्रोऽस्ति, मन्त्रप्रयोगस्थानमेव भुवनस्य नाभिः वर्तते इति। यथा- इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः[2]

एकचत्वारिंशत्तमे मन्त्रे गौरवर्णीया सहस्राक्षरा वाणी आद्यसृष्टिपरतया जलं ससर्ज। यथा-

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी साचतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥[3]

एतत्सूक्तानुसारेण वाक् चतुर्धा वर्तते। यां चिरन्तना ऋषय एव जानन्ति। आद्याः तिस्रस्तु अव्यक्ताः सन्ति किन्तु चतुर्थीवाक् व्यक्ता वर्तते। तामेव मनुष्या व्यवहरन्ति।
यथा-

चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥[4]

---

1. ऋक्.१.१६४.२४
2. तत्रैव १.१६४.३५
3. तत्रैव १.१६४.४१
4. ऋक्.१.१६४.४५

एकस्मिन्मन्त्रे सरस्वत्या आह्वानं कुर्वन्तः ऋषयः ख्यान्ति यत् तव (वाग्देव्याः) स्तन्यादेव निखिलंविश्वं पुष्णाति। तत्पानञ्च श्रेयस्करं विद्यतेतत् नानाविधरत्नानां गुणाधायकं वर्तते। तस्मात् अस्मान् आप्यायितान् कुरु[1]॥

एवं वयं पश्यामो यत् अस्यवामीये सूक्ते मन्त्रोच्चारयितारंपरमव्योम्नि प्रतिष्ठाप्य वाचो महिमा अगीयत।

ऋग्वेदस्य वाक्सम्बद्धं द्वितीयं महत्त्वपूर्णं सूक्तमस्तिदशममण्डलस्य एकसप्ततितमम्। इदमेव वाचस्पतिसूक्तबार्हस्पत्यसूक्तनाम्नापि व्यपदिश्यते। इदं नानाविधदृष्टिविचाराणां स्थानं धत्ते। वैयाकरणाः स्वग्रन्थेष्वस्य द्वौ मन्त्रौ बहुधा उदाहरन्। अन्यच्च सूक्तेऽस्मिन् परिशुद्धवाचः महत्त्वेन सहैव समर्थवाचः अर्थगाम्भीर्येण वाचो पर्यालोचनेन चोत्तरोत्तरं ज्ञानगाम्भीर्यस्य सिद्धिः दर्शिता। सूक्तस्य द्वितीये मन्त्रे छन्दोमय्याः वाण्याः परिशुद्धतायाम् अभ्युदयशक्तिराहिता यत् शक्तिः मनुष्ये मानुष्यंसंयुनक्ति[2]। अस्य सूक्तस्य तृतीयमन्त्रानुसारं ऋषीणां मनोगतवाणीं यज्ञव्यापारः बहिः प्राकाशयत्। तस्याः अनुगन्तारः तस्या विविधरूपान्तरम् अकार्षुः। तत्स्तुतौ एव निरन्तरं सप्तप्रकाराः पक्षिणः मानुषवाण्यां शब्दायन्ते[3]। अस्य सूक्तस्य चतुर्थमन्त्रे वाण्यामन्तर्निहित-सौन्दर्यमुपपादयन्ती श्रुतिः कथयति – 'कश्चन पश्यन्नपि तां न पश्यति, शृण्वन्नपितां न शृणोति'। यथा सुवासा जाया स्वाभिमुखिनं भर्तारं स्वकीयं सम्पूर्णं रूपमाविष्करोति। तथा वाण्यपि यस्य सम्मुखे स्वीयं रूपं स्वतः उद्घाटयति, स एव तदन्तर्निहितसौन्दर्यं ज्ञातुं पारयति[4]। अस्यैव सूक्तस्य अन्यमन्त्रे कथितम् - यः शब्दस्य अर्थस्य सम्बन्धं सम्यक्तया जानाति स एव वेदभगवतः गूढार्थं ज्ञातुं क्षमते। यश्च तस्मै अयं ज्ञानराशिः चेतनगौः मायामयी

1. तत्रैव१.१६४.४९
2. तत्रैव १०.७१.२
3. ऋक्.,१०.७१.३
4. तत्रैव १०.७१.४

गौर्जायते। यासकाशे स्थापयितुं तु योग्या किन्तु पयोदोहने तु अशक्या[1]।

ऋग्वेदस्य दशममण्डलस्य पञ्चविंशत्यधिकैकशततमे वाक्सूक्ते वाक् प्रेरिकाशक्तिपरतया सृष्टिशक्तिपरतया पालिकाशक्तिपरतया संहारिकाशक्ति-परतया च दृष्टा वर्तते। अस्य सूक्तस्य अन्तिमे मन्त्रे वाग्देवी कथयति। तद्यथा-

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यै तावती महिना सं बभूव[2] ॥

अहं समस्तभुवनानि सृष्ट्वा प्राणवायुरिव वहामि। मम महिमा आकाशं पृथिवीञ्च अतिक्रामति[3] इति।

यजुर्वेदे वाक्तत्त्वेन विश्वकर्मणः ऋषेः अभिधानमस्ति[4]। शतपथ-ब्राह्मणग्रन्थे अस्यव्याख्या लभ्यते यत् वाक्तत्त्वेनैव इदं सर्वं कृतं वर्तते इति। अर्थात्, वाक्तत्त्वनैव समस्तसंसारस्य सृष्टिर्जाता।

ब्राह्मणग्रन्थेषु वाक्तत्त्वं ब्रह्म इत्यर्थे अनेकविधा व्याख्या उपलभ्यते। शतपथब्राह्मणानुसारं **वाग्वै ब्रह्म** इति[5]। तैत्तरीयब्राह्मणस्य कथनं वर्तते यत् ब्रह्म[6] एव वाक्तत्त्वस्य परमात्मतत्त्वं विद्यते। गोपथब्राह्मणग्रन्थोऽपि वाक्तत्त्वस्य ब्रह्मत्वं[7] प्रत्यपीपदत्।

उपनिषद्ग्रन्थेषु वाक्तत्त्वस्य स्वरूपं व्यापकतया वर्णितमस्ति। श्वेताश्वतरोपनिषदि सृष्टौ द्वे अक्षरे[8] स्तः। ते ब्रह्मपरे अनन्तेच स्तः। ययोः विद्याविद्ये उभे निहिते। क्षरम् अविद्यापरकम् अक्षरं च विद्यापरकम् इति। यत् द्वौ

---

1. तत्रैव १०.७१.५
2. त्रैव. १०/१२५.०८
3. तत्रैव. १०.१२५.८
4. तत्रैव, १३.५८
5. शत., २.१.४.१०
6. तै.ब्रा., ३.९.५.५.
7. गो. ब्रा, ५.२.१
8. श्वेत.उप., ५.१

अंशौ बध्नाति सा वाक्तदेव तस्य वाक्तत्त्वमस्ति।

**व्याकरणशास्त्रप्रतिपादितशब्दतत्त्वम्**

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागपूर्वकम् असाधुशब्देभ्यो विविच्य साधुशब्दा बोध्यन्ते अनेनेति व्याकरणम्। वि+आङ्+उपसर्गपूर्वकं करणार्थककरोतेः "करणाधिकरणयोश्च[1]" इति पाणिनीयोपदेशेन करणार्थे ल्युटिव्याकरणशब्दो निष्पद्यते। साधुशब्दज्ञानविधायिशास्त्रं व्याकरणमिति फलितम्। भगवती श्रुतिरप्याह – 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इति। व्याकरणज्ञानमन्तरेण साधुशब्दान् व्यवहर्तुं न हि शक्नोति जन इति निश्चयः। अतस्सर्वासां विद्यानां निकषायमाणा विद्येयं व्याकरणम्। शास्त्रेऽस्मिन् शब्दः स्फोटरूपः स्वीकृतो वर्तते, तस्य दार्शनिकदृष्ट्या विचारस्तु भर्तृहरिनागेशप्रभृतिभिः शाब्दिकैः अकारि। शब्दःस्फोटः ब्रह्मसम्मितः नित्यः अर्थविवृतः चेति। स्फोटरूपस्य शब्दस्य विचारः प्राधान्येन अष्टाध्यायी-महाभाष्यवाक्यपदीयादिग्रन्थेषु लभ्यते। किन्तु परवर्तिग्रन्थेषु मञ्जूषादिषु तत एव आनीत इति परिलक्ष्यते। प्रथमं स्फोटशब्दस्य चर्चा आचार्यस्फोटायनेन अभ्यधायि। यथा पाणिनीयाष्टाध्याय्याम् **अवङ् स्फोटायनस्य[2]** इति सूत्रव्याख्याने स्फोटः अयनंमार्गोयस्य सः स्फोटायन इत्यर्थेन[3], स्फोटशब्द-प्रतिपादनपरः स्फोटायन नामा कश्चिद् आचार्यः सर्वादौ शब्दस्य स्फोटस्वरूपं प्रास्तावीत्।

**स्फोटस्वरूपम्**

स्फोटरूपः शब्दः जगतः सर्वज्ञानराशेः मूलम्, शब्दरूपब्रह्मणः एव जगत्सृष्टिः इति शाब्दिकानां सिद्धान्तः। तद्दिशति भगवान्भर्तृहरिः-

---

1. अष्टा., ३.३.११७
2. अष्टा.,६.१.१२३
3. मध्यसि., अर्कनाथचौधरीकृतटीकागता भूमिका

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः[1]।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत॥
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते[2]॥

वैयाकरणाः वृत्तिविशिष्टज्ञानाधीनं शाब्दबोधं स्वीकुर्वन्ति। तत एव पदवाक्यानां बोधोपपत्तये प्रकृतिप्रत्ययेषु तत्तदर्थबोधकत्वशक्तिप्रतिपादकं वृत्त्याश्रयं शब्दम् आमनन्ति। वर्णाश्रितं पदं तदाश्रितञ्च वाक्यमिति। आशुविनाशिनां द्विक्षणस्थायिनां क्रमिकाणां वर्णानां मेलनाभावादानुपूर्व्याः प्रतीतेरभावात्। ततः पूर्वपूर्ववर्णानुभवजनितसंस्कार-सहितान्तिमवर्णानुभवेन स्फोटो व्यज्यते, स एव अभिधादिवृत्त्याश्रयः।

'श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः[3]' इति स्फुटति अर्थः यस्मात् अथवा स्फुट्यते अभिव्यज्यते वर्णैर्यः स इति उभाभ्यां व्युत्पत्तिभ्यां ध्वनिव्यङ्ग्यत्वे सत्यर्थप्रकाशकत्वमेव स्फोटत्वम्।

वैयाकरणानामिदं तात्पर्यं यत् चतुर्विधा वाग्भवति- परा, पश्यन्ती, मध्यमा, वैखरी च। तत्रपरा मूलस्थपवनसंस्काररूपमूलाधारस्था शब्दब्रह्म-स्वरूपिणी। पश्यन्ती च नाभिपर्यन्तमागच्छता वायुना अभिव्यक्ता मनोगोचरीकृता इत्युभे वाचौ एव योगिध्यानविषये। मध्यमावाक् तु हृदयपर्यन्तम् आगच्छतावायुना अभिव्यक्ता वाचकशब्दस्फोटरूपा श्रोत्रग्रहणा-योग्यत्वेन सूक्ष्मा जपादिविषयरूपावैखरीवाक्- आस्यपर्यन्तमागच्छता वायुनोर्ध्वं नीयमाना मूर्धानमाहत्य श्रोत्रे व्यवहारगम्या भवतीति। यथोक्तं मञ्जूषायाम्-

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥

---

1. वाक्य. ब्र., १२०
2. तत्रैव, १२३
3. महा.आ.२., १.१.

वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटकव्यञ्जक उच्यते[1]॥इति।

मध्यमाजन्यनादः अर्थवाचक-स्फोटात्मकशब्दव्यञ्जकः, वैखरीनादस्तुस्फोटरूपशब्दव्यङ्ग्यस्य व्यञ्जने ध्वनिस्सन् सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिवद् निरर्थकः। तादृक् मध्यमनादव्यङ्ग्यः शब्दः स्फोटाख्यः ब्रह्मस्वरूपो नित्यश्च इति। तदेव वाक्यपदीये अभिहितम्। यथा-

अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[2] ॥ इति।

स्फोटरूपः शब्दः एकः नित्यः अखण्डः तथापियथा मुखे दर्पणकृपाणादिव्यञ्जकोपाधीनां कारणेन दैर्घ्यवर्तुलत्वादिकमवास्तविकमिव अवभासते। तथैव घटपटादिपदध्वनिरूपव्यञ्जकव्यङ्ग्यत्वेन स्फोटेऽपि घटपटत्वादिकं प्रतिबिम्ब्यते इति। वर्णपदादीनां व्यञ्जकध्वनीनामानन्त्यवशात् स्फोटेऽपि आनन्त्यं भवति। तदुक्तम्। यथा-

यथा मणिकृपाणादौ रूपमेकमनेकधा।
तथैव ध्वनिषु स्फोटः एक एव विभज्यते॥ इति।

को नाम शब्दः इति सत्यां जिज्ञासायां भगवान् पतञ्जलिः महाभाष्यस्य पस्पशाह्निके शब्दार्थसम्बन्धनामके प्रकरणे नानाभिः युक्त्युपयुक्तिभिः शब्दं निरूपयति। सास्नालाङ्गूलककुद-खुरविषाणार्थसम्प्रत्ययो भवति स शब्दः अथवा प्रतीतपदार्थको लोके ध्वनिः[3] स शब्दः इति।

यथा गौरिति एतच्छब्दोच्चारिते सतिन सास्ना-लाङ्गूल-ककुद-खुर-विषाणपदार्थानां ज्ञानं भवति, स शब्दः, ज्ञातपदार्थस्य निमित्तभूतः यः ध्वनिः स शब्दः। यथा ध्वनयन्तं बालं प्रति कथ्यते शब्दं कुरु अथवा मा शब्दं कुरु इति। लोकव्यवहारात् सोऽपि शब्दः।

---

1. परम्. स्फो.नि.
2. वाक्य.ब्र., १
3. महा., आ. १,१.१.

पतञ्जलिमुनिमते द्वौ शब्दौ स्तः- १- स्फोटः २- ध्वनिः (पक्ष्यादि-कलरवविशेषः) शब्दविचारः तत्तद्ग्रन्थेषु महद्भूमिकः गभीरो वरीवृत्यते। अतस्तान्ग्रन्थान् विशेषबुद्ध्या परिशील्य सारतया मया अत्र प्रकृतोपयोगाय व्यलेखि।

कैयटनागेशौ मुनेः अभिप्रायं स्पष्टयन्तौलिखतः यत् सा सत्ताशब्दपदेन कथ्यते येन च अर्थावबोधो जायते, सा सत्ता स्फोटो विद्यते।

स्फोटरूपश्शब्दो नित्यो ध्वनिभिश्चाभिव्यक्तो भवति। पदस्फोटं वाक्यस्फोटकं च वैयाकरणा वाचकौ मन्वते। स्फोटात्मकशब्दस्य सविस्तरं व्याख्या भर्तृहरिणा वाक्यपदीये अक्रियत। भगवान् पतञ्जलिः स्फोटं व्यतिरिच्य ध्वनिमपि शब्दतया मेने। लेके येन ध्वनिना अर्थावबोधो जायते, स शब्द उच्यते-'प्रतीतपदार्थको ध्वनिः'[1] इति अतः ध्वनिः शब्दः अभ्युपायि। कैयटनागेशमते पतञ्जलिमुनिः स्फोटं ध्वनिं चशब्दं पार्थक्येन स्वीकरोति। तथापि द्वयोः शब्दकथनात् द्रव्य-गुण-क्रियादिभ्यः शब्दव्यतिरिक्तत्वं सिद्धान्तः। शब्दः तस्माद्भिन्नः, सः शास्त्रीयदृशा स्फोटः लौकिकदृशा च ध्वनिः व्यपदिश्यते। पतञ्जलिमुनेः शब्दस्वरूपविषयकविचारं संक्षेपेण अधिगच्छामश्चेत्, मुनिमते शब्दः द्विविधः उपादत्तः, एकः स्फोटरूपः अपरश्चध्वनिरूपः। इह स्फोटशब्दः नित्यः व्यङ्ग्यः। ध्वनिरूपः अनित्यः स्फोटस्य व्यञ्जकश्च। स्फोटध्वनयोर्मध्येध्वनावेव अल्पता महत्ता च भवति। मनुष्येषु स्फोटध्वन्योः द्वयोऽरपि ग्रहणं भवति। पशुपक्षिप्रभृतिषु केवलं ध्वनेर्ग्रहणं भवति। एवं रीत्या वैयाकरणानां यः शब्दब्रह्मविषयकविचारः प्रकटितः स वेदोपनिषत्सु पुष्पितः पल्लवितश्च वर्तते। अस्मिन्विचारे भर्तृहरिभट्टोजिदीक्षितनागेशादीनां मतं प्रमुखं वर्तते।

**मीमांसाशास्त्रप्रतिपादितशब्दतत्त्वम्**

भाट्टमीमांसकमते शब्दो द्रव्यम्[2] स हि नित्यः पदार्थः। वर्णात्मकः

---

1. महा, आ. १/१.१.१. पृ.१९
2. न्या. लीला., गुणप्रकरणम्

पदत्वेन वाक्यत्वेन वा वर्णानामेव व्यवहारः। परं वाक्यं तु व्यवहारदशायाम् अवभासमात्रं वस्तुतः तयोः विशिष्टं रूपम्। यथा-

विच्छिन्नयत्नव्यङ्ग्यैश्च नित्यैः सर्वगतैरपि।
व्यतिरिक्तपदारम्भो वर्णैः नात्रोपपद्यते ॥
यावन्तो यादृशा ये च यदर्थं प्रतिपादने।
वर्णाःप्रज्ञातसामर्थ्यास्ते तथैवार्थबोधकाः॥[2]

वर्णसङ्घातरूपे पदे पदसङ्घातरूपे वाक्ये चादिमूलं वर्ण एव गृह्यते पदाश्रयत्वात् वाक्यमपि पदरूपत्वाच्च। आर्कः अश्वः अग्निः इत्यादिषु विभिन्नेषु पदेषु एकप्रतीकात्मकस्य अकारस्य श्रवणेन स एवायमकार इति प्रत्यभिज्ञाबलेन वर्णानामनित्यत्वमक्षतमेव। वर्णनित्यतावादिमतं वर्णयता भर्तृहरिणाप्युच्यते। यथा-

पदभेदेऽपि वर्णानामेकत्वं न निवर्तते।
वाक्येषु पदमेकञ्च भिन्नेष्वप्युपलभ्यते॥
न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं नकिञ्चन[1]॥

इत्यमेव पक्ष एकाकारस्य अकारवर्णस्य श्रवणसिद्धौ। वार्त्तिककारमते यः स्वीकृतः शब्दः सध्वनिना अभिव्यज्यते साक्षादिन्द्रियसम्बन्धेन प्रतीय-मानत्वात्। 'शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वाद् घटवदिति' इतिभाट्ट-मीमांसका आहुः-

कथं शब्दो द्रव्यमिति?, प्रतिपाद्यते अनुमानप्रमाणेन, शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वाद् घटवदिति, श्रोत्रञ्च द्रव्यग्राहकं निरवय-वेन्द्रियत्वान्मनोवत् नित्यत्वात्द्रव्यत्वात् प्रत्यभिज्ञानाच्च शब्दो द्रव्यम् इति। शबरस्वामी मीमांसाभाष्ये भगवतः उपर्षस्य उल्लेखं विदधत् ध्वनिरूपं शब्दं प्रमाणयति। यथा- अथ गौरित्यत्र कः शब्दः? गकारौकारविसर्जनीया इति

1. वाक्य.१.७०-७१

भगवानुपवर्षः[1] भगवान् शङ्कराचार्योऽपि ब्रह्मसूत्रे पदविचारावसरे कथयति- वर्णा एव तु शब्द इति भगवानुपवर्षः[2]। गौरित्यत्र गकारौकारविसर्जनीयाः वर्णरूपाः शब्दत्वेन ग्राह्या भवन्तीति शालिकनाथमिश्रेण प्रकरणपञ्चिकायां भणितम्यथा–'कः शब्दोऽभिमतः वर्णाः तेषामेव श्रोत्रग्राह्यत्वात् श्रोत्रग्राह्ये हि वस्तुनि शब्दपदं वर्तते[3] तत्र वर्णेषुन क्रमोऽक्रमिकत्वात्। क्रमस्तु देशनिबन्धनः कालनिबन्धनो वा भवति'। उभयविधोऽपि क्रमो वर्णेषु नास्पदं लभते। तेषां वर्णानां बुद्धिः क्रमवती तदनुरोधेनैव वर्णा अपि क्रमवन्त इति प्रत्येकं श्रवणेष्ववभासते। वस्तुतस्ते सर्वगतत्वात् नित्यत्वाच्चाक्रमा एव। प्राभाकरैस्तु ध्वन्यात्मको वर्णात्मकश्च शब्दो मन्यते। ध्वन्यात्मको नित्यो वर्णात्मकश्चानित्य इति।

**आचार्यमण्डनमिश्रेण** स्फोटसिद्धौ अर्थावसायोत्पत्तिहेतुकः शब्द इति स्वीकृतम्। तत्र वर्णा एव निमित्ता अर्थबोधकत्वात् तदुक्तं कारिकायां वृत्तौ च

अर्थावसायप्रसवनिमित्तं शब्द इष्यते।
तदेतत् प्रक्रियाभेदं भाष्यकृत् प्रत्यपीपदत्[4]॥

लोके च श्रोत्रेन्द्रियविज्ञेयमात्रानुपातिनी शब्दप्रवृत्तिः, अतः श्रवण-ग्रहणतैव शब्दलक्षणमुचितम्, वर्णा एव पदं शब्दलक्षणमनुपतन्तत्वभि-धेयधीहेतुभावमनुपयन्तोऽपि लोके प्रसिद्धास्त एव शब्दा इति[5]।

यद्यपि पदानां वाक्यानामपि वा अर्थज्ञाने हेतुत्वं कल्प्यते लौकिकैः श्रोत्रग्राह्यत्वात्। तथापि वर्णव्यतिरिक्तं पदं तद्यतिरिक्तं वाक्यं वा न भवतीति मीमांसकानामभिमतः सिद्धान्तः। तदुक्तम्-

---

1. मी.शा.भा. पृ.३५
2. ब्र.सू.,१.३.२८
3. प्र.पं., पञ्चमप्रकरण
4. स्फो.सि. का. ३
5. तत्रैव

वर्णातिरिक्तः प्रतिषिध्यमानः पदेषु मन्दं फलमादधाति।
कार्याणि वाक्यावयवाश्रयाणि सत्यानि कर्तुं कृत एष यत्नः[1]॥ इति।

**न्यायशास्त्रप्रतिपादितशब्दतत्त्वम्**

प्रमाणैरर्थपरीक्षणम् इति न्यायरीत्या तार्किकाः यथार्थप्रमितिहेतुतया तत्र चत्वारि प्रमाणानि आमनन्ति। प्रमाणप्रमेयसंशयप्रयोजनादिषोडश-पदार्थान्यतमः आद्यः प्रमाणपदार्थो भवति। शब्दजन्या प्रमितिः शाब्दबोध इत्युक्त्या तस्य हेतुत्वेन शब्दः प्रमाणम्इति स्वीक्रियते। न्यायशास्त्रसहित-तद्व्याख्यानग्रन्थेषु न्यायमञ्जर्यादिषु शब्दस्वरूपविचारः अक्रियत। न्यायसूत्रे महर्षिगौतममतानुसारम् इत्थं शब्दलक्षणं विद्यते-'आप्तोपदेशः शब्दः[2]'इत्यत्र शब्दः लक्ष्यदलम् 'आप्तोपदेशः' लक्षणदलम् इति।

उपदिश्यते अनेन इति उपदेशः इति व्युत्पत्तिलभ्यार्थो भवति वाक्यज्ञानम् अर्थज्ञानं वेति। आकाङ्क्षायोग्यतासत्तिमत् पदकदम्बकं वाक्यम्, तस्य ज्ञानमित्यर्थः। तत्रज्ञायमानं वाक्यं प्रमाणम्, वाक्यार्थज्ञानं फलम्, पदार्थस्मृत्यादिस्तु आन्तरालिकव्यापारः इति। वाक्यार्थज्ञानं प्रमाणम् इति मते तु हानादिबुद्धिः फलम्। उपदेशशब्दस्य पर्ययत्वेन विधिः,उपदेशः, प्रवर्तनम् इति स्वीक्रियते। तथापि अप्रवर्तकभूतार्थपरस्य उपनिषदादिवाक्यस्य व्यापकत्वात् तत्र अव्याप्तिवारणाय लक्षणे उपदेशशब्दविन्यासेन उत्कृष्टप्रयोजनशालि वचः इत्यभीष्टम्। यथा 'सदेव सोम्येदमग्र आसीत्' इत्युपनिषदादिवाक्यं न पुरुषप्रवर्तकं न च पुरुषनिवर्तकं भवति। किन्तु पुरुषस्य श्रेयोऽभिधानात् उपदेशशब्देन तद्वाक्यं समगृह्यत। चैत्यं वन्देत इत्यादिलौकिकवाक्येषु अतिव्याप्तिनिरासायतेषामप्युक्तोपदेशरूपत्वात्लक्षणे आप्त इति पदनिवेशो व्यधायि। अतः न्यायभाष्ये सूत्रस्य व्याख्या एवं कृता - आप्तानाम् ऋष्यार्यम्लेच्छानाम्, उपदेशः शब्दः, न तु अनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनां वेदप्रमाणविरुद्ध-क्षणिकनैरात्म्यादिवादिनामिति। 'तथा च

---

1. श्लोक, २३७, स्फोटवादे
2. न्या.सू. १.१.७.

भाष्यम्[1]’। न्यायवार्त्तिककारेणापि अगद्यत – ‘आप्तोपदेशः शब्दः, न शब्दमात्रमिति सूत्रार्थः’ इति[2]। सूत्रस्थस्य आप्तपदस्य एवं भाष्यं करोतिवात्स्यायनमुनिः-

‘आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः’। सुदृढेन प्रमाणेनावधारिताः साक्षात्कृताः धर्माः हिताहितप्राप्तिपरिहारप्रयोजनाः पदार्थाः, येन स तथोक्तः आप्तः। आप्तपदस्य ऋष्यार्यम्लेच्छादिरूपार्थस्य व्याख्यामेवं विदधाति-तात्पर्यटीकाकारः - दर्शनात् ऋषिः, करतलामलकफलवत् साक्षात्कृतत्रैकालवर्तिसकलप्रमेयः इति। आरात् दूरात् यातः पातकेभयः इति आर्यः, मध्यमलोकः इति। म्लेच्छःप्रसिद्धः। म्लेच्छा अपि हि परिपथ-मवस्थिताः पान्थानामहृतसर्वस्वानां मार्गाख्याने हेतुदर्शशून्याः भवन्त्याप्ताः[3]।

**न्यायमञ्जरीप्रोक्तं शब्दलक्षणम्[4]**

जयन्तभट्टमते ‘आप्तोपदेश: शब्द’ इति शब्दलक्षणम्। ‘उपदेश: शब्द:’ इत्युक्ते उच्चारणमात्रग्रहणेन कारकभिन्ने बोधस्य अजनके इत्यर्थे सति, शब्दमात्रे प्रामाण्यप्रसङ्ग इति तन्निरासार्थं उपदेशपदेन साध्यसाधन-पदमध्याहरणीयम् ‘साध्यसाधनम्’ इत्यस्य करणम् इत्यर्थेन अकारके शब्दे अतिव्याप्तिप्रसङ्गो अपगतो भवति। तदुपादानेऽपि वीचितरङ्गन्यायेन शब्दान्तरजनके पूर्वशब्देऽतिव्याप्तितया प्रत्यक्षसूत्रात् ज्ञानपदस्य, स्मृति-जनकेऽतिप्रसङ्गनिराकरणाय अनधिगतार्थपरस्य-अर्थशब्दस्य, अर्थग्रहणस्य, संशयविपर्ययजनकनिराकरणाय च व्यवसायात्मकाव्यभिचारिपदयोरनुवृत्तिः इत्येवम् “अव्यभिचारि-व्यवसायात्मकम् अर्थविषयकं च ज्ञानं यतः भवति, स उपदेशः शब्दः” अनेन प्रकारेण् मञ्जरीकारेण सूत्रकारोक्तं शब्दलक्षणसूत्रम्

---

1. न्या. भा.,१.१.७, पृ. ३६५.
2. न्या. वा.,१.१.७, पृ. ३६५
3. ता.टी. १.१.७.,पृ.३६८
4. न्या. मं., आ.३ भा.१, पृ. ३९६

इतोपि विशदतया व्याख्यातम्।

**तर्कभाषायां शब्दलक्षणम्**[1]

आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतार्थस्योपदेष्टा पुरुषः। वाक्यं तु आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः। अतो 'गौरश्वः पुरुषो हस्ती' इति पदानि न वाक्यम्, परस्परमाकाङ्क्षाविरहात्। 'अग्निना सिञ्चेत्' इत्यपि न वाक्यम्, योग्यताविरहात्। न ह्यग्निसेकयोः परस्परमन्वययोग्यतास्ति। तथा हि- 'अग्निना' इति तृतीयया सेकरूपं कार्यं प्रति करणत्वमग्नेः प्रतिपादितत्त्वात् न चाग्निः सेके करणं भवितुं योग्यः। तेन कार्यकारणभावलक्षणसम्बन्धेऽग्नि-सेकयोरयोग्यत्वात्। अतः 'अग्निना सिञ्चेत्' इति न वाक्यम्। एवमेकैकशः प्रहरे प्रहरेऽसहोच्चारितानि "गामानय" इत्यादिपदानि अपि न वाक्यम्। सत्यामपि परस्पराकाङ्क्षायां, सत्यामपि परस्परान्वययोग्यतायां परस्पर-सान्निध्याभावात्। यानि तु आकाङ्क्षायुतानि योग्यतावन्ति सन्निधिसहितानि पदानि तान्येव वाक्यम्। यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि। यथा च 'नदीतीरे पञ्च फलानि सन्ति' इति। यथा च तान्येव 'गामानय' इत्यादिपदानि अविलम्बितोच्चारितानि। नन्वत्रापि न पदानि साकाङ्क्षाणि, किं तु अर्थाः फलादीनामाधेयानां तीराद्याधाराकाङ्क्षितत्वात्। न च विचार्यमाणेऽर्था अपि साकाङ्क्षाः। आकाङ्क्षाया इच्छात्मकत्वेन चेतनधर्मत्वात्।

सत्यम्, अर्थास्तावत् स्वपदश्रवणसमनन्तरमेव श्रोतरि अन्योन्य-विषयाकाङ्क्षाजनकतया साकाङ्क्षा इत्युच्यन्ते। तद्द्वारेण तत्प्रतिपादकानि पदान्यपि साकाङ्क्षाणीत्युपचर्यन्ते। यद्वा पदान्येवार्थान् प्रतिपाद्य अर्थान्तर-विषयाकाङ्क्षाजनकानीत्युपचारात् साकाङ्क्षाणि। एवमर्थाः साकाङ्क्षाः परस्परान्वययोग्याः तद्द्वारेण पदान्यपि परस्परान्वययोग्यानीत्युच्यन्ते। सन्निहितत्वं तु पदानामेकेनैव पुंसा अविलम्बेनोच्चरितत्वम्। तच्च साक्षादेव पदेषु संभवति न अर्थद्वारा।

---

1. तर्क, विश्वेशवरी, पृ. ४७

तेनायमर्थः सम्पन्नः - अर्थप्रतिपादनद्वारा श्रोतुः पदान्तरविषयाम् अर्थान्तरविषयां वा आकाङ्क्षां जनयतां प्रतीयमानपरस्परान्वययोग्यार्थ-प्रतिपादकानां सन्निहितानां पदानां समूहो वाक्यम्।

पदं तु वर्णसमूहः। समूहश्चात्र एकज्ञानविषयीभावः। एवं च वर्णानां क्रमवताम् आशुतरविनाशित्वेन एकदा अनेकवर्णानुभवासंभवात् पूर्वपूर्व-वर्णाननुभूय अन्त्यवर्णश्रवणकाले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतान्ति-मवर्णानुभवेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेण एकदैव सदसदनेक-वर्णनिश्चयात्मिका पदप्रतीतिर्जन्यते, सहकारिदार्ढ्यात्, प्रत्यभिज्ञानवत्। प्रत्यभिज्ञानप्रत्यक्षे ह्यतीतापि पूर्वावस्था स्फुरत्येव। ततः पूर्वपूर्वपदानुभव-जनितसंस्कारसहकृतेन अन्त्यपदविषयेण श्रोत्रेन्द्रियेण पदार्थप्रत्ययानुगृहीतेन अनेकपदावगाहिनी वाक्यप्रतीतिः क्रियते।

तदिदं वाक्यमाप्तपुरुषेण प्रयुक्तं सत् शब्दनामकं प्रमाणम्। फलं त्वस्य वाक्यार्थज्ञानम्। तच्च एतच्छब्दलक्षणं प्रमाणं लोके वेदे च समानम्। लोके त्वयं विशेषः यः कश्चिदेवाप्तो भवति, न सर्वः। अतः किञ्चिदेव लौकिकं वाक्यं प्रमाणम्, यत् आप्तवक्तृकम्। वेदे तु परमाप्तश्रीमहेश्वरेण कृतं सर्वमेव वाक्यं प्रमाणं सर्वस्यैवाप्तवाक्यत्वात्।

**तर्कसङ्ग्रह-तद्व्याख्यानेषुशब्दलक्षणम्तर्कसङ्ग्रहे**[1] तु- 'आप्त-वाक्यं शब्दः' इत्युक्तम्। आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम् इत्युक्तम्।

**तर्कसङ्ग्रहव्याख्यायां**[2] वाक्यवृत्तौ शब्दः इत्थं निरूपितः - यथार्थवक्तेतिनाम प्रकृतवाक्यार्थविषयकयथार्थशाब्दबोधविषयकतात्पर्यवा-नित्यर्थः।

**तर्कसङ्ग्रहदीपिका**[3]व्याख्यायां नीलकण्ठप्रकाशिकायां शब्दस्य

---

1. त. स. शब्दपरिच्छेद, पृ. ६५
2. वाक्यवृत्तिः, शब्दपरिच्छेदः, पृ.६५
3. नीलकण्ठप्रकाशिका,शब्दखण्डः,पृ.३१३

लक्षणमेवम् उक्तमस्ति- आप्तवाक्यं शब्दः इति। शब्द इति लक्ष्यनिर्देशः। प्रमाणशब्द इति तदर्थः।

**शब्दशक्तिप्रकाशिकादिशाशब्दलक्षणम्**[1]

जगदीशतर्कालङ्कारैःशब्दशक्तिप्रकाशिकायां मङ्गलश्लोकव्याजेन शब्दप्रमाणलक्षणम् इत्थं दत्तं यत् -

अनुभवहेतुः सकलेसद्यः समुपासिता मनुजे।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी ॥

अनुभवोत्पादकं साकाङ्क्षम् आसत्तियुक्तं योग्यतावत्पदसमूहात्मकं वेद्यमानं वाक्यं शब्दः इति। एवम्महर्षिप्रोक्तं शब्दस्वरूपम् आप्तोपदेशः शब्दः इति, न्यायमञ्जरीकारोक्तमपि आप्तोपदेशः शब्दः इत्येव लक्षणं भवति। तर्कभाषाकारेण केशवमिश्रेण तु आप्तवाक्यं शब्दः यथार्थभूतस्य उपदेष्टा पुरुषः वाक्यं तु आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः इत्येव शब्दस्वरूपं व्याख्यातम्। तर्कसङ्ग्रहकारेणआप्तोच्चरितत्वे सति वाक्यत्वमिति आप्तवाक्यं शब्दः इत्यभणि। इति मयात्रन्यायशास्त्रगर्भितः शब्दविचारः विहितः।

**काव्यशास्त्रप्रतिपादितशब्दतत्त्वम्**

वैयाकरणा इव काव्यशास्त्रिणः शब्दतत्त्वस्य पारमर्थिकस्वरूपं व्याख्यान्ति। नाट्यशास्त्रस्य प्रणेता मुनिर्भरतः शब्दतत्त्वस्य पारमार्थिकस्वरूपेण विदित आसीत्। तन्मतानुसारं वागेव सर्वेषां कारणमस्ति। वाचिकाभिनयस्य व्याख्यायां नाट्यशास्त्रेलिखति यत् अत्र विद्यमानं सर्वशास्त्रं वाण्योतप्रोतमस्ति। वाङ्मयञ्च वागाश्रितं वर्ततेअतः वाण्याः परं किमपि नास्ति। वाक्तत्त्वमेव सर्वेषां कारणभूतमस्ति[2]। **भामहाचार्यः** शब्दं परिभाषमाणो लिखति यत् अर्थप्रतीत्यर्थम् उच्चरितः अकारादिवर्णानां[3] सार्थकसमुदायः शब्दो व्यपदिश्यते। स शब्दस्य नित्यत्वम् अविनाशित्वं ध्वनेः व्यतिरिक्तत्वञ्च

---

1. श.श.प्र.,प्र.२
2. नाट्य., १४.३
3. भामह., ६.८

स्वीकरोति। तन्मते द्रव्य-क्रिया-जाति-गुणभेदैः शब्दश्चतुर्विधो भवति। भामहस्य शब्दसम्बद्धलक्षणे शङ्कमानाः वैयाकरणाः स्फोटवादं कल्पयन्ति। प्रत्युत भामहाचार्यः नानाविधतर्कैः तन्मतं दूषयन् कथयति यत् इदं पूर्वमेव सङ्केतितम् अर्थात् ईश्वरद्वारा निश्चितं जातं यत् इयन्तः ईदृशः शब्दा वा अमून् अर्थान्प्रत्याययिष्यन्तीति तदभिप्रायः।

**आचार्यदण्डी** समस्तलोकव्यवहारं शब्दाधीनमेव अङ्गीकरोति। तन्मते शिष्टजनकृतवाक्प्रयोगमनुशिष्य लोके जनानां व्यवहारप्रवृत्तिः जायेत। एतेन साध्वसाधुशब्दानां समस्तानां वाचकता स्व्यकारि। दण्ड्याचार्यः लोकसिद्धिं प्रतिपादयितुं काव्यादर्शे कथयति यत्- शब्दस्वरूपज्योतिः समग्रसंसारेन प्रदीप्येत तर्हि इदं त्रिभुवनमपि अन्धकारमयं जायेत। शब्दप्रकाशनेनैव सकललोकः प्रकाशते[1]।

**भोजराजः** शृङ्गारप्रकाशे शब्दम् इत्थं परिभाषते– 'अतः स्थितमेतत् प्रकृतिप्रत्ययादिवर्णजनितध्वनिसमूहाऽभिव्यङ्ग्यस्फोटलक्षणोऽर्थात्मार्थावसाय प्रसवनिमित्तं शब्दः[2]'।

शब्दस्वरूपविषये काव्यप्रकाशकारः मम्मटाचार्यः काव्यप्रकाशे द्वितीयोल्लासे शब्दशक्तिविवेचनावसरे शब्दस्वरूपं निरदिशत्। यथा-
स्याद्वाचकोलाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा[3]॥

आचार्यविश्वनाथोऽपि मम्मटमतं समादृत्य शब्दव्यापारत्वात् शब्दस्य त्रैविध्यं मनुते। वक्रोक्तिजीवितकारः कुन्तकः शब्दव्याख्यानावसरे काव्यमार्गे शब्दस्य अर्थं प्रति वाचकतां पारमार्थिकतां च स्वीकरोति। यथोक्तम् -

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः[4] ॥

---

1. काव्या. १.३
2. शृङ्ग., सप्तमप्रकाशः, शब्दार्थसम्बन्धविचारः
3. का.प्र. २.१
4. वक्र.जी.प्रथमोन्मेष का. ८ पृ०

व्यापारदृशा शब्दाः त्रिविधाः वाचक-लाक्षणिक-व्यञ्जकाः चेति काव्यशास्त्रे मताः। सामान्यतस्तु शब्दः एव वाचको भवति। तल्लक्षणं मम्मटाचार्यः एवं निरूपयति "साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः। इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थ-विशेषं प्रतिपादयतीति यस्य यत्राप्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः[1]" इति शब्दः सामान्यतः सङ्केतितार्थप्रतिपादकः वाचको भवति। एवं रीत्याविभिन्नशास्त्रेषु निरूपितं शब्दस्वरूपमिहपरिशीलितम्।

**अर्थस्वरूम्**

लोकव्यवहारे समस्तस्यापि शब्दस्य प्रयोगः अर्थावबोधाय भवति। महाभाष्यकारानुसारेण शब्दप्रयुक्तिः अर्थावगमनाय भवति। शब्दस्य प्रयोजनमेव अर्थप्रत्यायनम्। 'अर्थस्य सम्प्रत्ययं करिष्ये' इति प्रतिज्ञावाक्ये शब्दस्य प्रयोग एव भवति। एषैव शब्दव्यवहारस्य उपयोगिताविद्यते[2]। कुमारिलभट्टोऽपि शब्दस्य इमामेव उपयोगितां चिन्तयन् कथयति यत् अर्थप्रत्यायनार्थम् एव सर्वस्य शब्दस्य प्रयोगो भवति[3]।

**व्याकरणशास्त्रप्रतिपादितार्थतत्त्वम्**

भगवतः पतञ्जलेः मतानुसारं यस्य अर्थस्य ज्ञानाय शब्दप्रयोगो भवति तदेव तस्य शब्दस्य अर्थो भवति। अर्थात् शब्दः अर्थश्च अभिन्नौ स्तः। अर्थः शब्दस्यैव अन्तरङ्गशक्तिः वर्तते। अत एव तदुक्तरीत्या शब्दः शब्दात् बहिर्भूतः किन्तु अर्थः अबहिर्भूतः अपृथग् अस्ति। "स्वं रूपं शब्दस्याशब्दसंज्ञा"[4] इदं सूत्रं व्याकुर्वन् मुनिः कथयति यत् अर्थः द्विविधो भवति। एकः शब्दस्य स्वं रूपम्। द्वितीयश्च बाह्यवस्तु बोध्यपदार्थः। यथा – "अग्नेर्ढक्[5]" इति सूत्रे पठितः अग्निशब्दः भौतिकाग्निबोधपरः अग्निशब्दस्य बोधकः। परन्तु लौकिकव्यवहारे

---

1. का.प्र., ३० का.,७ पृ. ४४
2. महा, १/१/१४३
3. मी.सू. त.वा.१/३/८
4. अष्टा १.१.६८
5. अष्टा.४.२.३३

अग्निशब्दस्य प्रयोगेण बाह्यवस्तुनः अर्थात् अग्निनामकपदार्थस्य बोधो जायते। "गाम् आनय" "दधि भक्षय" इत्याद्युच्चरितेषु वाक्येषु दधिपदार्थः आनीयते स च सेव्यते। पतञ्जलिमुनिः कथयति - अर्थज्ञानं शब्दद्वारैव भवति। यदा कोऽपि शब्दः श्रुतिगोचरो भवति तदा सः प्राथम्येन स्व-स्वरूपं तदनन्तरम् अर्थस्य स्वरूपं प्रकटयति। शब्दो यदा स्पष्टतया अप्रयुक्तः सः अर्थप्रत्याय्यनं नैव कारयति।

अर्थस्य स्वरूपनिर्णयविचारे आचार्यभर्तृहरिः पुण्यराजश्च स्वकीयं मतं प्रास्ताविष्टाम्यत् वक्ता यमर्थमभिलक्ष्य शब्दप्रयोगं कुरुते, शब्दोऽपि तमर्थम् आविष्कुरुत इति। काथनस्याशयः इत्थमेव वेद्यते, शब्दस्य अर्थस्वरूपनिर्धारणं शब्दप्रयोगात् पश्चात् भवति। एको वक्ता शब्दं नियतरूपे प्रयुज्य एकमर्थं व्यनक्ति। द्वितीयश्च वक्ता तमेव शब्दं रूपान्तरे प्रयुज्य अन्यार्थं व्यक्तुं शक्नोति। अतः अर्थस्य किमपि नियतं स्वरूपं नास्ति। भर्तृहरिः वाक्यपदीये द्वितीयकाण्डे पुरातनानामाचार्याणाम् अर्थ-विषयकाणि द्वादशमतानि उपास्थापयत्।

१. शब्दात् आकृतिहीनार्थतत्त्वस्य बोधो भवति। आकारः तस्माद् अर्थतत्त्वात् अविनाभावसम्बन्धेन युक्तोऽस्ति। अतः आकार-विशेषस्यापि प्रतीतिः शब्देन भवति।
२. अर्थः साकृतिः भवति। कतिपयाकाराणां बोधं शब्दः कारयति। केषाञ्चन चाकाराणां बोधः तेन सह अविनाभावसम्बन्धत्वात् भवति। इमे मते द्वे परस्परं विरोधिनी स्तः।
३. शब्दः समग्रवैशिष्ट्ययुक्तमर्थं न बोधयति। जातिमात्रस्य बोधः शब्दद्वारा भवति। अतः अर्थस्यस्वरूपम् अनियतम् अपूर्णञ्च भवति।
४. सर्वाकृतियुक्ता जातिः शब्दस्य अर्थो वर्तते। जातेः व्यक्तेश्च परस्परं सापेक्षासत्तात्वात् व्यक्तिविशिष्टजातिः जातिविशिष्टव्यक्तिः वा शब्दार्थो भवति।
५. अवयवातिरिक्तः अवयवी शब्दस्यार्थः अस्ति। अवयवसमुदायः तस्य विकल्पो वा शब्दार्थो न केवलम् अवयवी शब्दस्य अर्थो भवति।
६. शब्दस्य अर्थः असत्यसंसर्गरूपो वा वर्तते। असत्या अनित्या च

जातिः इत्यादि सम्बन्धत्वेन शब्दस्यार्थः अनित्य इति मन्यते। अनित्यजात्यादिना सह सम्बन्ध एव शब्दार्थस्य स्वरूपम् अस्ति। अतः शब्दस्यार्थः संसर्गरूपः अनित्यश्चेति मतमस्ति। अर्थः असत्याभाससत्यमित्यपि अकथ्यत। अर्थः तत्त्वतः सत्यभूतो वर्तते। किन्तु असत्यवस्तुना सह संसर्गकरणात् असत्यमिति प्रतीयते।

७. अर्थः शब्दाद् अभिन्नरूपो वर्तते। शब्द एव अभ्यासरूपतां भजते वा स्वस्वरूपस्य ज्ञानं कारयति। पदार्थस्य स्वरूपम् अभ्यासेन आच्छाद्य शब्दात् अभिन्नतया बोधस्य विषयतां धत्ते। अस्मिन् बोधे शब्द-अर्थयोः तत्सम्बन्धस्य च अभेदप्रतीतिर्जायते। अतः शब्दार्थयोर्मध्ये शब्दस्य अभिन्नस्वरूपः अर्थः इत्येव अङ्गीकृतम्।

८. अर्थः शब्दे निहितया शक्त्या उपस्थापितं तत्त्वं विद्यते। शब्दः यस्मिन् रूपे अर्थप्रत्याय्यनं कारयति। तदेव अर्थस्य स्वरूपं भवति। एवम् अर्थः स्वाभिव्यक्त्यर्थम् शब्दायत्तो भवति। स स्वाभिव्यक्तये अक्षमोऽस्ति। सः असर्वशक्तिमान् मतः। अर्थस्य सत्त्वं शब्दाधीनत्वात् विवक्षानुरूपः स परिवर्तितो भवति। अतः तं निरात्मकम् असत्यञ्चापि अवदन् तत्त्ववेत्तारः।

९. उक्तमतस्य विपर्यये एकस्मिन् पक्षे अर्थस्य सर्वशक्तिमत्ता सर्वात्मता तथा सत्यता इति स्वीकृता। यत्किमपि बोध्यमस्ति, तत्सर्वम् अर्थः। शब्दः नियतशक्तिं बोधयति। अर्थः बोध्यत्वात् तां शक्तिं दधाति। सः सर्वशब्दैः बोधयितुं शक्येत। अर्थः नित्यः सर्वशक्तिमान् चास्ति।

१०.अर्थः बुद्धिगतो विकल्परूपः बोध्यरूपः अस्ति। तस्मात् सम्बन्ध-कारणादेव शब्दात् बाह्यवस्त्वपि बोध्यते। परन्तु बाह्यवस्तु शब्दस्य अर्थो नास्ति।

११.एकस्मिन् मते अर्थस्य बुद्धिगतता बाह्यता उभे स्वीकृते स्तः। कैश्चित् शब्दैः बोधगम्यः अर्थः आकाराविशेषयुक्तो भवति। लोकसिद्धबाह्य-वस्तुनश्च स्मृतिं कारयति। परन्तु कतिपयशब्दैः निराकृतेः बोधगतार्थ-

स्यैव उपलब्धिर्भवति।

१२.सारभूते अन्तिमे मते शब्दस्य अर्थः अनियतात्मकः इति स्वीकृतम्। कस्यचित् शब्दस्य कश्चन एको निश्चितार्थो न भवति। प्रत्येकं व्यक्तिः स्वस्वनिहितवासनायाः अनुरूपेण अर्थं गृह्णाति। व्यक्तेः (संस्कारः) व्यक्तेः संस्कारानुरूपम् शब्दस्यार्थः परिवर्तमानो भवति। अतः शब्दाऽर्थस्य स्वरूपम् अस्थिरम् अनिश्चितञ्चेति अमन्यत[1]।

एवं रीत्या भर्तृहरिणा विवेचितानि द्वादश मतानि परिशील्य एतत्तु स्फुट्यते यत् शब्दे अर्थः शक्त्या सङ्केतत्वेन वा तिष्ठति। इदं सर्वैरपि चिरन्तनैः अभ्युपगतमस्ति।

वार्तिककारमहाभाष्यकारौ अर्थं लक्षयन्तौ[2] आहतुः – "सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावः"। किमेभिस्त्रिभिर्भावग्रहणैः क्रियते ? एकेन भावशब्देन प्रतिनिर्दिश्यते, द्वाभ्यां भावशब्दाभ्याम् अर्थः, सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थः" वार्तिककारः अर्थस्य लक्षणे "भावः" इति शब्दस्य वारत्रयं प्रयोजनमकार्षीत्। तत्स्पष्टयन् महाभाष्यकार आह–

प्रथमभावशब्दस्यार्थः अस्ति शब्दः, इतरयोः द्वयोः भावशब्दयोः अर्थः अस्ति अर्थ इति। समस्तोऽपि शब्दः स्वस्वार्थावबोधनाय भवति। यस्य यस्य अर्थस्य बोधनाय शब्दः प्रयुक्त स स अर्थस्तस्य भवति।

कैयट-नागेशौ पातञ्जलभाष्यस्य व्याख्यां विदधतौ अर्थं निर्वदतः यत् समस्तः शब्दः यस्मै प्रवृत्तिनिमित्ताय अर्थात् यस्य वाच्यार्थस्य बोधनाय प्रयुक्तो भवति। स एव प्रवृत्तिनिवृत्तिरूपः अर्थस्तस्य शब्दस्य भवति[3]।

आचार्यभर्तृहरिः वदति यस्य शब्दस्योच्चारणेन यस्यार्थस्य प्रतीतिर्भवति, सः तस्यार्थो भवति। अनेन प्रकारेण व्याकरणशास्त्रे अर्थपद-विचारः अकारि।

---

1. वाक्य.ब्र. ११९-१२१,१२५,१२६,१२७,१२८,१३१,१३२,१३३,१३५,१३६
2. महा,५/१/११९
3. तत्रैव, प्रदीप-उद्योत टीका

**मीमांसाशास्त्रप्रतिपादितार्थतत्त्वम्**

मीमासाशास्त्रे आचार्यकुमारिलभट्टः स्वीये श्लोकवार्तिके वाक्याधिकरणे अर्थं लक्षयन् कथयति – योऽर्थः येन शब्देन सह अन्वितो (सम्बद्धो) भवति। सः तस्यार्थो भवति इति।

**न्यायशास्त्रप्रतिपादितार्थतत्त्वम्**

वस्तुतस्तु अर्थस्वरूपविचारः तावान् गम्भीरो नास्ति यावान् शब्दस्वरूपविषयः। न्यायशास्त्रीयग्रन्थानां तर्कभाषामुक्तावलीतर्कालङ्कारादीनां परिशीलनेन अर्थस्वरूपविचारे काचिद्विशिष्टा धीः नैवालक्षि। तथापि न्यायमञ्जर्यां जयन्तभट्टः कथयति-केषाञ्चन मते यत् इदमिति अस्य पदस्यार्थः अस्तीति। अर्थात् अर्थः सङ्केतितः, येन शब्देन यस्य यादृशस्य अर्थस्य सङ्केतः क्रियते। स तस्य अर्थो व्यवह्रियते।

**काव्यशास्त्रप्रतिपादितार्थतत्त्वम्**

व्याकरणमतानुसारिणः काव्यशास्त्रिणः शब्दशास्त्रस्य प्रथमविद्यात्वेन उक्तमतान्येव अङ्गीकुर्वन्ति। रुद्रटाचार्यः काव्यालङ्कारग्रन्थे सप्तमेऽध्याये अर्थप्रकारान्कथयति-शब्दात् प्रतीयमानस्य अर्थस्य चतुर्विधत्वं स्वीचकार। वाचकः शब्दः तद्बोधिका अभिधावृत्तिस्तया वृत्या वेद्यमानः अर्थः द्रव्य-गुण-क्रिया-जातिभेदात् चतुर्धा भवति।

अर्थः पुनरभिधावान् प्रवर्तते यस्य वाचकः शब्दः।
तस्य भवन्ति द्रव्यं गुणः क्रिया जातिरिति भेदाः[1] ॥

महिमभट्टः व्यक्तिविवेके शब्दान्व्यभजत। तद्यथा - जातिः गुणः क्रिया यदृच्छा चेति चत्वारः शब्दाः।

ध्वनिस्थापनाचार्यः कविरानन्दवर्धनः ध्वन्यालोके अर्थस्वरूपविषये स्पष्टतया न वक्ति। किन्तु सहृदयहृदयग्राहिणः अर्थस्य द्वौ भेदौ मेने। तद्यथा-

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यववस्थितः।

---

1. रुद्रट. ७.१

वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ[1] ॥
तत्र वाच्या प्रसिद्धो यः प्रकारैरुपमादिभिः।
बहुधा व्याकृतः सोऽन्यैः ततो नेह प्रतन्यते [2]॥

प्रतीयमानार्थस्य द्वारभूतस्य वाच्यार्थस्य उपमाद्यलङ्कारप्रकारान्तर्गत-प्रसिद्धत्वात् सङ्केतितः। मम्मटाचार्यः काव्यप्रकाशे द्वितीयोल्लासे शब्दार्थयोः स्वरूपावसरे शब्दं लक्षयित्वा अर्थस्वरूपमेव न्यरूपयत् –

वाच्यादयस्तदर्था स्युः तात्पर्यार्थोऽपि केषुचित्"[3]

इति वाच्यलक्ष्यव्यङ्ग्यमुखात् अर्थंप्रतिपाद्य प्रसङ्गवशात्मीमासकानां मतेतात्पर्यार्थोऽपि कश्चिद् अर्थः भवति सः मम्मटाचार्येण समासेन न्यरूपि। एतन्मते अर्थः त्रिविधः वाच्य-लक्ष्य-व्यङ्ग्या इति। अयं विभागः व्यापारदृष्ट्या वर्तते। सामान्यतस्तु अर्थः सङ्केतितो भवति। स च जाति गुण द्रव्यक्रियादि भेदेन चतुर्विधो भवति उक्तञ्च –

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा[4]।

विश्वनाथाचार्यः स्वीये साहित्यदर्पणनामके ग्रन्थे द्वितीयपरिच्छेदे अर्थस्वरूपविषये मम्मटमतमेव अनुसरति – अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः। इति अभणत्।

वक्रोक्तिं काव्यजीवितत्वं मन्वानः कुन्तकाचार्यः अर्थं निरूपयति यत्– विवक्षितार्थस्य वाचकः शब्दः अन्यपर्यायिनः अवलम्बमानः एकमात्रं शब्दो भवति। अर्थस्तुसहृदयहृदयाह्लादकारी स्वप्रकृत्या चारुवान् अर्थो भवति यथा उक्तमपि।

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।

---

1. ध्व.लो. उद्योत. प्रथम्, का. २.,पृ ४३
2. तत्रैव, पृ.४६
3. का.प्र., नागेश्वरी, उ. द्वि, पृ.११
4. का.प्र., उ.२, पृ.४३

अर्थः सहृदयाह्लादकारिस्वपन्दसुन्दरः[1] ॥

इत्थं काव्यशास्त्रे अर्थविषयको विचारः आलङ्कारिकैः उपवर्णितः।

**शब्दार्थसम्बन्धः**

शब्दार्थयोः कीदृशः सम्बन्धः?, सः सम्बन्धः नित्यः उताहो कृतकः? इत्यस्मिन् विषये वैयाकरणानां दार्शनिकानां च प्रमुखं मतं विद्यते। वैयाकरण-मीमांसककाव्यशास्त्रिणः शब्दाऽर्थयोः नित्यसम्बन्धं अङ्गीकुर्वन्ति। नैयायिक-वैशेषिकौ तयोः सम्बन्धं कृतकम् (अनित्यम्) मन्वाते।

**व्याकरणशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्**

**वार्तिककारो वररुचिः** 'सिद्धे शब्दार्थसम्बन्धे'[2] इति पाणिन्यष्टाध्याय्याम् आदिमं वार्तिकं विरचय्य शब्दार्थयोःसम्बन्धं नित्यं स्वीचकार।

**महाभाष्यकारः पतञ्जलिः**[3] वार्तिकारोक्तं मतं स्वीकृत्य "लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु" इति पाणिनिकात्यायनोक्तः यःसम्बन्धः सः नित्य इति व्याचख्यौ। अपि च कथयति- "सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः योऽर्थः स शब्दः इति"[4]

पतञ्जलेरेव आशयं प्रकटयन् कैयटो वदति - शब्दस्य अर्थेन सह नित्यसम्बन्धस्य क आशयः इति स्पष्टयति – शब्दे अर्थावबोधनाय योग्यता नाम्नी काचिच्छक्तिः स्वाभाविकी वर्तते। ययातदुच्चारणकाले तत्प्रतिपि-पादयिषितः अर्थः उपस्थितो भवति। एतन्मते द्रव्यपदार्थस्य अनित्यत्वेऽपि सम्बन्धः नित्यो भवति, यतः अर्थावबोधनस्य योग्यता शब्दे भवति, शब्दश्च नित्यः। मुनिमते शब्दार्थयोः सम्बन्धः स्वाभाविकः नित्यश्च वर्तते। इदं मुनित्रयस्य मतं शब्दनित्यतावादीति नाम्नापि प्रथते।

---

1. वक्र.जी.,उन्मेष.प्रथम, का. ९,पृ.३५
2. महा. वार्त्तिक.१
3. महा. पस्पशाह्निक,
4. लघु, पृ.२५

आचार्यभर्तृहरिः व्याड्याचार्यस्य शब्दार्थसम्बन्धविचारपरकं मतम् वाक्यपदीयस्य स्वोपज्ञवृत्तौ कारिकया प्रकाशयति।

सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः।
शब्दैरेव हि शब्दानां सम्बन्धः स्यात्कृतः कथम्[1] ॥

इति। लोके वेदे च शब्दार्थयोः सम्बन्धं व्यवस्थापयितुं कोऽपि कर्ता नास्ति। तत्सम्बन्धस्तु अनादिः अकर्तृकश्च वर्तते। शब्दे शब्दानाम् अर्थैः सह सम्बन्धं कोऽपि व्यक्तिविशेषः कथं कर्तुं शक्नोति [2]।

**कैयटः** महाभाष्यस्य प्रदीपटीकायां शब्दार्थसम्बन्धविषये –"सम्बन्धस्यापि व्यवहारपरम्परयाऽनादित्वनित्यता[3]" इति तत्सम्बन्धस्य व्यवहारपरम्परायां अनादित्वं मत्वा तन्नित्यतां प्रतिपादयामास।

**भर्तृहरिः-**

भर्तृहरिणा मुनित्रयस्य शब्दार्थसम्बन्धविषयकमतं परिशील्य वाक्यपदीये ब्रह्मकाण्डे अनया कारिकया उल्लेखो व्यधायि –

नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः[4] ॥इति

भर्तृहरिः शब्दार्थयोः सम्बन्धेमतद्वयमुपस्थापयति। तद्यथा-

वैयाकरणेष्वेव केचित् शब्दार्थयोग्यतारूपं सम्बन्धं स्वीकुर्वन्ति। स च इन्द्रियविषयसम्बन्धवत् प्रकाश्यप्रकाशकभावतुल्यः। यथाचक्षुरादयः सत्या स्वप्रकाशनयोग्यतया आलोकसहायेनैव वस्तुरूपं प्रकाशयन्ति तथा शब्दा अपि वृद्धव्यवहाररूपसङ्केतसहायेन अर्थं प्रकाशयन्तीति, अथवा शब्दार्थयोः सम्बन्धः कार्यकारणभावः। तथा हि प्रयोक्ता"अर्थं बुद्ध्वा शब्दरचना" इति न्यायमनुपाल्य अर्थं बुद्धिविषयीकृत्य शब्दं प्रयुङ्क्ते। तस्मात् अत्र शब्दोत्पत्त्य-

---

1. वा.प. स्वोपज्ञवृत्तिः १/२६
2. वा.प. स्वोपज्ञवृत्तिः १/२६
3. महा., पस्पशा. प्रदीप टीका
4. वाक्य. १/२३

व्यवहितप्राक्क्षणवृत्तित्वाद् अर्थंप्रति शब्दस्य कारणत्वम्। श्रोत्रा आकर्णितः स एव शब्दोऽर्थं बुद्धिविषयं करोतीति अर्थस्य कार्यत्वं शब्दस्य कारणत्वम्। शब्दार्थयोः बुद्धिविषयतया तयोस्सामानाधिकरण्यं उपपादयितुम् शक्यम्। सोऽयं कार्यकारणभावरूपः सम्बन्धः समयोपाधिक एव।

हरिवृषभमतेऽपि शब्दार्थयोः सम्बन्धस्य नित्यता विद्यते। शब्दस्य पदार्थेन सम्बन्धः स्वाभाविकोऽस्ति। अन्यथा शब्दव्यवहारावसरे तद्बोध्य-पदार्थस्य ज्ञानं न जायेत, प्रत्युत स अनुभवगोचरस्तु भवति। अतःतत्सम्बन्धः स्वाभाविको वर्तते।

अन्ये व्याकरणाधीतिनः शब्दार्थयोरभेदलक्षणं तादात्म्यसम्बन्धम् अङ्गीकुर्वन्ति। तेषामयम् आशयः- अस्यार्थस्य अयं वाचकः, अस्य वाचकस्य असौ वाच्यः इति ज्ञानं यत्र जायते तत्रैव सोऽयं शब्द इत्यभेदप्रत्ययो भवति। इति शाब्दिकानां सिद्धान्तसारः[1]।

**मीमांसाशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्**

शब्दार्थसम्बन्धविषयकविचारस्तु मीमांसाशास्त्रे आ जैमिनेः प्राभाकरपर्यन्तंबहुधा पर्यालोचि। तत्र जैमिनिमुनेः मतानुसारं शब्दार्थयोः सम्बन्धः औत्पत्तिको विद्यते। उक्तञ्च- "औत्पत्तिकस्तु शब्दास्यार्थेन सम्बन्धः"[2] इति।

शबरस्वामी शाबरभाष्ये प्रत्यक्षादिप्रमाणषट्कस्य लक्षणं कुर्वन् शब्दविशेषस्य शास्त्रस्य लक्षणमवदत्। एवं स मुनिप्रोक्तवचनस्य औत्पत्तिकं नित्यत्वं चेतिपर्यायतया शब्दार्थसम्बन्धं स्वीकरोति [3]।

भाट्टा अपि तत्सम्बन्धं स्वाभाविकसम्बन्धमित्येव आहुः।

वाचस्पतिमिश्रः तत्त्वबिन्दौ शब्दार्थयोः सम्बन्धः अर्थस्मारकभाव इति

---

1. वाक्य. काण्ड.३ कारिका २९ पृ. ४८-५०
2. मी.सू.,१.१.५
3. "शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्," शा.भा.,१.१.५, भा.१,पृ.४४, औत्पत्तिक इति नित्यं ब्रूमः। शा.भा.मी.द.१,पृ.२८

स्वीचक्रे।

## न्यायशास्त्रप्रतिपादितशब्दार्थसम्बन्धतत्त्वम्

न्यायवैशेषिकशास्त्रगर्भितसिद्धान्तान् विचार्य तत्सारतया मया अत्र नैयायिकानां मतम् उपस्थाप्यते –

**न्यायसूत्रकारो** भगवान् गौतममुनिः शब्दार्थसम्बन्धं सामयिकम्[1] (साङ्केतिकम्) इति जगाद।

**प्रभाचन्द्रोऽपि**[2] प्रमेयकमलमार्त्तण्डग्रन्थे प्रश्नोत्तरोपक्रमेण शब्दार्थसम्बध-नित्यत्ववादिनः वैयाकरणान् मीमांसकान् आक्षिपति यत् शब्दः अर्थस्य प्रतिपादको न, तस्य अर्थेन सह सम्बन्धोऽपि न। ये शब्दाः विद्यमानान् पदार्थान् सूचयन्ति त एव अतीतभाविपदार्थानपि सूचयन्ति वस्तुनोऽभावेऽपि शब्दभावः अस्ति। यद् वस्तु यस्याभावेऽपि तिष्ठति तस्य वस्तुनः तेन सह सम्बन्धोऽपि न भवति। अन्ततो गत्वा व्यावहारिकसत्तायां शब्दार्थयोः प्रयोगं साधयन् तन्मध्ये साङ्केतिकं सम्बन्धं स्वीकरोति।

**जयन्तभट्टः**न्यायमञ्जर्यां शब्दार्थसम्बन्धं निरूपयन् वदति यत् अग्नौ निहिता दहनशक्तिरिव शब्दे नैसर्गिकी वाचकशक्तिर्वर्तते, व्युत्पत्तिश्च वृद्धव्यवाहारात् ज्ञायते' इति। **चित्रभानोरिव दहनशक्तिः शब्दस्य नैसर्गिकी वाचकशक्तिः व्युत्पत्तिस्तु वृद्धेभ्यः एव व्यवहारमात्रेण उपलभ्यते**"[3]। शब्दार्थयोः मध्ये कुण्डबदर्योरिव संयोगसम्बन्धः न अपि तु तयोः कार्यकारणभावः निमित्त-नैमित्तिकभावः आश्रयाश्रयीभावः भवितुमर्हति। न च तयोः अविनाभाव-सम्बन्धो भवितुमर्हति, येन शब्दः अनुभवप्रमाणं भविष्यति। अतः शब्दाऽर्थयोः वाच्यवाचकनियमस्य नियामकः समयः (सङ्केतः) एव सम्बन्ध इति तात्पर्यम्।[4]

---

1. न्या. सू., ५६
2. प्रमेय. पृ.४९४
3. न्याय. च. आ, पृ.२२०-२२१
4. तत्रैव २२२

**वात्स्यायनमुनिः** न्यायसूत्रस्य भाष्ये शब्दार्थसम्बन्धविषयकं सूत्रकारमतमेव अनुकरोति यत् – "न सम्बन्धकारितं शब्दार्थव्यवस्थापनम्[1], किं तर्हि समयकारितं यत्तद्वाचाम्" इत्युक्त्वा पूर्वोक्तानि शब्दार्थसम्बन्धीनि अन्यमतानि आलोच्य शब्दार्थसम्बन्धः समयकारित इति दृढयति।

## काव्यशास्त्रप्रतिपादितशब्दार्थसन्बन्धतत्त्वम्

वस्तुतस्तु मतमिदं व्याकरण-मीमांसा-न्यायशास्त्रेषु तत्तत्प्रणेतृभिः व्याख्यातृभिः भाष्यकर्तृभिः टीकाकारैश्चउपस्थापितं मतं मूले निधाय सविशदं समालोचि। साहित्यविदः व्याकरणशास्त्रस्य प्राथम्यं स्वीकृत्य तन्मतमेव समर्थयन्तः दृश्यन्ते। यतो हि व्याकरणशास्त्रं शब्दानुशासनम् पदशास्त्रमिति नामान्तरेण अभ्युपगम्यते। तस्मात् काव्यलक्षणविधायिनोऽपि पृथङ्गतं न प्रास्तुवन्। तथापि तेषाम् आ भरतमुनेः आ भामहं यत् साहित्यं प्राप्यते तत्र तु शब्दार्थयोः अभेदसम्बन्ध एव सिद्धान्तितो वर्तते। तत्र आद्यः–

1. **भामहाचार्यः**[2] – काव्ये शब्दार्थयोः अभेदसम्बन्धं मन्वानः काव्यं लक्षयति "शब्दार्थौ सहितौ काव्यम्" इति।
2. **आचार्यदण्डी**[3] – काव्यादर्शे "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इति काव्यं निरूप्य पदपदार्थयोः अभेदसम्बन्धं स्वीचकार।
3. काव्यालङ्कारसूत्रवृत्तौ **वामनाचार्यः**[4] – तत्सम्बन्धविषये "काव्य-शब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते। इतिअवादीत्।
4. **रुद्रटाचार्यः**[5] – ननु शब्दार्थौ काव्यमिति कथयित्वा तत्साहचर्यं प्रत्यपीपदत्।

---

1. न्या. सू. भा. ५९
2. भामह, प्रथम, परिच्छेद, का. १६ पृ.४७
3. काव्या, कारिका.१० पृ.२५
4. का. सू., १.१.१
5. रुद्रट, द्वि. अ. का.१, पृ.१७

5. **कुन्तकाचार्यः**[1] – वक्रोक्तिजीविताभिधे ग्रन्थे शब्दार्थयोः अलङ्कार-अलङ्कार्ययोः सम्बन्धवत् तात्त्विकाभिन्नत्वम् मन्यते।

6. व्यक्तिविवेककारो महिमभट्टः[2] – ध्वनेः अस्तित्वं खण्डयितुं तत्परिप्रेक्ष्ये व्यक्तिविवेकं प्रणीय सर्वं ध्वनिं अनुमाने अन्तर्भावयति। तेषामनुमान-प्रमाणं न्यायशास्त्रोक्तप्रमाणपदार्थात् भिद्यते। तन्मते शब्दार्थसम्बन्ध-विषयकविचारोऽपि नितरां भिन्नो जायते। तेषां सिद्धान्तः क्रियाप्रवृत्ति-निमित्तवादः इति अस्ति। सः [3] मूले लिखति यत्–

'सर्व एव शब्दव्यवहारः साध्यसाधनगर्भतया प्रायेणानुमानरूपोऽभ्युप-गन्तव्यः।' तस्यपरप्रवृत्तिनिवृत्तिनिबन्धनत्वात् तयोः सम्प्रत्ययासम्प्रत्य-यात्मनोरन्यथाकर्तुमशक्यत्वात्। न हि युक्तिमनवगच्छन् कश्चिद्वि-पश्चिद्वचनमात्रात् सम्प्रत्ययभाग् भवति इति व्यक्तिविवेकः।

एतदुक्तशब्दार्थसम्बन्धविषयकविचाराणां नामान्तराणि अपि भवितुमर्हन्ति। यथा-

1. साध्यसाधनभावः।
2. प्रवृत्तिनिवृत्तिभावः।
3. कार्यकारणभावः।

सम्पूर्णव्यवहारः सदैव साध्यसाधनभावेन युक्तो भवति। यः कार्यकारणभाव इति नामान्तरेण व्यपदेष्टुं शक्यते। संसारे यावानपि शब्दव्यवहारो भवति सः परप्रवृत्तिनिवृत्यर्थमेव भवति। स्वप्रवृत्तिनिवृत्तिस्तु शब्दव्यवहारम् अन्तरेणभवितुमर्हति। तदुक्तं यथा –

---

1. वक्र. जी., प्रथम. उन्मेष, का.१७
2. व्यक्ति, प्र. विमर्शः का.१, पृ.१
3. तत्रैव प्र. वि., पृ. २६

सर्वोऽपि शब्दव्यवहारः अनुमानस्वरूपो वर्तते। इति

**भोजराजः**[1] श्रृङ्गारप्रकाशे काव्यशास्त्रीयसिद्धान्तान् सविस्तरम् व्याख्यात्। शब्दार्थसम्बन्धविषये तु भोजराजः एकामभिनवां कल्पनां प्रासूयत। ग्रन्थस्य सप्तमे प्रकाशे एषः शब्दार्थसम्बन्धं द्वादशभागेषु व्यभजतते च द्वादश सम्बन्धाः यथा –

केवलशक्तेः चत्वारः सम्बन्धाः१.अभिधा २. विवक्षा ३. तात्पर्यम् ४. प्रविभागः।

सापेक्षशक्तेः चत्वारः सम्बन्धाः – १. व्यपेक्षा २. सामर्थ्यम् ३. अन्वयः ४. एकार्थीभावः।

अन्यविधाः चत्वारः सम्बन्धाः – १. दोषहानः २. गुणोपादानं ३. अलङ्कारयोगः ४. रसवियोगः। एवमुक्तसम्बन्धघटिता अभिधासाहित्यमुच्यते।

**विद्यानाथः**[2] प्रतापरुद्रयशोभूषणे शब्दार्थसम्बन्धविवेचने शब्दार्थयोः काव्यमूर्तित्वमिति स्व्यकरोत्।

पण्डितराजो **जगन्नाथः** काव्यशास्त्रीयतत्त्वविचारे स्वीयपाण्डित्य-पूर्णशैल्या नितरां प्रथितो वर्तते। तस्य काव्यशास्त्रीयतत्त्वेषुमीमांसान्यायशास्त्रयोः संस्कृतिः दरीदृश्यते। शब्दार्थविवेचने तत्सम्बन्धे च पण्डितराजेन शक्तिद्वयस्यैव स्वरूपं निगदितम्। तृतीयशक्तेरवर्णनात् सा अभ्युपगता नास्तीति न वक्तव्यम्। तृतीयशक्तेः चर्चा तेनापि कृता वर्तते। अभिधा – स्वरूपं प्रतिपाद्य तद्भेदांश्च कथयित्वा वाच्यार्थवाचकौ इति द्वयोर्मध्ये वाच्यवाचकसम्बन्धम् अभ्युपेति जगन्नाथः[3]।

---

1. श्रृङ्ग. प्र. सप्तम. अध्याय, पृ. २२३
2. "शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम्" प्रता.रुद्र., काव्यप्रकरणे का.२, पृ.५४
3. रस., द्वि.आ., पृ.१३४

अर्वाचीनालङ्कारिकः महान् विबुधः आशाधरभट्टः त्रिवेणिकेति ग्रन्थे शब्दशक्तिनिरूणावसरे प्राचामेव मतं स्वीकृतवान्। किन्तु शब्दार्थसम्बन्ध-स्वरूपविचारम्प्रकारान्तरेण वक्ति – शब्दात् अर्थप्रतीत्यर्थं कारणं द्वयमेव अस्ति। प्रथमन्तावत् सङ्केतः, द्वितीयः व्यापारः। द्वयोस्समुदितरूपेण शब्देन अर्थप्रतीतिः भवतीति। इत्थमत्र मया शब्द-अर्थ-सम्बन्धानां विषयाणां स्वरूपविचारः यथाशास्त्रम् विमर्शपद्धत्या अक्रियत। तत्र यावदपेक्षिता उपविषयाः प्रकृतोपयोगिन आसन्ते यथाग्नन्थम्समालोचिषत।

**द्वितीयाध्यायः**

# विविधशास्त्रप्रतिपादितवृत्तिविमर्शः

अस्मिन् द्वितीयाध्याये विविधशास्त्रकाराणां ग्रन्थेषूपबद्धवृत्तिविचारः वर्तते तदत्रविमृश्यते।

**वृत्तिपदार्थः**-शब्दः शक्तिमवलम्ब्य अर्थं विज्ञापयति। शक्तिश्च नानाशास्त्र-विद्भिः विपश्चिद्भिः बहुधा समालोच्यत। तैः शक्तेः पर्यायरूपेण वृत्तिपदं व्यवहृतम्। वर्ततेऽनया इति वृत्तिः इति व्युत्पत्त्या यथा शब्दः अर्थं बोधयितुम् अर्थे प्रवृत्तो भवति तथा सा वृत्तिरुच्यते। अयमेव विचारः वृत्ति –व्यापार-शक्ति-सम्बन्धादिपदेन तत्तच्छास्त्रेषु व्यपदिशि। वृत्तिपदस्य कोशादिग्रन्थधिया केकेअर्थाः, तच्छब्दस्य निष्पत्तिः व्युत्पत्तिश्च का इति निम्नरूपेण उल्लिखिताः सन्ति।

**वृत्तिपदस्य निष्पत्तिः**-'वृतु वर्तने' इत्यस्माद्धातोः 'स्त्रियां क्तिन्[1]' इति सूत्रात् भावे करणे वा क्तिन्प्रत्यये सति उभयथापि वृत्तिशब्दः सिद्ध्यते।।

**वृत्तिपदस्य व्युत्पत्तिः**– वर्तनं वृत्तिः यद्वा वर्तते शब्दः अर्थे(अर्थप्रकाशनाय प्रवर्तते) अनयेति वृत्तिः।

**कोशादिग्रन्थदिशातदर्थाः**

१. जीविका-इत्यमरकोशे।
२. जीविका-एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती[2]। इति मनुस्मृतौ। व्यवहारः – गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्[3]। इति मनुस्मृतौ।
३. सूत्रस्यार्थविवरणं वृत्तिः, कारकप्रतियोगिभ्यां यद्यदन्यदपेक्षते।

---

1. अष्टा.३/३/९४
2. मनु. ४/२५९,
3. तत्रैव २/२०५

अपेर्बहुलवाचित्वाद्वृत्तिस्तत्र तु नेष्यते॥[1] इति कातन्त्र-व्याकरणे।

४. कैशिक्यादिः, प्रवर्तनम्। इति मेदिनीकोशे

५. 'आधेयः' व्युत्पत्त्या। वर्ततेऽस्मिन्निति ध्याभाववद्वृत्तित्वम् इति व्याप्तिपञ्चके।

**व्याकरणप्रभृतिशास्त्रालोके वृत्तिपदस्य उपात्तार्थः।**

१. आचार्यकौण्डभट्टो **वैयाकरणभूषणसारे** अर्थैस्सह पदानां सम्बन्धमेव शक्तिपदेन कथयति। यथा –

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा[2]॥

२. व्यापारः इति अर्थसन्निकृष्टस्य इन्द्रियस्य वृत्तौ सत्यां तमोऽभिभवे यः सत्त्वसमुद्रेकः **साङ्ख्यतत्त्वकौमुद्याम्**[3]।

३. चित्तस्यावस्थाविशेषः[4]इति **योगदर्शने।**

४. मौनिश्रीकृष्णभट्टः वृत्तिदीपिकायां शब्दवृत्तिं सम्यग् उपवर्णयति-

"वृत्तित्वं च शाब्दबोधहेतुपदार्थोपस्थित्यनुकूल-शब्द-तदर्थ-सम्बन्ध-त्वम्। सङ्केतविशेषसम्बन्धेन इति। [5]**न्यायशास्त्रे।**

ध्वन्यालोके आनन्दवर्द्धनाचार्यः वृत्तिपदं व्यवहारपरं स्वीकरोति-

'व्यवहारो हि वृत्तिरित्युच्युते[6]' इति **साहित्यशास्त्रे।**

साहित्यमीमांसाकर्ता रुय्यकाचार्यः पदानां पदार्थप्रतिपादने व्यापारमेव

---

1. कातन्त्रव्याकरणे
2. भूषण. पृ.२६६
3. सां.त.कौ., /०५
4. यो.सू. १/२
5. वृत्तिदीपिका, वृत्तिप्रकरणम्.
6. ध्वन्या., पृ. ४.३३, ३.३३

वृत्तिम् अङ्गीकरोतियथा-"वृत्तिः पदानां व्यापारः पदार्थप्रतिपादने[1]"इति।

त्रिवेणिकाकार आशाधरभट्टो वृत्तिपदस्य व्युत्पत्तिपरकं लक्षणमेवं विदधाति-

'वर्त्तते, शब्दोऽर्थे प्रवर्त्ततेऽनयेति वृत्तिः। बाहुलात्करणे क्तिन्प्रत्ययः[2]'।

श्रृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः। रसे रौद्रे च वीभत्से वृत्तिः सर्वत्र भारती। चतस्रो वृत्तयः ह्येताः सर्वनाट्यस्यमातृकाः॥ इति साहित्यदर्पणे षष्ठपरिच्छेदे।

**शास्त्रानुसारं वृत्तिस्वरूपम्**

**व्याकरणशास्त्रदृशा वृत्तिः**

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्[3] ॥ इति

पदसाधुताविवेचनपरं शास्त्रं व्याकरणम्। इदं हि शास्त्रं प्रयुज्यमानानां शब्दानां सम्यक् चिकित्सां विधाय व्यवहाराय साधुशब्दान् परिचाययति। वेदपुरुषाद्याङ्गपरतया सर्वेषां शास्त्राणां शिरोभूषणं च वरीवर्ति। व्याकरणशास्त्रे पदघटकीभूतवर्णप्रत्ययलिङ्गादीनां सम्यक् विचारः क्रियते। तत्र शब्दस्वरूप-विचारः ब्रह्मविचारइवाक्रियत। शब्दस्वरूपनिर्णये इयमेव कल्पना भगवद्भर्तृहरिणा वाक्यपदीये व्यवस्थापिता। तदनुरोधेन शब्दशक्तिविचारः महाभाष्य-वाक्यपदीय-वैयाकरणसिद्धान्त-कारिका-परमलघुमञ्जूषा-वैयाकरणभूषणसारादिषु करणशास्त्रग्रन्थेषु प्रावर्तत। तत्र महाभाष्यकारादिभिः अनेकशः मतमतान्तरं दर्शयित्वा वृत्तिविचारः सम्यक् विवेचितः। लोके हि परस्पराभिप्रायविनिमयरूपो व्यवहारः शब्दाधीनः। कश्चित् कस्यचित् अर्थजातस्य बुभुत्सया किञ्चित् शब्दजातं प्रयुङ्क्ते। स शब्दः अन्यैः श्रुतः वक्तृविवक्षितमर्थं बोधयति इत्यनुभवः।

---

1. साहि. पृ.३
2. त्रिवे, पृ.१
3. वाक्य.,१/१

शाब्दबोधानुकूलपदार्थज्ञानजनकज्ञानविषयः पदपदार्थयोः सम्बन्ध-विशेष एव वृत्तिरित्युच्यते। इदञ्च वृत्तिस्वरूपं "हलोऽनन्तराः संयोगः" इति सूत्रे महाभाष्ये उक्तम्। तत्रैव ग्रामशब्दोऽयं बह्वर्थपरः शालासमुदाये वर्तते। यथा – ग्रामो दग्धोऽस्ति इति आरण्यकस्य समीपे वर्तमानं तं ग्रामं वीक्ष्य शब्दः प्रयुज्यते। पश्चात् इमौ ग्रामौ इत्युच्यते इत्यत्र अस्ति' इति पदं शालासमुदाये वर्तमानात् वृत्तिरूपार्थं व्यञ्जयति।

इह च पदपदार्थयोः सम्बन्धत्वमेव वृत्तिलक्षणं बोद्धव्यम्, शाब्द-बोधानुकूल-इत्यादि विषयान्तरं तु न विशेषणम्[1], प्रत्युत उपलक्षणम्[2] इति। न तु वृत्तित्वग्रहणे शाब्दबोधपदार्थज्ञानयोः कार्यकारणभावस्य ग्रहणं भवति। तस्य ग्रहणेन च निरुक्तपदपदार्थसम्बन्धत्वात्मकवृत्तित्वग्रहः इति अन्योऽन्या-श्रयदोषो वारयितुमशक्यः। अतः अर्थे वर्तते शब्दो यया सम्बन्धशक्त्या सा वृत्तिः। 'वृतु वर्तने' धातोः करणे क्तिन्प्रत्ययेन वृत्तिपदं निष्पद्यते। एवमुक्ते सति सम्बन्धे वृत्तिः योगरूढिशक्त्यनुकूला।

## न्यायशास्त्रदृशा वृत्तिस्वरूपम्, वैयाकरणदिशा तन्निरसनञ्च

शक्तिवादे गदाधरभट्टाचार्यः वृत्तिस्वरूपं कथयन् निरूपयति-"सङ्केतो लक्षणा चार्थे पदवृत्तिः[3]" इति। तेन शक्तिलक्षणान्यतरत्वं वृत्तित्वम् इत्यभिप्रेतम्। अन्यथा वृत्तेः सामान्यस्वरूपोपपादनेन तद्विशेषवर्णनं कथं सङ्गतम् ? इति विशेषजिज्ञासायां सामान्यस्य हेतुपरतया तत्र हरिनाथभट्टाचार्यष्टीकायां निरूपयन् आह- "शाब्दबोधनिरूपिता या स्मृतित्वावच्छिन्ना जनकता, तन्निरूपिताव्यवहितोत्तरत्व-सम्बन्धावच्छिन्नावच्छेदकता – निरूपिता-वच्छेदकतावत्सांसर्गिकविषयात्वं वृत्तित्वम्[4]" एवं रीत्या लक्षणं संशोधितम्। उपर्युक्तमुभयमपि लक्षणं वैयाकरणा न आद्रियन्ते। लक्षणाया अग्रे

---

1. प्रौमा.टिप्प.,र,प्र., स्वरसन्धिः अचः परस्मिन् सूत्रे
2. तत्रैव
3. शक्ति.प्र.का., पृ.१
4. श.वा.ह.ना.टी., प्र.का.,पृ.३

खण्डनकारणतः प्रथमस्य वृत्तित्वज्ञाने एतद्घटककार्यकारणसम्बन्धज्ञानम्, तज्ज्ञाने च उक्तवृत्तित्वज्ञानम् अन्योऽन्याश्रयेण स्मृतेर्व्यापारत्वाभावोपपादकेन नव्यानां सिद्धान्तेन[1] च द्वितीयस्याप्यसम्भवात्। इति।

**काव्यशास्त्रदृशा वृत्तिः**

शासनात् शास्त्रमिति व्युत्पत्तिलभ्यार्थाभ्युपगमनेन इदमपि शास्त्रपदेन अभिधीयते रामादिवत्प्रवर्तितव्यं न तु रावणादिवदित्युपदेशपरत्वात् इदं शास्त्रकोटौ परिगण्यते। एतच्छास्त्रस्य अभिधानं काव्यशास्त्रत्वेन अभवत् यतो हि भामहोद्भटरुद्रटादीनां कृतीनां नाम्नैव इदम् काव्यशास्त्रं व्यपदिष्टमिति। कालान्तरे ततः पश्चाद्वर्तिभिः मम्मटादिभिः शब्दार्थयोस्सहभावत्वमङ्गीकृत्य इदं साहित्यशास्त्रमिति नाम्ना परिवर्तितम्। वृत्तिः – वर्तनम्। वर्तते शब्दः अर्थे यया सा वृत्तिः। इत्युक्ते शब्दार्थोऽभयनिष्ठव्यापारः। येन अर्थस्य प्रत्यायनं शब्दः करोति, तस्मात् अर्थस्य प्रत्येयता शब्दस्य च प्रत्यायकता। तन्मध्ये कश्चन व्यापारो भवति सः काव्यशास्त्रे शब्दशक्तित्वेन प्रथते। इयमेव शक्तिः शास्त्रान्तरेषु वृत्त्यन्तरनाम्नापि ज्ञायते। वस्तुतस्तु विचारोऽयं साहित्यशास्त्रे काव्यविद्भिः सविशदं प्रकटीकृतः। तत्रापि यावत्सौष्ठवेन, वाग्देवतावतारेण मम्मटाचार्येण अयं विषयः ससिद्धान्तं मतान्तरं विमृश्य न्यरूपि तावन्नान्येन केनचित्। काव्यतत्त्वस्य बीजन्तु वेदपुराणस्मृत्यादिषु उपलभ्यते किन्तु शब्दशक्तिविषये तु तादृशी स्पष्टोक्तिः कुत्रापि न लक्ष्यते।

**वृत्तिभेदाः**

सा चेयं वृत्तिस्त्रिधा-“शक्तिर्लक्षणा व्यञ्जना च” इति लघुमञ्जूषायां वक्ति नागोजिभट्टः[2]।

एवं विचारोऽयं व्याकरणमीमांसान्यायालङ्कारशास्त्रेषु सम्प्रदाय-सिद्धान्तानुरूपं प्रत्यपादि। अत्र शब्दशक्तिमभ्युपगन्तुं सर्वेऽपि शास्त्रकाराः ऐक्यम् भजन्ते। वृत्तिसङ्ख्यानियमने तु तेषां वैधर्म्यं लक्ष्यते। सामान्यतः

---

1. तत्रैव लक्षणाप्रकरण्म्
2. लघु.,श.प्र., पृ.१६

शब्दस्य तिस्रः शक्तयः भवन्ति। यथा-अभिधा-लक्षणा-व्यञ्जना चेति। अभिधां तु सर्वेऽपि स्वीकुर्वन्ति। शास्त्रानुसारं लक्षणाव्यञ्जनयोः अन्यतरस्याः शक्तेः पृथक्शक्तितया स्वीकारो नास्ति, किन्तु व्यवहारस्तु दृश्यत इति वयमत्र विमृशामः। तद्यथा-

१. व्याकरणशास्त्रे अभिधा व्यञ्जना चेति शक्तिद्वयं स्वीक्रियते। किन्तु अभिधाव्यञ्जनाभ्यां सह लक्षणाया अपिनिरूपणं परमलघुमञ्जूषायां लभ्यते।
२. मीमांसाशास्त्रे शक्तित्रयस्य कल्पना कृता वर्तते, व्यञ्जनाव्यतिरिक्ता अभिधा-तात्पर्य-गौणीवृत्तयः इति।
३. नैयायिकाः शब्दशक्तित्वेन व्यञ्जनां परिहृत्य अभिधा लक्षणा चेति द्वे एव वृत्ती अभ्युपगच्छन्ति।
४. आलङ्कारिकास्तु शब्दार्थयोः साहित्यप्रतिपादनपूर्वकं सामान्यतः शब्दस्य अर्थं प्रति त्रिविधव्यापारवशात् तिस्रः शक्तीः मन्वते अभिधा-लक्षणा-व्यञ्जना चेति। व्याकरणादि-शास्त्रेषु शक्तिपदेन अभिधा-शक्तिरेव उपादेया वर्तते। वृत्तिपदेन तु अभिधादीनां तिसृणां ग्रहणं भवति।

**व्याकरणशास्त्रदृशा अभिधावृत्तिः**

तत्र सूत्रभाष्यादिपर्यालोचनेन 'तादात्म्यरूपा एव पद-पदार्थयोः शक्तिः' स्वीकृता। यथा सूत्रकारः 'वृद्धिरादैच्[1]' 'अदेङ्गुणः[2]' इत्यनयोः सूत्रयोः शक्तिग्राहकयोः समानविभक्तेः निर्देशम् अकरोत्। यथा 'नीलो घटः' इत्यत्र तादात्म्यसम्बन्धेन[3] नीलविशिष्टो घट इति उपलब्धिः, तथैव इहापि तादात्म्यसम्बन्धस्य एव शक्तिता अभ्युपेता। अत्र 'वृद्धिरादैच् इति सूत्रे भाष्यकारोऽपि आह द्वयोरेव सामानाधिकरण्यम्, विशेषणविशेष्ययोः वा,

1. अष्टा,१/१/1/१
2. तत्रैव, १/१/२
3. व्यु.वा., संसर्गतामतम्, कार.प्र.

संज्ञासंज्ञिनोः वा'[1] इति। नागेशभट्टोऽपि उद्योते लिखति-'तादात्म्यमेव शब्दार्थयोः शक्तिः[2]' इति।

हरिवृषभो वाक्यपदीयटीकायां स्पष्टम् आचष्टे– '**तादात्म्यमेव** शब्दार्थयोर्नादाभिव्यक्तस्यान्तः करणसन्निवेशिनः शब्दस्यार्थबोधने कारणम्[3]' इति।

भर्तृहरिरपि शक्तिं निरूपयति –यथा

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा[4]॥ इति।

भर्तृहरिः बोधजनकत्वरूपां योग्यतामेव शब्दनिष्ठां शक्तिं मन्यते। एतन्मतमेव आददानाः भट्टोजिदीक्षितकौण्डभट्टप्रभृतयो दृश्यन्ते[5]। परम-वैयाकरणः नागेशभट्टस्तु तार्किकयुक्तिभिः बोधजनकत्वस्य सम्बन्धत्वं दूषयन् शब्दार्थोभयनिष्ठं वाच्यवाचकभावलक्षणसम्बन्धं शक्तिरूपतया अभ्युपेत्य तादात्म्यस्य तद्द्योतकत्वमेव सिद्धान्तपरतया न्यरूपयत्। वैयाकरणानां मते तादात्म्यस्य स्वरूपं भवति-'तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमेव तादात्म्यम्' इति। शब्दस्य अर्थेन सह भेदः वास्तविकः, यः अभेदः स तु आरोपितः कल्पितश्च भवति। वाक्यपदीयस्य टीकायां हरिवृषभः तदेव-व्याख्याति-'बुद्ध्या गृहीतार्थप्रतिपादनाय शब्दप्रयोगादर्थः शब्दस्य निमित्तम्, कार्यकारणयोश्चाभेदाध्यवसायात् सोऽयमिति प्रतीयमानं तादात्म्यम्' अत्र कार्यकारणयोरभेदाध्यवसायादिति वचनेन अभेदांशस्य अध्यासत्वं सूच्यते। इदं स्वरूपं मञ्जूषायां नागेशेन वर्णितम्[6]। भेदविवक्षया 'अस्य अर्थस्य अयं शब्दो वाचकः' इत्यादिप्रकारेण व्यवहारः प्रचलति। अभेदविवक्षया तु देवदत्तोऽयम्

1. महाभाष्य,नवा, १/१/१
2. महा.,उ.टी.,१/१/१
3. वा.प.,१/२४-२६
4. वाक्य.,३/३/३९
5. भूषण., श.नि.
6. लघु,,श.नि.,पृ.२५

इति व्यवहारः सङ्गच्छते। योगदर्शनस्य भाष्यकारमतेतादात्म्यस्वरूपमेव शक्तिः। तदुक्तं पातञ्जलभाष्ये– 'सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्दः'[1] इति। न्यायदर्शने तादात्म्यम्- 'अभेदः, स च स्वनिष्ठोऽसाधारणो धर्मस्तद्व्यक्तित्वादिरूपो बोध्यः' इति प्रतिपादितम्। गदाधरोऽप्याह यत् – स्वसामानाधिकरण्य-स्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टं यत् तदन्यत्वरूपं तादात्म्यम्[2]इति। मीमांसादर्शने तु वास्तवभेदाभेदघटितमेव तादात्म्यम् आहुः।

अद्वैतदर्शनेऽपि अभेद एव तादात्म्यम् इति उपपादितम्।

क्वचित् शब्दनिष्ठा सा वाच्यवाचकभावा शक्तिः नानार्थकस्थले संयोगादिभिः हेतुभिः कस्मिंश्चिद् एकस्मिन्नर्थे नियता भवति। यथोक्तं भर्तृहरिणा–

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।<br>
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥<br>
सामर्थ्यमौचिती देशः कालो व्यक्तिस्स्वरादयः।<br>
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[3] ॥ इति।

एते संयोगविप्रयोगादयो नानार्थकशब्देषु सत्सु अस्य शब्दस्य अयमर्थः इति नियमनेन विशेषार्थस्य निर्णायका भवन्तीति।

सा शक्तिः त्रिविधा विभज्यते। रूढिः योगो योगरूढिश्च।

१. रूढिः- 'शास्त्रकृत्कल्पितावयवार्थप्रतीत्यां प्रकृतिप्रत्ययसमुदायबोधिका रूढिः' यथा- मणिनूपुरादौ।

२. योगः-शास्त्रकृत्कल्पितावयवार्थमात्रबोधिका शक्तिः योगः यथा पाचकादौ।

---

1. लघु., श.नि., पृ.२५
2. व्यु.वा., का.प्र.
3. वाक्य.२/३१७-३१८

३. योगरूढिः-शास्त्रकृत्कल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तिः योगरूढिः। यथा पङ्कजपदे इति स्पष्टम्।

**मीमांसाशास्त्रदृशा अभिधावृत्तिः**

मीमांसाशास्त्रे वाच्यवाचकभावरूपैव शक्तिः पदपदार्थयोः अभ्युपेता वर्तते। एवमुक्ते सति अन्योऽन्याश्रयदोषापत्तेः, यथा-शब्दनिष्ठशक्तिज्ञाने सत्येव शाब्दबोधः, शाब्दबोधे च शक्तिस्वरूपज्ञानम् अतः अन्योऽन्याश्रयदोषो जायतेइति। कथमिदं शक्तिस्वरूपं साधु स्यादित्यत्र शास्त्रदीपिकाकारः समाधत्ते- "अस्ति तु सम्बन्धः प्रत्याय्यप्रत्यायकत्वलक्षणः, अस्त्येव सम्बन्धान्तरे स्वभावत एव शब्दोऽर्थस्य प्रत्यायकः, अर्थश्च प्रत्येयः इत्ययमेव सम्बन्धो भविष्यति[1]" इत्युक्ते स्वभावसिद्धतया तत्र दोषः निराक्रियतेइदमेव भर्तृहरिरप्याह वाक्यपदीये-'अनादिर्योग्यता तथा' इत्यत्र अनादिपदेन[2]। अतः अनादितया स्वभावसिद्धतया तत्र दोषलेशः न भवति। श्लोकवार्तिके चित्राक्षेपाधिकरणे कुमारिलभट्टः शक्तिपदार्थं विवेचयति –

अभिधानक्रियायां हि कर्मत्वं वाच्यसंश्रितम्।
शब्दानां करणत्वं वा कर्तृत्वं वा निरूपितम्[3] ॥

अभिधानरूपक्रियायां शब्दगतकरणत्वकर्तृत्वान्यतरस्य वाच्यसंश्रित-कर्मत्वस्य एव निरूपणं भवतीत्याशयः। तदेव विशदयति टीकाकारः उम्वेकभट्टः-यथा च दीपशते सत्यपि अन्धानां रूपादिदर्शनाभावं दृष्ट्वा चक्षुषि वर्तमाना शक्तिरेव दर्शने घटादिप्रत्यक्षे कारणमिति निश्चीयते, तथा एकेन शब्देन एकार्थाभिधानान्यार्थानभिधानरूपान्वय-व्यतिरेकाभ्यां शब्देऽपि तादृशी शक्तिरेव तत्कारणतया स्वीक्रियते। एषा च शक्तिः शब्दे स्वाभाविकी। यदर्थस्याभिधानं शब्दस्य श्रवणमात्रादेवावगम्यते। स श्रुत्यावगम्यते। श्रवणं श्रुतिः इति। यच्चोक्तं वार्तिककारैः 'श्रुतिरेव ह्यत्रैकं प्रमाणम्। सा तु

---

1. शा.दी., प्र.पा.पृ.३५६-३५८
2. वाक्य,३/३/२९
3. श्लो.वा.२७,पृ – ४३२

ग्रहणोपायषट्कानुरोधेन षड्विधा अवतिष्ठते'। तत्र प्रत्यक्षगृहीतानि यान्यक्षराणि विनियुज्यन्ते, श्रोत्रवृत्तित्वात् सा श्रुतिरित्युच्यते। श्रुत्याख्येयं त्रिधा,अभिधात्री विनियोक्त्री विधात्री चेति।

यदुक्तं कुमारिलभट्टेन–

अभिधात्री श्रुतिः काचिद्विनियोक्त्र्यपरा तथा।
विधात्री च तृतीयोक्ता प्रयोगो यन्निबन्धनः ॥

त्रिविधापि इयं श्रुतिः मीमांसकानां मते अभिधाविज्ञाने अन्तर्भवति। इयञ्च पदार्थान्तरमिति मीमांसकाः। सैव विश्वजनिका शक्तिरिति[1]।

**न्यायशास्त्रदृशा अभिधावृत्तिः**

तर्कशास्त्रे वर्णितशक्तिस्वरूपं शास्त्रकारैः विद्वद्भिः बहुधा पर्यालोच्य परिष्कृतशैल्या संवर्द्धितं, तस्मात् अद्यापि एतज्ज्ञानाय कोमलधीभिः जाटिल्यम् अनुभूयते। ततः किञ्चित् विमृश्यते- न्यायदर्शने पदेन पदार्थस्य सम्बन्ध एव शक्तिः। सम्बन्धश्च 'अस्माच्छब्दात् अयमर्थो बोद्धव्यः' इत्याकारिका या पदजन्यबोधविषयत्वप्रकारिका अर्थविशेष्यिका ईश्वरेच्छा'। यद्वा 'अयं शब्दः अमुमेवार्थं बोधयतु' इत्याकारा अर्थविषयकबोधजनकत्वप्रकारिका पदविशेष्यिका ईश्वरेच्छा, तद्वान् सम्बन्ध एव शक्तिः[2] इति प्राच्यनैयायिकानां सिद्धान्तः। तत्र उक्तस्वरूपेण नव्यनैयायिकानां मते देवदत्तादिषु पदेषु शक्तिस्वरूपं न घटते। यतो हि पश्चादुत्पन्नेषु देवदत्तयज्ञादिपदार्थेषु ईश्वरेच्छायाः अभावात्। उक्तलक्षणे ईश्वरीयत्वविशेषणम् इच्छापदस्य न युक्तम्[3]। तस्मात् नव्या नैयायिकाः तत्र विप्रतिपत्तीः उद्भाव्य तल्लक्षणं किञ्चित्परिष्कृत्य शक्तिपदार्थं निरूपयन्ति। –तद्यथा-'इच्छामात्रं शक्तिः[4]' इति। तस्याः इच्छायाः

---

1. तत्रैव
2. शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा चाऽस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा॥ मुक्ता., शब्दप्रमाणनिरूपणम्, पृ. ५.
3. शक्ति., सामान्यका.
4. नव्यास्तु ईश्वरेच्छा न शक्तिः किन्तु इच्छैव, तेनाधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः। मुक्ता. शब्दप्रमाणनिरूपणम्, पृ.०८

विषयत्वलक्षणः सम्बन्धः पदे पदार्थे सम्बन्धे जन्यजनकभावेबुद्धेः एषां सर्वेषां बोधकत्वं बोध्यत्वं वा अवस्थितम्। नव्यानां मते बोधनिरूपितजनकतावत्त्वेन विषयो वाचकः, बोधविषयत्वेन विषयो वाच्यः, जन्यजनकभाव इति तयोः सम्बन्धः इत्यादौ न वाचकत्वस्य अतिप्रसक्तिः अथवा तादृग्बोधविषयवान् बोध एव शक्तिः इत्यपि तेषां सिद्धान्तसारः।

**काव्यशास्त्रदृशा अभिधावृत्तिः**

भामहप्रणीते **काव्यालङ्कारे** स्पष्टतया शब्दशक्तिविचारो नोपलभ्यते। तत्र शब्दार्थयोरुभयोरपि तुल्यमेव महत्त्वं प्रादायि[1]। भामहाचार्यः काव्यकलनसहकारिकारणानि विवेचयन् 'शब्दाश्छन्दोऽभिधानार्थाः' इति कथयन् मुख्यामुख्यार्थविषयत्वेन शक्तिस्वरूपं किञ्चिल्लक्षयते।

काव्यादर्शे **दण्ड्याचार्यः**शब्दशक्तिविषये किमपि स्पष्टतया नोदलिखत्। किन्तु तत्र काव्यानुप्रयोगे शब्दशक्तेः महत्त्वं भूयः दृश्यते। अलङ्काराणां गुणानाञ्च विवेचनावसरे अभिधाशक्तेः विषये मूलग्रन्थे, प्राचीनासु टीकासु वा किमपि नोपलभ्यते।

उद्भटविरचित**काव्यालङ्कारसारसङ्ग्रहे** अभिधालक्षणादिरूपेण शब्दशक्तिप्रकारः न प्राप्यते। तद्वृत्तिकारेण प्रतीहारेन्दुराजेन अर्थाभिधानक्रमः अलङ्कारविषयान्तर्गतत्वेन चर्चितः। रूपकाऽलङ्कारे गुणवृत्तिशब्द उद्भटेन कारिकायां प्रयुक्तः। पर्यायोक्त्यलङ्कारनिरूपणावसरे वाच्यवाचकवृत्तिः' इति शब्दः अभिधावृत्यर्थे प्रायुज्यत[2]।

**काव्यालङ्कारसूत्रवृत्तौ** वामनाचार्यः ग्रन्थस्य शरीरमिति प्रथमेऽधिकरणे काव्यलक्षणनिर्वचनप्रसङ्गे अलङ्कारात् काव्यानि ग्रहीत-व्यानि भवन्तीति उदीर्य वृत्तौ काव्यशब्दं निर्वक्ति[3]।

- आचार्यरुद्रटविरचिते **काव्यालङ्कारे** सप्तमेऽध्याये काव्यलक्षण-

1. भामह. अ.प्र.प.का.१५
2. का.सा.ल., पृ.५१
3. का.सू.,१/१/१

मभिधाय अभिधेयं निरूपयति[1]। एतन्मते वृत्तिशब्दः व्यापारार्थे प्रयुक्तः। अत एव वाक्यं तत्राभिमतपरस्परं सव्यपेक्षवृत्तीनाम् इत्युपस्थापने वृत्तिशब्दः प्रयुक्तो लक्ष्यते। अभिधेयस्य अर्थस्य शब्दो वाचको भवतीत्यर्थः।

- **ध्वन्यालोके**' काव्यस्यात्मा ध्वनिरिति' उद्धुष्य ध्वनिविषयकवाद-मवतार्य आनन्दवर्धनाचार्यः तदभाववादं भाक्तवादम् अनिर्वचनीयवादं चेति निरूप्य तदनुसारेण शब्दार्थविषयकचर्चायां शब्दशक्तिविषयं दर्शयामास। लोचने च अभिनवगुप्तपादाचार्यः वाक्छब्दमभिधा-व्यापारपरतया सहकारिभेदेन शक्तिपदार्थं[2] लक्षयामास। यथा उच्यते अनया इति वाक् अभिधाव्यापारः इति।

- **काव्यमीमांसायाम्** राजशेखरः पदवाक्यविवेकनाम्नि षष्ठाध्याये शब्दार्थयोस्स्वरूपं विचारयन् व्याकरणस्मृतिनिर्णीतं निरुक्त-निघण्ट्वादिभिर्निर्दिष्टं च शब्दतया प्राह। तस्मात् पुनः अभिधेयोऽर्थ उच्यते इति तत्सिद्धान्तः। स पदनिरूपणानन्तरं पदसन्दर्भो[3] वाक्य-मित्यभिधाय, वाक्यस्य त्रिधा अभिधाव्यापार इति निर्णयतामौद्भटानां सिद्धान्तं स्मरति[4]।

- मीमांसाशास्त्रानुयायी**मुकुलभट्टः अभिधावृत्तमातृकायां** शब्दस्य द्वौ अर्थौ, मुख्यः अमुख्यश्च इति स्वीकुर्वन् अभिधां दशधा विभज्य तदन्तः लक्षणां समावेशयत्।

- **व्यक्तिविवेके** ग्रन्थकारः ग्रन्थस्य प्रथमविमर्शे सर्वविधं ध्वनिम् अनुमानेऽन्तरभावयत्। ततः तृतीये विमर्शे प्रतीयमानमर्थम् अनुमित्या

---

1. रुद्रट, पृ.७१
2. ध्व.लो.,पृ.५४
3. का.मी..अध्य.०६
4. तत्रैव

उपादाय लक्षणावृत्तिं तस्य हेतुतया तत्रैव निरूप्य शब्दस्यएकां शक्तिम् ऊरीकृत्य व्यञ्जनावृत्तिखण्डनपूर्वकम्स्वसिद्धान्तम् प्राकाशयत्।

- भोजराजः श्रृङ्गारप्रकाशं सरस्वतीकण्ठाभरणञ्च व्यरीरचत्। तत्र श्रृङ्गारप्रकाशे सप्तमे प्रकाशे शब्दार्थसम्बन्धं द्वादशविधं मत्वा मुख्या गौणी लक्षणेति वृत्तित्रयं निरूपितवान्। अलङ्कारशास्त्रे प्राप्तः प्रथमः काव्यशास्त्रपरकः ग्रन्थः भामहप्रणीतः काव्यालङ्कारो वर्तते। भामहाचार्यादारभ्य भोजराजपर्यन्तं शब्दशक्तिविवेचनं सङ्कुचितं परिलक्ष्यते। तदनन्तरम् मम्मटात्प्रभृति-जयदेव-विश्वनाथाप्पय्यदीक्षित-जगन्नाथाशाधरभट्टानां ग्रन्थेषु विशदतया शब्दशक्तिविचारो दरीदृश्यते। अतः तत्तद्वृत्तिनिरूपणावसरे तत्तल्लक्षणमुपस्थापयिष्यामि।
- वृत्तिविचारे रुय्यकः **साहित्यमीमांसायां** वृत्तिसामान्यस्य लक्षण-मुदित्वा वृत्तित्रयं निरूपितवान्। यथा – 'वृत्तिः पदानां व्यापारः पदार्थप्रतिपादने' इति। स मुख्या लक्षणा गौणी चेति वृत्तित्रयं स्वीकरोति। काव्यशास्त्रे प्रायः तिस्रः शब्दशक्तयस्स्वीकृताः सन्ति, किन्तु तात्पर्यादीनां वृत्तित्त्वं स्वीकर्तुं मम्मटादिना कुत्रापि स्पष्टोल्लेखो न कृतः। अपि तु लोचनकारः अभिधा तात्पर्यं लक्षणा व्यञ्जना चेति वृत्तिचतुष्टयम् अवदत्। यतो हि तात्पर्याख्या वृत्तिः पार्यन्तिक-प्रतीयमानार्थप्रतीत्यर्थं विशेषव्यापारं न धत्ते। विशेषसाहाय्याभावात् मम्मटाचार्येण वृत्तिरेषा नोल्लिखिता।

**अभिधाशक्तिः**

शब्दशक्तेः आद्यः भेदः अभिधा। शब्दस्य अर्थबोधकाः सर्वेऽपि व्यापारा अभिधासंज्ञका इति कश्चन पक्षः। प्रथम एव व्यापार अभिधाव्यापार इति अपरपक्षः। अभिधाशब्दस्य व्यापारमात्रपरत्वे सति तस्याः शब्द-व्यापारत्वम्। प्रथमव्यापारत्वे तस्याः शब्दव्यापारमात्रपरत्वेन अन्यव्यापारा अमुख्यगौणादयः स्वीक्रियमाणा अपि अभिधाव्यापारमुखा एव आसन् इति व्यापारविचारपद्धतिः भोजराजपर्यन्तमासीत्। काव्यशास्त्रीयेषु आचार्येषु भट्टोद्भट-वामन-मुकुलभट्ट-भट्टनायक-कुन्तक-महिमभट्टादयः आचार्याः

अभिधायाः पृथग्वृत्तित्वमभ्युपगच्छन्तीतितत्स्वरूपम् – वाच्यवाचकभावरूप-सम्बन्धाश्रिता शब्दस्य शक्तिरभिधा। वाचकः शब्दः, वाच्यः अर्थः। वाचकशब्दः समयापेक्षया वाच्यार्थमभिदधाति। समयत्वञ्च साक्षात्सङ्केतितत्वम्। साक्षात्सङ्केतितोऽयमर्थः शब्दस्य प्रसिद्धोऽर्थः। यथा – रामइति शब्दस्य प्रसिद्धोऽर्थः दाशरथिः, सीताइत्यस्य च तद्भार्या जानकी इति। शब्दे सन्निहिता प्रसिद्धार्थाभिधायिकेयमेव शक्तिः, दण्डिभामहोद्भटरुद्रटवामनैः 'अभिधा' पदेन प्रयुक्ता। आनन्दवर्धनाचार्यः इमां शक्तिं वाचकत्वेनाभिदधाति। राजशेखरमम्मटादयोऽपि ताम् अभिधामेव व्यपदिशन्ति।

अभिधापदम्– अभि =अभिमुखाय, धा+क्त+टाप् = निहिता। अर्थात् अभिमुखाय प्रसिद्धार्थाय शब्दे निहिता शक्तिरभिधा। वाचकशब्दस्य या वाचकक्रिया सैवाभिधा, 'प्रकृत्यर्थे विशेषणीभूतस्येव भावपदार्थत्वात्' इति नियमात् यथा दण्डत्वमिति पदे दण्डः प्रकृतिः,तत्र विशेषणीभूतः दण्डः एव त्वप्रत्ययेन कथ्यते। एवमेव वाचके विशेषणं वाचकक्रिया। एवं वाचकत्वमपि अभिधापदवाच्यम्। भावपदार्थदृष्ट्या अभिधायकत्त्वम् अभिधैव। अभिधया ज्ञेयोऽर्थः अभिधेय इत्युच्यते। एवमभिधायाः शब्दार्थव्यापारदृष्ट्या सरणिः निम्नलिखिता अस्ति। यथा –

| शब्दः | व्यापारः | अर्थः |
|---|---|---|
| अभिधायकः | अभिधायकत्वम् | अभिधेयः |
| वाचकः | वाचकत्वम् | वाच्यः |
| सङ्केतवान् | सङ्केतः | सङ्केतितः |
| शक्तः | शक्तिः | शक्यः |
| मुख्यः | मुख्यः | मुख्यः |

काव्यशास्त्रे शक्तिरितिपदम् अभिधार्थे प्रयुज्यते। यथा "मुक्ताहाराय हारमात्रम्" इत्यादौ। आनन्दवर्धनो लोचनकारश्च अभिधायकस्थाने अभिधानमिति पदम् प्रयुयुजाते। मुकुलभट्ट-कुन्तक-महिमभट्ट-भोजराजाः तां

वृत्तिसामान्यत्वेन वर्णयन्ति। अन्ये च काव्यलक्ष्मविधायिनः अभिधावृत्तिं स्वकृतिषु उपपादयामासुः। तेषां च अभिधालक्षणं निम्नरूपेण उपस्थापितमस्ति।

अभिधालक्षणम् –

1. आनन्दवर्धनः मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम् इत्युक्त्वा मुख्यवृत्तिपरतया अभिधां प्रादर्शयत्[1]।
2. प्रतिहारेन्तुराजः अभिधां वाच्यार्थप्रतिपादिकां वृत्तिं कथयति। 'वाच्यवाचकस्याभिधायकस्य शब्दस्य वृत्तिर्व्यापारो वाच्यार्थ-प्रत्यायनम्'[2]|
3. लोचनकारः तत्स्वरूपं निर्धारयन् लिखति 'समयापेक्षयावाच्यार्थाव-गमनशक्तिरभिधा[3]' इति।
4. मम्मटः काव्यप्रकाशस्य द्वितीयोल्लासे मुख्यार्थप्रतिपादिकां वृत्तिं कथयति – "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते[4]" इत्युक्ते साक्षात्सङ्केतितरूपमुख्यार्थस्य बोधनरूपः शब्दस्य व्यापारः अभिधा इति।
5. अभिधायाः लक्षणविषयेसुधासागरकारः श्रीवत्सलाञ्छनभट्टाचार्यस्य मतं वर्णयति तद्यथा – 'अभिधत्ते अभिधागृहीतसंस्कारसहकृतः सन् स्मारयति'[5]तेन नानार्थव्यञ्जके नातिव्याप्तिः।
6. साहित्यचूडामणिकारः एवं वदति यत् 'अभिधा ह्यर्थप्रत्युन्नेयं शब्दोच्चारणम्'।
7. साहित्यमीमांसकारः पदमात्रवृत्तित्रयं स्वीकृत्य अभिधास्वरूपमाह-

---

1. ध्वन्या.१/१० पृ-१६६
2. का.सा.,ल.,.
3. ध्व.लो.पृ.५४
4. का.प्र.२/८पृ.५०
5. का.प्र.सु.सा.टी.पृ.४९

'वृत्तिः पदानां व्यापारः पदार्थप्रतिपादने।
सा मुख्या लक्षणा गौणीत्येवं त्रैविध्यमास्थिता[1]' ॥इति।

मुख्यार्थप्रतिपादिका वृत्तिः मुख्येति अवोचत्।

8. अलङ्कारसर्वस्वे रुय्यकोऽपि अभिधां प्रथमवृत्तित्वेन अङ्गीकृत्य, तां विशेषतया न प्रतिपादयति। तट्टीकाकारः विमर्शनीकर्ता जयरथः अभिधां मुख्यव्यापारत्वेनैव सूचयति – 'समयापेक्षया वाक्यार्थस्य ज्ञानाय अभिधाशक्तिः[2] प्रवर्तते' इति।
9. साहित्यमीमांसायां रुय्यकेन अभिधा इत्थमुक्ता- अर्थमव्यवधानेन स्पृशन्ती मुखवर्तिनी। मुख्यावृत्तिर्वदन्त्येनामभिधेति विपश्चितः[3]।
10. काव्यानुशासने हेमचन्द्रः वृत्तिचतुष्टयं स्वीकुर्वन् अभिधां लक्षयति 'समयापेक्षवाच्यगमनशक्तिरभिधा[4]' इति।
11. जयदेवः चन्द्रालोके असन्दिग्धस्यार्थस्य प्रतिपादिकां वृत्तिमभिधां कथयति

धर्मं किञ्चित्पुरस्कृत्य प्रायः शब्दो प्रवर्तते।
यथार्थस्पष्टमाचष्टे शब्दस्तामभिधां विदुः ॥
न योगादेरायतनं न सङ्केतनिकेतनम्।
वृत्त्या निर्देशशब्दोऽयं मुख्यया स्वाभिधेयया[5] ॥

12. भावप्रकाशने शारदातनयोऽभिधां वाच्यवाचकव्यपाररूपां प्रथमामेव वृत्तिं कथयति-

'शब्दशक्तिपरामर्शतद्व्यापारात्मिका बुधैः।
अभिधेये प्रवृत्तिर्या सा वृत्तिरभिधीयते[6] ॥

---

1. सा.मी.पृ.३
2. अ.स.,विमर्शिनी टीका
3. सा.मी,,२/१०
4. हे.का.अनु.,पृ. ४१
5. चन्द्रा,१०/१/४,
6. भाव.,ष.अ.,पृ.२२१

13. अलङ्कारमहोदधौसाक्षात्सङ्केतितजात्यादिचतुष्टयार्थावबोधनपरा शक्तिरभिधा उक्ता–

तैरुक्तो यः मुख्यार्थः शब्दस्तस्याभिधायकः।
व्यापारत्वमभिधेयस्य तमर्थमभिधास्यतः[1] ॥

14. विद्यानाथेन **प्रतापरुद्रयशोभूषणे** "सङ्केतितार्थगोचरः शब्द-व्यापारोऽभिधा[2] इति प्रतिपादितम्। सा च रूढिपूर्विका योगपूर्विका चेति द्विविधा मता।

15. एकावलीकारो विद्याधरोऽपि अभिधां न्यरूपयत् यत् – "व्यापारोऽपि च मुख्योऽभिधीयतेऽस्याभिधारूपः"[3]।

16. साहित्यदर्पणकारः अभिधां निगदति। यथा-

'साक्षात्सङ्केतितार्थस्य बोधनादग्रिमाभिधा[4]'। इति

17. शोभाकराचार्यः अलङ्काररत्नाकरे 'मुख्यार्थप्रतिपादनकर्त्री वृत्तिरेवा-भिधा' इति उक्त्वा तत्स्वरूपं दर्शितवान्। यथा- 'अनन्वितत्वात्कार्या-देर्वाच्यत्वं न प्रकल्पते' इति । मुख्यार्थमाकाङ्क्षतया प्रतीतिः इति च ।

18. पण्डितराजजगन्नाथः रसगङ्गाधरस्य द्वितीयानने 'शक्त्याख्योऽर्थस्य शब्दगतः शब्दस्य च अर्थगतो वासम्बन्धविशेष' इति अभिधां न्यरूपयत्। तस्याश्च त्रयो भेदाः – केवलसमुदायशक्तिः केवलावयव-शक्तिः समुदायावयवशक्तिश्चेति।

19. साहित्यसुधासिन्धौ वाच्यार्थप्रतिपादिका वृत्तिरभिधा प्रोक्ता [5]।

20. अप्पय्यदीक्षितेन शब्दशक्तिविवेचके वृत्तिवार्तिके 'शक्त्या प्रतिपादकत्वमभिधा'[6] इति अभिधां निरूप्य रूढि-योग-रूढियोगः

---

1. अ.महो., द्वि. तर. पृ.१४
2. प्रताप, काव्यप्रकरण, पृ३५-३६.
3. एका., द्वि. उन्., पृ.५०-५२
4. सा.द. द्वि.प., का.४ पृ.३१
5. सा.सु.पृ.\३२
6. वृ.वा.,पृ. १

इति तत्प्रकाराः वार्णिताः। एवंविधा अभिधापरिभाषाः प्राचीनार्वाचाचीनालङ्कारिकैः व्यक्ताः। तन्निष्कर्षः एष एव –सङ्केतितार्थप्रतिपादनपर्यवसितव्यापारः अभिधेति। शब्दशक्तिविषये आचार्यमम्मटस्य मतं सर्वजनहृदयग्राहि काव्यशास्त्रे आदृतं वरीवृत्यते। शक्तित्रैविध्यम् अर्थत्रैविध्यं शब्दत्रैविध्यञ्च प्रसिद्धमेवास्ति। तदेव वदति साहित्यदर्पणकारः -

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥
अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः [1]॥

मम्मटोऽपि – स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा वाच्यादयस्तदर्थाःस्युः इत्याह। अर्थात् शब्दः, अर्थः, शक्तिश्च त्रिविधः इति। यथा-

| **शब्दः** | **शक्तिः** | **अर्थः** |
|---|---|---|
| अभिधायकः/वाचकः | अभिधा | अभिधेयः/वाच्यः |
| लाक्षाणिकः/लक्षकः | लक्षणा | लक्ष्यः |
| व्यञ्जकः | व्यञ्जना | व्यङ्ग्यः/प्रतीयमानः |

इत्यभिधानिरूपणावसरे केचनांशाः पठिताः सन्ति।

वाचकशब्दस्वरूपं वर्णयति मम्मटाचार्यः। यथा –

'साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः'[2]। 'इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एवशब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः' इति। अगृहीतसङ्केतः शब्दः सङ्केतसहायं विना अर्थप्रतीतिं न कारयति। अतः यमर्थमुद्दिश्य शब्दः प्रयुक्तःस गृहीतसङ्केतग्रहः अवश्यं स्यात्। सङ्केतः सञ्जातः अस्मिन्निति

---

1. साहित्यदर्पण, परि, द्वि, का.२-३
2. का.प्र., विश्वेश्वरी. द्वि. उ.,का.७

सङ्केतितार्थः 'तदस्य सञ्जातं तारकादिभ्य इतच्'[1] इति सूत्रेण इतच्प्रत्ययेन सङ्केतितार्थः पदं सिद्ध्यति। अभिधाशक्तिं बोधयितुं मम्मटाचार्यः सङ्केतः, सङ्केतग्रहोपायः, सङ्केतितार्थश्च इत्येतान् विषयान् सविशदं विवेचयामास। 'सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा, इति सः सङ्केतितार्थः जातिगुण-क्रियायदृच्छाभेदेन चतुष्प्रकारको भवति इत्याह। सङ्केतग्रहस्य अष्टौ उपायाः शास्त्रकारैः प्रोक्ताः। तथाहि –

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निद्ध्यतः सिद्धपदस्य वृद्धाः[2] ॥

इति। व्याकरण-उपमान-कोश-आप्तवाक्य-व्यवहार-वाक्यशेष-विवृति-सिद्ध-पदानि इमानिसङ्केतग्रहस्यकारकाणि भवन्ति।

1. व्याकरणम् – 'भू सत्तायाम्' 'साधकतमं करणम् इति सूत्रनिर्देशेन ज्ञायते यत् भूधातोः सत्तारूपः अर्थः, प्रकृष्टोपकरणस्य करणत्वमित्यतः पदानां सङ्केतः ज्ञायते।
2. उपमानम् – 'यथा गौस्तथा गवयः' इति वाक्यं कस्माच्चित् आरण्यकात् श्रुत्वा गाम् अन्विष्यन्वनं प्राप्य गवयं दृष्ट्वा आरण्यकीयं वाक्यं स्मृत्वा दृश्यमाने नीलविशेषप्राणिनि गवये सङ्केतमवधारयति।
3. कोशः – चर्मावनद्धम् उडुपं प्लवः काष्ठं करण्डवत् इति कोशोक्त्या चर्मनिर्मितयन्त्रविशेषे उडुपस्य सङ्केतः ,काष्ठनिर्मिते यन्त्रे प्लवस्य सङ्केतः इति कोशादिज्ञानेन सङ्केतग्रहः जायते।
4. आप्तवाक्यम् – गां बधान अश्वमानय इति वाक्यं श्रुत्वा दृष्ट्वा चबालस्य यथासङ्केतग्रहणं भवति।
5. व्यवहारः – अत्यन्तं मुख्यसङ्केतग्रहो वर्तते कः शब्दः कस्मिंल्लिङ्गे प्रयुज्यते इति।
6. वाक्यशेषे – यवमयश्चरुर्भवतीत्यादि वाक्यशेषात् होमपात्रविशेषे सङ्केतो

1. अष्टा., ५/२/३६
2. मुक्ता. पृ.८

भवति।

7. विवृतिः – विवरणम्, अर्थात् व्याख्याकरणेनापि सङ्केतस्य ग्रहणं भवति।
8. सिद्धपदसान्निध्यम् – ज्ञातार्थपदद्वारा अज्ञातार्थपदानां ज्ञानं भवति तत्रापि सङ्केतग्रहः।

सङ्केतितार्थः जातिर्वा गुणो वा क्रिया वा यदृच्छा वेतिसमाधीयते – सङ्केतितार्था इमे चत्वारः सन्ति किन्तु तत्तच्छास्त्रविवेचनकर्तृभिः स्वीयसम्प्रदायानुगुणं स्वीकृताः सन्ति।

1. मीमांसकानां मते सङ्केतः जातौ।
2. नैयायिकानां मते सङ्केतो जातिविशिष्टव्यक्तौ।
3. वैयाकरणनां मते सङ्केतो जात्यादिषु चतुर्षु।
4. काव्याशास्त्रिणां मतेऽपि सङ्केतो जात्यादिषुचतुर्षु।

मीमांसकानां मतानुसारेण सङ्केतः जातौ भवति अर्थात् गौरिति शब्दः गोत्वजातिप्रत्यायको भवति। यतो हि तन्मते शब्दस्यार्थः आकृतिर्भवति। उक्तञ्च मीमांसाभाष्यकारेण शबरस्वामिना यत् 'द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिः'इति[1]। अभिधावृत्या शब्दस्य सर्वप्रथमम्जातिरूपः पदार्थः उपपाद्यते। मम्मटः तं सङ्केतितार्थं 'सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा' इत्यनेन चतुर्विधं स्वीकरोति। व्यक्तिवादिनां मतमालोचयितुं उपक्रमते काव्यप्रकाशकारः। तत्र स सङ्केतग्रहणे आनन्त्यादिदोषदर्शनस्थलं दिशति - 'यद्यप्यर्थक्रियाकारितया प्रवृत्ति-निवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्यात् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यते'। गौः शुक्लश्चलो डित्थः इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः"। इत्युक्ते यदि गोशब्दस्य सङ्केतो गोव्यक्तौ स्वीक्रियते तर्हि, गौरितिपदोच्चारणेनएकः गोव्यक्तिपदार्थः भासते, द्वितीयगोव्यक्तिज्ञानकरणाय स शब्दः पुनः उच्चार्यः। एवं नानागोव्यक्तिषु सङ्केतावधारणाय अनेकेषां गोशब्दानाम् उच्चारणेन अनन्तायाः

1. मी.सू..पृ.१.३.३३, 'आकृतिः शब्दार्थः कुतः क्रियार्थत्वात्' शा.भा.मी.द. २, पृ.२४५

अभिधाशक्तेः कल्पना अपेक्षितव्या। ततोऽभिधाया आनन्त्यदोषः। द्वितीयः दोषः-व्यभिचारदोषः- व्यभिचारो नाम साध्याभाववद्वृत्तित्वम्, नियमोल्लङ्घनम् इति। सकृदुच्चरितस्य गोशब्दस्य सङ्केतो दृश्यमानासु गोव्यक्तिषु एव जायते। किन्तु प्रतिवेशिनो गृहे बद्धासु असङ्केतितासु गोव्यक्तिष्वपि सङ्केतः प्रतिपद्यते, अतः यत्र सङ्केतः न कृतस्तत्रापि तस्य व्यवहारः अभवदित्यतः व्यभिचारदोषतया सङ्केतो व्यक्तौ न ग्राह्यः। तथा च हिमपयः- शङ्खादिषु धवलत्वं भिद्यमानं वर्तते, किन्तु धवल-सामान्यतया तत्र भिद्यमानेषु पदार्थेषु सङ्केतो भविष्यति। अतः तन्निरासाय नानाविधतर्कैः व्यक्तिगतः सङ्केतः न ग्राह्य इति। उपाधिभेदात् पुनः शब्दान् चतुर्धा विभजते मम्मटाचार्यः। उपाधिर्द्विविधः वस्तुधर्मः वक्तृयदृच्छासन्निवेशितश्चेति। वस्तुधर्मस्य द्वौ भेदौ – सिद्धः साध्यश्चेति। सिद्धस्यापि द्वौ प्रकारौ – पदार्थप्राणप्रदः, विशेषाधानहेतुश्चेति। [1]

मम्मटः सुस्पष्टं जात्यादिपदार्थं लक्षयन् –पदार्थस्य प्राणप्रदः जातिः, विशेषाधानहेतुः गुणः, साध्यः क्रियापदार्थः, अर्थात् पूर्वापरीभूतावयवः क्रियारूपःइति च निर्दिशति। वक्तुरिच्छया सन्निवेशितः कल्पितः डित्थादिनामविशेषः इति। वाक्यपदीयकारस्य जातिपदार्थस्वरूपम् आचार्यमम्मटः एवमुपपादयति- 'नहि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः[2]' इति। 'गौः शुक्लश्चलोडित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः'। इत्यमुना प्रकारेण काव्यशास्त्रे विस्तरेण शास्त्रान्तरमतोपस्थापनपुरस्सरम् अभिधाविवेचनं निरूपितम्।

**विमर्शः**

काव्यशास्त्रे अर्थावबोधनरूपव्यापारवान् शब्दः वृत्तिरिति आलङ्कारिकैः कथितम्। त्रिवेणिकाकारमते तु अर्थस्य प्रतिपादनाय शब्दस्य अर्थे वर्त्तनम्, अवस्थितिरेव वृत्तिः भवति। व्याकरणशास्त्रे तु शाब्दबोधस्य

1. का.प्र., शिवजी उपाध्यायसम्पादित, द्वि.उ. पृ.३०-३१
2. तत्रैव,पृ. ३१-३२.

(शब्दाद् आगतः बोधः) जनकं पदार्थज्ञानं तस्य जनकं यज्ज्ञानं तस्य विषयः पद-पदार्थगतः सम्बन्धविशेषः एव वृत्तिपदार्थः इत्यभ्युपगमः। व्याकरणशास्त्रं तु पद-पदार्थयोः सम्बन्धविशेषं वृत्तिपदेन स्वीकरोति, किन्तु काव्यशास्त्रिणः शब्दस्य अर्थप्रतिपादने अर्थगतस्य वर्त्तनं व्यापारसामान्यं वृत्तितया आमनन्ति।

वृत्तेः त्रयो भेदा भवन्ति-अभिधालक्षणाव्यञ्जना चेति। व्याकरण-शास्त्रेऽपि वृत्तित्रयस्य स्वीकारः अस्ति। परं तत्र लक्षणाया व्यवहारः शक्तिगतत्वेन अप्रसिद्धानामकेन भेदेनक्रियते। न्याय-मीमांसयोः शास्त्रयोः वक्तृबोद्धव्यादिवैशिष्ट्याभावात्व्यञ्जनायाः शक्तेः अस्वीकारो दृश्यते।

काव्यतत्त्वविद्भिः साक्षात्सङ्केतितस्य अर्थस्यावबोधने शब्दस्य व्यापार एव अभिधेति शक्तिर्मता। काव्यप्रकाशादिग्रन्थोक्तम् अभिधायाः स्वरूपमेव परवर्त्तिनः काव्यशास्त्रिणः रुय्यकमङ्खकविश्वनाथादयः प्रायशः अमन्यन्त। जगन्नाथोक्ताभिधास्वरूपम् - शब्दस्य अर्थगतः, अर्थस्य च शब्दगतः, व्यापारविशेषः अभिधेति। व्याकरणशास्त्रे तादात्म्यरूपापदपदार्थयोः शक्तिः इत्यभिधा कथिता। इति काव्यशास्त्रिवैयाकरणयोः अभिधास्वरूप-स्वीकारे सादृश्यम् अवतिष्ठते।

व्याकरणशास्त्रस्वीकृतं पदपदार्थयोः तादात्म्यं शक्तिरिति, तदेव तादात्म्यम् अनादिः, अर्थप्रतिपादिका शब्दस्य योग्यता भवति। शब्दार्थयोः स्मृत्यात्मकः अध्यासरूपः अभेदः सङ्केतः स्वीकृतः।

मीमांसाशास्त्रे वाच्यवाचकरूपा एव शक्तिः स्वीकृता वर्तते। श्रुत्यभिधानादिपदेन व्यवह्रियते। तत्र श्रुतिपदेन या अर्थस्याभिधानकारिका सा उक्ता। एषा एव अभिधात्री-विनियोक्त्री-विधात्रीत्येवंरूपा अभिधान्तर्भूता भवति। न्यायशास्त्रे प्राचीननैयायिकानां मते एतच्छब्दस्य अयमर्थः इतीश्वरेच्छा एव शक्तिः। नव्यनैयायिकानां मते तु इच्छामात्रं शक्तिरिति, पदस्य पदार्थबोधिका या, सा शक्तिरित्याशयः। फलतः शास्त्रेष्वपि मतान्तरधिया पक्षद्वयं ज्ञायते। व्याकरणशास्त्रेमतद्वयं यथा-

१. बोधजनकत्वरूपां शब्दनिष्ठां योग्यतां शक्तिपदेन भर्तृहरि-भट्टोजिदीक्षितकौण्डभट्टादयः स्वीकुर्वन्ति।

२. शब्दार्थोभयनिष्ठं वाच्यवाचकभावरूपं सम्बन्धं शक्तिं स्वीकरोति-नागोजिभट्टादिः।

न्यायमतेऽपि मतद्वितयमस्ति-

१. प्राचीननैयायिकमते अस्माच्छब्दात् अयमर्थो बोद्धव्यः इत्याकारिका ईश्वरेच्छा शक्तिः भवति।

२. नव्यनैयायिकमते तु इच्छामत्रं शक्तिः इत्येव पर्यवस्यति।

आलङ्कारिकाणां मतद्वयं निस्सरति-

१. प्राचामालङ्कारिकाणां मते शब्दस्य अर्थावबोधनरूप एव व्यापारः अभिधा कथिता।

२. अर्वाक्तनानां मते तु अर्थस्य शब्दनिष्ठः शब्दस्य चार्थनिष्ठः सम्बन्धविशेषः शक्तिर्भवति।

मीमांसकानां मते वाच्यवाचकभावसम्बन्धरूपा एव शक्तिपदेन व्यपदिष्टा।

वैयाकरणकाव्यविदोः उभयोः मते अभिधाविभागः योगः रूढिः रूढियोगः इति नाम्ना समानः वर्तते। मीमांसामते अभिधान्तर्गततया अभिधात्री, विनियोक्त्री, विधात्री इति भेदा भवन्ति। प्रायः सर्वेषां शास्त्रकाराणां मते अभिधाशक्तिरेव शक्तिपदेन व्यवहृता वर्तते।

एवं च कुत्रचित् पदपदार्थनिष्ठं सम्बन्धविशेषं व्याख्याय शक्तिपदं निरूपितम्, कुत्रचिच्च उभयनिष्ठं केवलशब्दनिष्ठं वा व्यापारविशेषं कथयित्वा शक्तिवृत्तिः उपपादिता इति सारांशः।

**व्याकरणशास्त्रदृशा लक्षणावृत्तिः**

वैयाकरणानां मते शक्तेः व्यतिरिक्तां लक्षणां स्वीकर्तुं गौरवप्रसङ्गः भवति। यथा-शाब्दबोधजनकपदार्थोपस्थितये शक्तिज्ञानत्वेन लक्षणाज्ञानात्वेन कारणतायां गौरवम् अनुभूय लक्षणा शक्तिव्यतिरिक्ता नास्तीति महाभाष्यादि-ग्रन्थानुमोदनेन वैयाकरणभूषणसारकारादिः वदति[1]।

भर्तृहरिणापि लक्षणाशक्तिविषये कारिकाद्वयेन सङ्केतः प्रास्तावि। तद्यथा-

---

1. भूषण., श.नि.

सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः
प्रसिद्धिभेदाद् गौणत्वंमुख्यत्वं चोपवर्ण्यते[1]॥
श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते।
मुख्यं तमर्थं मन्यन्ते गौणं यत्नोपपादितम्[2]॥इति।

शब्दः सर्वविधार्थप्रत्यायकः, प्रसिद्धार्थप्रतिपादने शब्दस्य मुख्यवृत्तिः, अप्रसिद्धार्थप्रतिपादने च गौणवृत्तिःभवति। शब्दश्रवणसमनन्तरमर्थोपस्थितिः स मुख्यः अर्थप्रकरणमुख्यार्थबाधादिसमनन्तरमर्थोपस्थितिः स गौणः इति कारिकासारः। नागेशभट्टोऽपि परमलघुमञ्जूषायां शक्तिमेव प्रसिद्धा-अप्रसिद्धात्वेन द्विधा विभज्य लक्षणाम् अप्रसिद्धाम् मन्यमानः तस्याः अनतिरिक्ततां सिद्धान्तितवान्[3]।

तत्र पामरजनवेद्यविषया प्रसिद्धा, (पामरजनैरेव वेद्यते अपामरजनेन न, इति नास्ति आशयः परं साक्षादर्थप्रतीतिवशात् तदुक्तमिति।) यथा- गङ्गापदस्य जलप्रवाहार्थे प्रसिद्धा शक्तिः।

सहृदयमात्रसंवेद्यविषया अप्रसिद्धा, 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य तटरूपार्थे अप्रसिद्धा शक्तिः।

लघुमञ्जूषायां 'आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पद-वाच्यत्वेन प्रसिद्धान्यतिरिक्तबोधे व्यक्तिविशेषबोधे वा लक्षणा' इति व्यवहारः दर्शितः। या अन्यशास्त्रकाराणां मते लक्षणा इति व्यपदिश्यते[4]।

## मीमांसाशास्त्रदृशा लक्षणावृत्तिः

मीमांसाशास्त्रे ज्ञाप्यसम्बन्धः लक्षणा इत्येव अङ्गीक्रियते। नो चेत् 'गभीरायां नद्यां घोषः' इत्यत्र 'गभीरायां नद्याम्' इति वाक्यकथनेन गभीराभिन्ननदीतीरे लक्षणा न भवेत्, एतत्सिद्धान्ते शक्तिविरहात् शक्यसम्बन्ध-

---

1. वाक्य.पृ.२.२५३
2. तत्रैव २.२७८
3. परम.,पृ.८-९
4. लघु..,लक्षणा नि.

विशेषलक्षणायाः तत्र अभावःअस्ति। यथा हि न हि गभीरपदं तीररूपार्थस्य लक्षकम्, नद्यामित्यन्वयानुपपत्तितः, न केवलं तीरं नदी, अस्मात् न नदीपदेऽपि तद्, गभीरपदार्थानन्वयात्, न तीरं हि गभीरं भवति। न च पदद्वये प्रत्येकं सा इति वक्तव्यं विशिष्टनदीतीरस्य अप्राप्तिप्रसङ्गतया। एवञ्च नदीपदं गभीर-नदीतीरलक्षकम् गभीरपदं तत्र तात्पर्यबोधकम् इति वाच्यम्, विनिगमका-भावात्, न च सरित्पदस्य द्रव्यबोधकतया तेनापि साक्षात्सम्बन्ध-विशेषसत्त्वात्। अतः समुदाय एव सा अङ्गीकार्या- इतितदभिमतम्।

मीमांसका इमां वृत्तिं शब्दशक्त्युपक्रमे तृतीयतया अभ्युपगच्छन्ति। अस्या शक्तेः कृते शास्त्रेषु नैके पर्यायाः स्वीक्रियन्ते। ते च – गुणवृत्तिः लक्षणा अमुख्यावृत्तिः अप्रसिद्धाशक्तिः जघन्या भक्तिः उपचारश्च इत्यादयः लभ्यन्ते। मीमांसका इमां वृत्तिं गुणिवृत्तितया आमनन्ति। अभिधावृत्तिः मुख्यार्थं बोधयित्वा क्षीणशक्तिः भवति। यदि वाक्यानां मुख्यार्थे बाधिते सति तदनन्तरमेव अर्थसङ्गत्यर्थं लक्षणावृत्तिरेव आविष्क्रियते सैव गौणीवृत्तिर्विद्यते। पूर्वमीमांसायां भगवज्जैमिनिप्रोक्तसूत्रेणगौणवृत्तेः उल्लेखः परिलक्ष्यते। परमकारुणिको जैमिनिः तच्च- 'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्ग-समवायैर्गौणी'[1] इति निरूपयामास। तदिदं परिभाषमाणो भाष्यकारः शबरस्वामी "आग्नेयो वै ब्राह्मणः" इत्यादिना लक्षणाङ्कुरं वेदेभ्यः दर्शयति। जैमिनिमहर्षिः लाक्षिणकार्थप्रयोगस्य षट्कारणानि प्रादर्शयत् परन्तु तेन कुत्रापि लक्षणागौण्युपचारादयः शब्दाः वृत्तिपरतया नैव प्रयुक्ता इति मे प्रतिभासते। तथा हि सूत्रम् "तत्सिद्धि-जाति-सारूप्य-प्रशंसा-भूमा-लिङ्गसमवायाः" इति गुणाश्रयाः। सूत्रम् इदम् शाबरभाष्ये गौणव्यवहारतया व्याख्यातम्। जैमिनिना भक्तिःशब्दः मुख्यार्थाद्अन्यत्र प्रयुक्तः। सूत्रकारप्रयुक्तः गुणवादसन्दर्भे गौणमुख्यादिः शब्दः अर्थपरः न तु वृत्तिपरः। लक्षणा इति शब्दस्य प्रयोगः मीमांसाशास्त्रे दर्शने वा कुत्र केन वा अकारि इति प्रश्ने सति 'उपलक्षणम्' इत्यर्थे जैमिनिना लक्षणाशब्दः प्रयुक्त इति 'लक्षणार्थाश्रुतश्रुति' लोके ऐदम्प्राथम्येन

1. पू.मी.सू.१-४-२२, पृ. ३१३

लक्षणाशब्दप्रयोगश्शबरस्वामिनैव कृत इति स्वीकर्तव्यं भवति।

शाबरभाष्ये प्रयुक्तलक्षणाशब्दः मीमांसादर्शने लक्षणावस्थितिं प्रकाशयति-

'लक्षणाऽपि हि लैकिकी' 'लौकिकी हि लक्षणा हठोऽप्रसिद्धकल्पनेति'[1]

'उपलक्षणमिति' इत्यत्र सूत्रकारेण प्रयुक्तेन शब्देन सह स्वप्रयुक्तशब्दस्य लक्षणेति भेदं प्रादर्शयत् भाष्यकारः। तदेव वचनं लक्षणाशब्दो हि अभिधेया-विनाभूतार्थप्रतीतिहेतुका शक्तिः लक्षणा इत्येव द्रढयति कुमारिलभट्टः-

अभिधेयविनाभूते प्रवृत्तिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता [2]॥

प्रभाकरमतानुयायी शालिकनाथमिश्रः स्वग्रन्थे प्रभाकरस्य लक्षणा-विषयकमतम् उपस्थापयन् कथयति वाक्यार्थे वाच्यार्थस्य समबन्धस्य अनुपपत्तिर्वा लक्षणाहेतुरिति

आह-

वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः।
तत्सम्बन्धवशप्राप्तस्यान्वयालक्षणोच्यते॥[3]

**मीमांसाशास्त्रदृशा लक्षणागौणीवृत्तिभेदविषयकविचारः –**

मीमांसाशास्त्रानुशीलनेन इदं स्पष्टं यत् लक्षणागौण्योः परस्परं भेदस्वीकारे एव आशयः। भाष्ये तु स्पष्टतरः लक्षणागौण्योः भेदः प्रकाशितो वर्तते उदाहरणावसरे। यत्र सादृश्यादिगुणद्वारेण परशब्दस्य परत्र वृत्तिर्भवति तत्र गौणी। तदन्यत्रअविनाभूतप्रतीतिस्थले जहदजहत्स्वार्थस्थलयोः वा लक्षणा भवति इत्येव पर्यभाषि।

प्राभाकराणां गौणीविषयकविचारः – तन्मते तु गौण्याः लक्षणातो पृथक् वृत्तित्वमस्ति। प्रभाकरेण तत्सिद्धिपेटिकायां "गौण इति शब्देन सह वृत्तिः

1. शा.भा.,मी.द.२ पृ.३९, पृ.२७५
2. त.वा., मी.द.,२, पृ.३१३
3. संग्रहश्लोक, वा.मा.,पृ.४९-५०

इति शब्दो नैव प्रयुक्तः किन्तु तदीयशिष्यः शालिकाचार्यः एकत्र स्थले गौणीवृत्तिरिति पदं सिद्धान्ताभिप्रायेण प्रयुयुजे। तदुक्तं यथा – तदिदं न मृष्यते गौणी वृत्तिरेवाक्षिप्यते [1]। लोके च लक्षणा गौणी च वृत्तिः वाक्यभेदभयादेव[2] इत्यतः प्राभाकरमते गौणीवृत्तिः अभ्युपेता इत्येव वक्तव्यम्।

गङ्गायां घोष इत्यादौ गङ्गापदार्थस्य वाक्यार्थे अन्वयानुपपन्नात् तत् परित्यज्य तत्सम्बन्धात् लब्धबुद्धिसन्निधेः कूलाद्यर्थस्य वाक्यार्थान्वयिताध्यवसीयते। अत एव आहुः अनुपपत्या मुख्यार्थश्रौतार्थ-सम्बन्धे सति लक्ष्ये लक्षणा भवतीति प्रभाकरदर्शने सिद्धम्।

**लक्षणागौण्योर्विषये कुमारिलमतानुयायिनां सिद्धान्तः**

मीमांसाशास्त्रे लक्षणागौणीविषयकविचारं सिद्धान्तयितुं कुमारिलेभ्यः श्रेयो व्रजति। लक्षणगौण्योर्हि चिन्तनं तावत् कुमारिलैः प्रप्रथमतया मीमांसादर्शने सुस्पष्टतया न्यरूपि। तयोः विषयविभागोऽपि दर्शितः। तद्यथा तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाये गौणी इति। सूत्रस्थं भाष्यं स्पष्टीकुर्वन् आचार्यकुमारिलो लिखति यत् "अथवा गौण्या वृत्तेरिह निमित्तमभिधीयते? न लक्षणायाः"। किञ्च अनयोर्भेदोऽप्यस्ति। इति प्रश्नमुद्घाट्य तदुत्तरयति –

अभिधेयाविनाभूते प्रतीतिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता [3]॥

अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिं सम्बन्धोऽर्थेन नित्यसंयोगात् इत्यत्र गौणमुख्यविभागं व्याकुर्वन् अष्टौ पूर्वपक्षान् समुपस्थापयति।

तथाहि –

---

1. (पञ्चिका), पं., १.४.२३,पृ.२५६
2. प्र.पं. वा.म., पृ.४०८.
3. त.वा., मी.द.,२, पृ.३१३

जहत्स्वार्थाभिधायित्वं सङ्घातः परिकल्पना।
तथा सोपपदा वृत्तिः समुदायप्रसिद्धिता ॥
वाक्यार्थोऽल्पप्रसिद्धत्वमेवमल्पप्रयोगिता।
अष्टावेतान्निराकृत्य साधिता गुणलक्षणा ॥
तत्र नित्यं परार्थत्वात् उभयत्र प्रयोगिता।
साक्षान्न ह्यभिधानस्य किञ्चिदभ्यधिकं फलम्[1]॥

एवं रूपेण मीमांसादर्शने सूत्रकारमतादारभ्य भाट्टादिमतपर्यन्तम् शक्तेरस्याः प्रयुक्तः शब्दः लक्षणा भक्तिः गौणी चेति ज्ञायते। किञ्च त्रयाणामपि शब्दानां प्रयोगदर्शने कियद्वैषम्यमित्यपि स्पष्टं भवति।

**न्यायशास्त्रदृशा लक्षणावृत्तिः**

**न्यायसूत्रे लक्षणाविषयकसङ्केतः**

न्यायसूत्रकारस्य गौतमर्षेः सूत्रपर्यालोचनेन आरोपात्मकलक्षणाविषयक-विचारः सम्मत इति यथा-न्यायसूत्रे 'वाक्छलसामान्यच्छलोपचारच्छ-लभेदात्' छलस्य प्रकारत्रयं स्वीकृतमस्ति। तत्रोपचारच्छलस्य लक्षणानिर्देशात् प्राक् शब्दस्यार्थेन यः सम्बन्धोऽस्ति तं धर्मत्वेन कथयति। यदि तादृशधर्मविकल्पनिर्देशात् अर्थस्य निषेधः क्रियते तदेव उपचारच्छलम् यथा सूत्रं बोधयति– 'धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्'।[2] उदाहरणत्वेन मञ्चाः क्रोशन्ति इत्येवोपलभ्यते। अत्र उदाहरणपर्यालोचनेन लक्षणाबीजस्य आनयनं तदानीमेव जातमिति बुध्यते। इतोऽपि एकं सूत्रं विशेषतः लभ्यते तत्र यः उपचारः गृहीतः तस्य दश अर्थास्सन्ति इत्युक्ते स उपचारः दशसु अर्थेषु प्रयुक्तो वर्तते। सूत्रे अतद्भावेऽपि तद्भाव इत्यस्मिन्नर्थे उपचारः परिभाषितः। एतस्मिन् न्यायसूत्रे लक्षणादिशब्दपरतया व्यवहारः नैवविहितः उपचारशब्दतया। तथा हि सूत्रं 'सहचरणस्थानतादर्थ्यवृत्तमान-धारणसामीप्ययोग-साधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गा-

1. श्लो.वा.,पृ.
2. न्या.सू.,१/२/१/४

शाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः' [1]इत्यत्र उपचारशब्दः दशविधः सोदाहरणं निम्नरूपेण प्रस्तूयते –

1. **सहचरणार्थे**–'यष्टिकान् भोजय' इत्यत्र विप्राः सयष्टिकाः इति "यष्टिका" पदेन कथितम्। उभयोः यष्टिविप्रयोः सहस्थितिसम्बन्धात् भोजनसमावेशः। एवमेव 'कुन्ताः प्रविशन्ति' इत्यत्रापि।
2. **स्थानार्थे**–'मञ्चाः क्रोशन्ति' इत्यादौ मञ्चशब्दः मञ्चस्योपरि सुप्तान् शिशून् अभिधत्ते अत इह उपचारः।
3. **तादर्थ्ये** 'कटमादत्ते' इत्येष प्रयोगः कटपदं कटे विद्यमानान्कुशान् तृणविशेषान् उद्दिश्य क्रियते इति तादर्थ्यादुपचारः।
4. **वृत्तार्थे**– 'अयं यमो राजा' इत्यत्र यमसदृशकार्यसम्पादयितरि नृपे तात्कर्म्यात् यमशब्दः उपचारात् प्रायुज्यत।
5. **मानार्थे**– 'आढकसक्तवः' इति प्रयोगस्तु आढकेन तुलायन्त्रविशेषेण मिता परिमापिताः सक्तवः पदार्थविशेषा इत्यर्थे भवति।
6. **धारणार्थे**– 'तुलाचन्दनम्' इति प्रयोगः तुलायां तुलायन्त्रे स्थापितचन्दनम् इत्यर्थे अस्ति।
7. **सामीप्यार्थे**–"गङ्गायां घोषः" "गङ्गायां गावश्चरन्ति" इत्यत्र गङ्गापदं सामीप्यसम्बन्धेन गङ्गातीररूपम् अर्थं प्रत्याययति।
8. **योगार्थे**– "कृष्णः शकटः" इत्यत्र कृष्णशब्दस्य वस्तुतः अभिधाशक्त्या वाच्योऽर्थः कृष्णगुणः भवति कृष्णगुणविशिष्टे जने तु समवायसम्बन्धाद् उपचारः।
9. **साधनार्थे**– 'अन्नं प्राणाः' इत्यत्र प्राणानां कारणभूतमन्नमेव तत् प्रथमान्तकथनात् – अभेदेन प्राणा इति शब्देन अन्वयं प्राप्नोति। तस्माद् अन्नं प्राणाः इति उल्लिखितम्।
10. **आधिपत्यार्थे**– अयं कुलम् इत्युदाहरणे आधिपत्यरूपसम्बन्धेन पुरस्स्थिते पूर्णस्य कुलस्यारोप उपचारतः।

---

1. न्या.सू. २.२.६३.

नव्यनैयायिकानां मते तु लक्षणा शक्यसम्बन्धरूपा भवति। उक्तञ्च भाषापरिच्छेदे विश्वनाथपञ्चाननेन-

लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः[1]॥

इति सिद्धान्तितम्, 'गङ्गायां घोष' इत्यादौ गङ्गापदस्य शक्यार्थः जलप्रवाह इति तस्य शक्यार्थस्य सामीप्यसम्बन्धः तीरे अस्ति। इत्थं सामीप्यसम्बन्धरूपा लक्षणा गङ्गापदस्य तीरे एतत्सिद्धान्तानुगुणं स्वीक्रियते। एषा स्वाश्रयसम्बन्धिवाचकत्वेन पदनिष्ठा व्यवहार्या। स्वं लक्षणा, तदाश्रयः अर्थः तटादिः, तत्सम्बन्धी शक्यार्थः जलप्रवाहादिः, तद्वाचकं गङ्गापदम्। एवमेव सैव स्ववाच्यसम्बन्धिवृत्तित्वेन अर्थनिष्ठा भवति। यथा-स्वं गङ्गादिलाक्षणिकपदम्, तद्वाच्यः जलप्रवाहविशेषः, तत्सम्बन्धी तटादिः, तद्वृत्तित्वं सामीप्यादिसबन्धरूपत्वं लक्षणा। अनेन प्रकारेण पदपदार्थयोः सम्बन्धत्वमेव लक्षणाम् उपवर्णयन्ति[2]।

**काव्यशास्त्रशास्त्रदृशा लक्षणावृत्तिः**

लक्ष्यते ज्ञायते अर्थः अनयेति लक्षणा। वक्त्रादिप्रयुक्तस्य व्यङ्ग्यार्थप्रतीत्यर्थवाच्यार्थबाधितस्य लक्ष्यार्थेन सह अन्वयं मेलयितुं या शक्तिः सा लक्षणा नाम्ना व्यपदिश्यते। वाग्देवतावतारो मम्मटाचार्यः लक्षणा-वृत्तिं प्रतिपादयति।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया[3] ॥इति

आचार्यमम्मटः लक्षणामभ्युपेतुं तन्निमित्तकोटौ हेतुत्रयं स्थापयितुमिच्छति। यथा दण्डचक्रचीबरादीनि कारणानि घटनिर्माणे समुदिततया एककारणताम् आप्नुवन्ति न तु व्यस्ततया। तथैव मुख्यार्थादीनि लक्षणायाः समुदिततया

1. मुक्ता., शब्दप्रमाणनिरूपण, पृ.४८
2. मुक्ता..कि.टी.का.८२
3. का.प्र,पृ. द्वि. उ. का.८ पृ. ३७

कारणतां प्राप्नुवन्ति। तस्मात् त्रयः इति एकवचनप्रयोगसाधुता सङ्गच्छते। मुख्यार्थबाधादित्रयं हेतुः इति द्वितीयोल्लासे उक्तम्।

1. प्रथमो हेतुः मुख्यार्थबाधः इत्युक्ते अभिधावृत्या बोधितस्यार्थस्य बाधः स्यात्।
2. तद्योगः– बाधितस्य शक्यार्थस्य अर्थान्तरेण लक्ष्यार्थेन सह सामीप्यादिः सम्बन्धः।
3. रूढिप्रयोजनयोः कस्यचिद् एकस्य सत्ता आवश्यकी।
   विश्वनाथोऽपि इदमेव ब्रवीति-

मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणशक्तिरर्पिता[1] ॥ इति।

**आरोपिता क्रिया** इति उक्तकारिकांशः न लक्षणघटकः किन्तु लक्षणास्वरूपकथनबोधकः। सा लक्षणा अरोपिता मुख्यार्थव्यवहित-लक्ष्यार्थविषयकत्वात् शब्दे कल्पिता आनीता इत्याशयः। अभिधा तु शब्दस्य शक्तिः इति नास्ति संशयः। किन्तु इयं लक्षणावृत्तिः शब्दस्य न, अपितु अर्थस्य। तथाहि-शब्दस्य वाच्यार्थे अनुपपन्ने असङ्गते सत्येव लक्षणा भवति। एतच्छक्तेः स्वीकाराय मुख्यार्थस्य बाध आवश्यकः। तत एव तस्याः प्रसङ्ग उदेति अन्यथा नेति। अत एव काव्यविदः साक्षात्सम्बन्धेन अर्थस्य,परम्परा सम्बन्धेन उपचारतः शब्दस्य शक्तिं मन्वते। क्रिया – व्यापाररूपा चेति तात्पर्यम्। वृत्तिभागे मम्मटाचार्यः लिखति- अरोपितः शब्दव्यापारः सान्तरार्थनिष्ठः लक्षणा। अन्तरं नाम व्यवधानं तेन सह वर्तते इति सान्तरः मुख्यार्थबाधाद्युपस्थित्या व्यवहितः मुख्यार्थस्य अन्वयानुपपन्नरूपव्यवधानेन युक्तः एवंविधः योऽर्थः लक्ष्यार्थः तन्निष्ठः तद्बोधकः लक्षणा इति अचकथत्।

आचार्यमम्मटोक्तकारिकायाः उत्तरार्द्धांशे 'अन्योऽर्थः लक्ष्यते प्रतीतो भवति इति यत् सा लक्षणा" इत्युक्तार्थोपादानेनज्ञानमेव लक्षणा इति मीमांसासम्मता व्याख्या टीकाकारैः व्यधायि। तन्न समीचीनम्,तत्तु

1. सा.द,.पृ.द्वि. प..का.५ पृ.३७

अज्ञाननिद्रया कथनं वर्तते। यतो हि अभिधाव्यञ्जनाशक्त्योरिवलक्षणाया अपि वृत्तित्वं वर्तते। वृत्तिपदार्थः भिन्नः तज्जन्या या प्रतीतिः ज्ञानं सा भिन्नाकारिकायां मुख्यार्थबाधे इति पदं भद्रात्मनो दुरधिरोहतनोर्विशाल-इत्यादिषु स्थलेषु मुख्यार्थस्य अबाधे सति व्यञ्जनाशक्तिसत्त्वात् तत्र व्यञ्जनाया अप्रसक्तिम् अवरोद्धुम् प्रयुक्तमिति।

तद्योगे– इत्यस्य पदस्य प्रयोजनमस्ति मुख्यस्याप्यभिधारूपमुख्यार्थ-संबन्धेन प्रतिपादनं संभवतीति तद्वारणम्। यद्वा प्रदीपकारमते तु तस्य अर्थः भवति व्यञ्जनायां व्यञ्जनाजन्यशाब्दबोधे शक्तिस्मृतेः अवबोधस्य वारणम्। रूढिप्रयोजनान्यतरत्वात् इत्यस्य आशयः रूढिप्रयोजनान्यतरशून्यत्वेऽपि लक्षणाव्यपदेशात् रूपवान् घटः इत्यर्थे रूपः घटः इति प्रयोगापत्तिः मा भूत्। तदर्थं तत्पदं सन्निविष्टम्। रूढेः उदाहरणं –'कर्मणि कुशलः' इत्यत्र कुशान् लातीति व्युत्पत्त्या, कार्ये चतुर इति विवक्षितार्थे तदर्थस्य दर्भग्रहण-रूपस्यायोगात् मुख्यार्थस्य बाधे सति लक्षणया चतुररूपार्थस्य विवेचकत्व-सम्बन्धेन बोधः कार्यते। प्रयोजनाभावात् रूढेः कारणात् व्यपदेशो जायते। प्रयोजनस्य उदाहरणेगङ्गायां घोषः इत्यत्र अभिधया जलप्रवाहरूपस्य गङ्गशब्दार्थस्य घोषपदार्थेन आभीरवामभ्रूवसतिरूपेण सह प्रत्यक्षादि-प्रमाणद्वारा आधाराधेयभावः (गङ्गानिष्ठाधारः घोषनिष्ठाधेयञ्चेति) बाधितः। तदनन्तरं लक्षणया गङ्गापदेन बाधितार्थस्य जलप्रवाहरूपवाच्यार्थस्य गङ्गातीररूपलक्ष्यार्थेन सह सामीप्यादिसम्बन्धात् बोधः कार्यते। प्रयोजनन्तु शैत्यपावनरूपं व्यञ्जनया बोधितम् इति।

सा लक्षणा षड्विधा भवति। तद्यथा-शुद्धायाः चत्वारः प्रकाराः। उपादानलक्षणा, लक्षणलक्षणा, सारोपा, साध्यवसाना चेति। गौण्याः द्वौ प्रकारौ- सारोपा, साध्यवसाना इति साकल्येन लक्षणायाः षड्विधत्वं मम्मटाचार्यसमये सिद्धम्।

**लक्षणाविमर्शः**

काव्यशास्त्रे लक्षणा पृथक्शक्तितया स्वीकृता वर्तते। मुख्यार्थ-बाधमुख्यार्थयोगरूढिप्रयोजनान्यतरत्वहेतुत्रयपूर्विका लक्षणा प्रतिपादिता। एषा

अर्थस्य वास्तविकी शक्तिः वर्तते शब्दे तु केवला आरोपरूपा उक्ता। अतः सान्तरार्थनिष्ठः शब्दव्यापारः लक्षणा मम्मटादिग्रन्थानुरोधात् ज्ञायते। इत्युक्ते मुख्यार्थव्यवहिता सापेक्षितमुख्यार्थव्यवधाना शक्तिः लक्षणा भवति।

वैयाकरणास्तु एतां लक्षणां शक्तितया न कथयन्ति। एतस्याः शक्तिरूपेण स्वीकारे गौरवप्रसङ्गं तत्सिद्धान्ते सम्पादयन्ति, यथा च-शाब्दबोधस्य कारणं पदार्थोपस्थितिः, तत्र शक्तिज्ञानतया लक्षणायाः ज्ञानस्य भासनेन तत्कारणतायां गौरवम् आपतति। ततः लक्षणाशक्तेः पृथग्ग्रहणं वारयितुम् अभिधायाः प्रसिद्धा अप्रसिद्धा चेति प्रकारम् आमनन्ति। तेन वैयाकरणैः अभिधाया एव कुक्षिस्था सा अप्रसिद्धेति नाम्ना व्यपादिश्यत इति ज्ञायते। किन्तुपरमलघुमञ्जूषादिग्रन्थेषु शक्तिनिरूपणावसरे नागेशभट्टः लक्षणाम् अलक्षयत्।

न्यायशास्त्रे लक्षणा केवला शक्यसम्बन्धः इत्येव व्याख्यातम्। लक्षणाशक्तेः अभ्युपगमनाय तात्पर्यानुपपत्तिः एव कारणतया स्वीकृता। काव्यशास्त्रोक्तलक्षणापरिभाषायाः अपेक्षया उक्तेषु त्रिषु हेतुषु एकदेशाङ्गी-कारतया न्यायशास्त्रे लक्षणा परिभाषिता इत्ययं भेदः प्रतिभासते।

द्वितीयमन्तरं तु मुख्यार्थस्य बाधतया तात्पर्यानुपपत्तिस्वीकाराय प्रतीयते। यतोहि अन्वयानुपपत्तिमेव तद्बाधतया आलङ्कारिकाः स्वीचक्रिरे। केचन नैयायिकाः नागेशभट्टादयः वैयाकरणाश्च उभयेऽपि तात्पर्य्यानुपपत्तिमेव स्वीकुर्वन्ति।

मीमासकानां मते लक्षणावृत्तेः लक्षणारूपेण व्यवहारः न लक्ष्यतेतद्ग्रन्थपरिशीलनेन। किन्तु ते तस्या एकदेशरूपतया गुणानां समवायात् सादृश्यात् गौणीवृत्तिः अवश्यं प्रतीयते "लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता" इति आख्यान्ति। मुकुलभट्टस्य लक्षणाविषयकमतपरिष्कारावसरे काव्यप्रकाशकारः मम्मटः तत्र अभिधेयाविनाभूतार्थप्रतीतिः लक्षणा इति कारिकां मीमांसकस्य कुमारिलभट्टस्य श्लोकवार्त्तिकग्रन्थादुद्धरति। तेन प्रतीतिः लक्षणा कथिता। मम्मटः प्रतीतिं लक्षणां न स्वीकरोति। प्रतीतिः लक्षणा नास्ति, प्रतीतिस्तु ज्ञानं, ज्ञानं तु वृत्तिजन्यं लक्षणा तु अभिधादिवत् वृत्तिः इति

मम्मटाचार्यः अभिप्रैति। एवंविधम् अन्तरं मीमांसककाव्यशास्त्रविदोः मते दरीदृश्यते। मीमांसकाः यथा गौणीवृत्तिं लक्षणातः पृथग् आमनन्ति तथैव भोजराजहेमचन्द्रादयः गौणीं वृत्तिं व्याख्यान्ति। इत्यतः उभयत्र साम्यं लक्ष्यते। प्रायशः मम्मटादीनाम् आलङ्कारिकाणां मतमेव अर्वाचीना आलङ्कारिका स्वग्रन्थेषु प्रत्यपादयन्। एवं रीत्या लक्षणावृत्तेः स्वरूपं विविधशास्त्रग्रन्थेषु तद्वेत्तृभिः निरूपितम्।

**व्यञ्जना**

वि उपसर्गपूर्वकं रुधादिगणस्थाद् व्यक्तिम्रक्षणकान्तिगत्यर्थकात् अञ्जूधातोः करणाधिकरणयोश्च इत्यनेन करणे ल्युटि स्त्रीत्वविवक्षायां व्यञ्जना इति रूपं सिद्ध्यति। व्यज्यते अर्थः यया सा, अथवा व्यञ्जनं व्यञ्जना। तदर्थः व्यञ्जनाव्यापारः व्यङ्ग्यार्थबोधिका व्यञ्जनाशक्तिः इति। शक्तिभेदे एषा तृतीया शक्तिः अवशिष्यते। एतस्याः शक्तेः अन्वेषणं व्याकरणशास्त्रम् अकरोत्। काव्यशास्त्रे तु तस्या अङ्गीकारः ध्वनिकाव्यरूपार्थे अभवत्। न्यायशास्त्रे एषा शक्तितया न स्वीकृता अपि तु अनुमानप्रकरणे अनुमानादिना सिद्धा स्वीकृता च। मीमांसाशास्त्रं वेदवाक्यार्थानां विनियोगं विधाय तेषां तात्पर्य्यं स्वीकरोति। तत्र सर्वेऽपि अर्था अभिधेया भवन्ति। किन्तु व्यञ्जनास्वीकाराय वक्त्रादि-वैशिष्ट्यम् आवश्यकं भवति। तत्र वेदार्थमीमांसायां मन्त्राणाम् अपौरौषेयत्वात् अन्यपुरुषकर्तृकत्वाद्यभावात् व्यञ्जना न प्रयुज्यते।

गतोस्तमर्कः भातीन्दुः यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते।।[1]

इत्यादौ उदाहरणे वाक्यार्थः समान एव। किन्तु व्यङ्ग्यार्थः बोद्धव्यादिवैशिष्ट्याद् भिद्यते। यथा-उक्तस्य वाक्यस्य शक्यार्थः अस्ताचलप्राप्तः सूर्यः इति, परं व्यङ्ग्यार्थः अत्र नास्ति एक एव, विप्राय अयं कालः सान्ध्योपासनाकालः, अध्ययनशीलाय अध्ययननिवृत्तिकालः, गोपालकेभ्यः गोदोहनकालः, नायिकायै नायकेन सह अभिसरणात्मककालः, एवंरूपेण

---

1. भामह, १/७....

व्यङ्ग्यार्थः अत्र विधिरूपः निषेधरूपश्च वस्तु व्यज्यते। अत्र एवंविधा अर्थाः न केवला अभिधाव्यापारगम्या सङ्केताभावात्, न च लक्षणाव्यापारगम्याः मुख्यार्थबाधाद्यभावात्, अपितु केवलाः ध्वननद्योतनव्यञ्जनादिव्यापारगम्या इति। अतः अत्रमूलभूता केवला शक्तिः व्यञ्जना एव अवगम्या।

**व्याकरणशास्त्रदृशा व्यञ्जनाशक्तिः**

का नाम व्यञ्जना, किमर्थं व्यञ्जना आवश्यकी? अस्मात् कौतुकवशात् सार्वत्रिकम् आगतं प्रश्नम् उत्तरयितुम् ध्वनिकारः एतस्य श्रेयो वैयाकरणेभ्यो ददानः ध्वन्यालोके प्रथमोद्योते लिखति-"प्रथमे हि विद्वांसो वैयाकारणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति, तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वदर्शिभिर्वाच्य-वाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः[1]" इति। अत्र स्पष्टतया उक्तं यत् वैयाकरणाः ध्वनिस्फोटयोर्मध्ये व्यङ्ग्यव्यञ्जकभावं पर्यकल्पयन्। स्फोटरूपव्यङ्ग्याभिव्यक्तये तद्व्यञ्जक-रूपध्वनिं मत्वा तत्र व्यञ्जनरूपव्यापारात् व्यञ्जनां शक्तिम् अभ्युपागमन् इति। उक्तमतमेव समर्थयन् मम्मटाचार्यः काव्यप्रकाशस्य प्रथमोल्लासे ध्वनिकाव्यं परिभाष्य तद्वृत्तौ लिखति- "बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य-व्यञ्जकस्य शब्दस्य धनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य[2]" इति।
इदमेव वाक्यपदीये भर्तृहरिः आह-

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते[3]॥

उपर्युक्तकारिकापरिशीलनेन च इदं ज्ञायते यत् व्याकरणशास्त्रे द्विविधः शब्दो भवति। ध्वनिः स्फोटश्च, तत्र श्रूयमाणवर्णात्मकः ध्वनिशब्दः भेर्यादिवत्

1. ध्वन्या. प्र.उ.पृ.१३८-१४२
2. का.प्र.,पृ.२८-२९
3. वाक्य.,१/७६

निरर्थकः, स्फोटरूपशब्दः च ध्वनेः अभिव्यक्तो भवति। तत्रैव अभिधादिवृत्तीनां व्यवहारः सकलार्थप्रत्यायनक्षमता नित्यता शब्दब्रह्मत्वं चेति। द्वितीयं कारणं व्यञ्जनास्वीकारस्य वर्तते यत्-उपसर्गाणां निपातानां च ग्रहणाय।

यास्काचार्योऽपि निरुक्तशास्त्रे प्रथमेऽध्याये उपसर्गनिपातयोः स्वरूपात्मकम् एकं संवादम् उज्जहार। तत्र मतद्वयं विद्यते। प्रथममतानुसारम् उपसर्गनिपातयोः वाचकत्वं स्वीकृतमस्ति। अत्र गार्ग्यादयः कतिचन नैरुक्ताः सन्ति।

द्वितीयमते तु तयोः वाच्यतामनङ्गीकृत्य केवलं तद्द्योतकता एवोपपादिता[1]। अत्र नैरुक्ता शाकटायनः यास्काचार्यः पाणिनिः इत्यादयः वैयाकरणाः समानभावमावहन्ति।

नागेशभट्टः लघुमञ्जूषायां व्यञ्जनां प्रतिपादयति-"मुख्यार्थबाध-निरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना[2]" एतन्मते व्यञ्जना केवलं संस्कारविशेषः अस्ति। सः संस्कारः त्रिविधविशेषेण युक्तो भवति। १- मुख्यार्थबाधनिरपेक्षबोधजनकः। मुख्यार्थस्य बाधः न आवश्यकः। स भवतु न वा भवतु तस्य जनकः संस्कारः। २- मुख्यार्थसम्बद्धासम्बद्ध-साधारणः। प्रसिद्धाप्रसिद्धार्थविषयकः इत्यत्र मुख्यार्थेन सम्बद्धः असम्बद्धः यः सामान्यः प्रसिद्ध-अप्रसिद्धार्थविषयवान् संस्कार इत्याशयः। ३- वक्त्रादि-वैशिष्ट्यज्ञानप्रतिभादुद्बुद्धः। वक्तृबोद्धव्यप्रकरणादेः विशिष्टज्ञानस्य प्रतिभया उद्बुद्धः जागरितः संस्कारविशेषः व्यञ्जनाव्यापार इति। व्यङ्ग्यव्यञ्जकभाव-सम्बन्धरूपा एव व्यञ्जना। मञ्जूषायाम् उक्तं यत् 'द्योतकत्वं च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वम्'[3] इति। उक्तस्य व्यङ्ग्यव्यञ्जकभाव-सम्बन्धस्य व्यञ्जनापदेन ग्रहणं शब्दस्थले स्पष्टम् व्यक्तमस्ति।

---

1. निरु,पृ२७-३३
2. लघु., श.नि
3. लघु., श.नि

**मीमांसाशास्त्रदृशा व्यञ्जनोल्लेखः**

मीमांसाशास्त्रे स्पष्टतया व्यञ्जनाशक्तेः उल्लेखस्तु नोपलभ्यते। मीमांसकानाम् अभिधावादितया सर्वोऽपि वाग्व्यापारः अभिधया प्रचलति। लौकिकवाक्यानामर्थसङ्गत्यर्थं गुणवाद-अर्थवादनिरूपणावसरे गौणीवृत्तिं व्यपदिदिशुः। व्यञ्जनावृत्तिगम्यार्थम् विधिनिषेधरूपं तयैव उपपादयन्ति। मम्मटस्तु तमेवार्थं व्यञ्जनातिरिक्तवृत्तिलभ्यं नेति धिया लक्षणागम्यप्रयोजन-मिति व्यञ्जनाविरोधिनां मीमांसकानां मतं निरसितुं कारिकाम् अवतारयामास। 'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्'[1] ज्ञानफलयोः भिन्नविषयत्वात्[2]। फलस्य प्रकाशनं व्यञ्जनातिरिक्तवृत्त्या भवितुमशक्यम्। अतः प्रयोजनविशिष्टे लक्षणा नैवं युक्ता इत्युपस्थाप्य व्यञ्जनागम्यप्रयोजनम् इत्येव सिद्धान्तयति। एतत्पर्यालोचनेन ज्ञायते यत् मीमांसकमते व्यञ्जनायाः प्राधान्यं नास्ति ते केवलम् अभिधयैव कार्यं साधयन्ति लौकिकवक्येषु अर्थवादस्य प्राशस्त्यर्थं गौणीवृत्तिद्वारा व्यपदिशन्ति। ध्वन्यालोकलोचनपरिशीलनेन तत्र वस्तुव्यङ्ग्य-निरूपणावसरे मीमांसकाः अभिहितान्वयवादिनः अन्विताभिधानवादिनः इति मतानि आविरकुर्वन्।

भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदावरीनदीकूललतागहनावासिना दृप्तसिंहेन॥[3]

इत्यत्र निषेधरूपवस्तुव्यङ्ग्यार्थं प्रतिपादयितुं विपरीतलक्षणाम् अभ्युपगच्छन्तः सन्तः मीमांसका दरीदृष्टाः। तस्मात् कारणात् एतत्तु स्फुटमेव यद् ते व्यञ्जनां न स्वीकुर्वन्तीति मे भाति।

**न्यायशास्त्रदृशा व्यञ्जनोल्लेखः**

न्यायशास्त्रे पृथग्रूपेण व्यञ्जना शक्तिः नैव स्वीकृता। नैयायिका अनुमाने एव ताम् गतार्थयन्ते।

---

1. तत्रैव
 107 hteruiht
3. ध्व.लो., प्रथम उद्योत,तारावती,पृ.७७.

जगदीशतर्कालङ्कारः हरिनाथभट्टाचार्यादयः शक्तिवादे व्यञ्जनावृत्तिं न अभ्युपागच्छन्। यथा–

"मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितम्इत्याद्युदाहरणे मुखे विकासस्य बाधात् अन्वयबोधाय तस्य विस्तृतरूपलक्ष्यार्थग्रहणात् मुखे पुष्पसदृशसौरभविशेषस्य व्यङ्ग्यार्थस्य बोधे सति तं व्यङ्ग्यार्थं मानस-प्रत्यक्षरूपं स्मृतिसन्निकृष्टं सिद्धान्ततः अवदन्।

इमं मानसप्रत्यक्षरूपबोधं 'गामानय' इति वाक्यतः स्वीकृत्य शक्त्यादेर्वृत्तिताया कल्पना किमर्थमिति न वक्तव्यम्। नैयायिकः वदति वृत्त्योपस्थितपदार्थादतिरिक्तस्यार्थस्य भानं शाब्दबोधे मा भूत् इत्यतः व्यञ्जना न स्वीकार्या।

न्यायसिद्धान्तमुक्तावल्यां टीकाकारः अभिधामूलव्यञ्जनां शक्तौ, लक्षणामूलव्यञ्जनां लक्षणायाम् इति द्वयोः क्वचिच्च अनुमानेऽन्तर्भावं कृत्वा व्यञ्जनाम् तिरस्करोति।

उदाहरणार्थम्-'दूरस्था भूधरा रम्याः' इति अनेकार्थकस्य भूधरपदस्य राजरूपः अर्थः शक्त्या उपस्थाप्यते। एवमेव 'गङ्गायां घोषः' इत्यादौ शैत्यपावनत्वादिविशिष्टस्य तटस्य बोधः लक्षणाशक्त्या एवस्वीकृतः।

मम्मटाचार्यः काव्यप्रकाशे द्वितीये उल्लासे लक्षणां निरूप्य प्रयोजनरूपार्थस्य प्रतीत्यर्थं व्यञ्जनव्यापार एव आलम्बनीयः इति वदन् विशिष्टतमशक्तिं व्यञ्जनाम् अस्वीकृतवतां लक्षणागम्यप्रयोजनमिति सिद्धान्तितवतां नैयायिकानां मतं निरसितुं कारिकां रचयति-'प्रयोजनेन सहितं लक्षणीयं न युज्यते'[1]। इत्युक्त्वा प्रयोजनसहितस्य लक्ष्यार्थस्य उपस्थितिः लक्षणया न कार्यते, मुख्यार्थादिहेत्वभावान् न लक्षणा इति। अतः विशिष्टे लक्षणा नैवम् इत्युपस्थाप्य व्यञ्जनागम्यप्रयोजनम् इत्येव सिद्धान्तयति।

---

1. का.प्र,..२/१७ पृ.५९

**काव्यशास्त्रदृशा व्यञ्जनाशक्तिः**

शब्दशक्तेः तृतीय ‘आयामः व्यञ्जना। काव्येषु वाच्यलक्ष्ययोरर्थयोः पृथक् यः कश्चन विशिष्टोऽर्थः प्रतीयतेइत्यतः सोऽर्थः केनापि प्रमाणान्तरेण नोपलभ्यते। तस्य कृते शब्दव्यापारः स्वीक्रियते। स च व्यापारो व्यञ्जनाख्य इत्यानन्दवर्धनप्रभृतयः आलोचयन्ति-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु[1]॥

एवं प्रकथयन् कविरानन्दवर्धनः कविप्रतिभाप्रसूतं सहृदयैकजनसंवेद्यं वाच्यादिव्यतिरिक्तं प्रतीयमानमर्थं वर्णयितुंअभिधागुणवृत्तिभ्यां व्यतिरिक्तं व्यापारं स्वीकरोति। यथा ‘गङ्गायां घोषः’ इत्यत्र वक्तुः विवक्षया प्रयुक्तवाक्ये अभिधाया जलप्रवाहादिसङ्केतितार्थे नियमितत्वात्लक्षणायाः चगङ्गातीर-रूपार्थप्रतिपादनकारित्वात्। अभिधालक्षणाशक्तिद्वयव्यतिरिक्तः शैत्यपावन-त्वातिशयरूपार्थः वस्तुव्यङ्ग्यः काव्यतात्विकोऽर्थः व्यञ्जनाशक्तिः उपस्थाप्यते।

यथोच्यते लोचनकारेण –

तच्छक्तित्रयोपजनितार्थावगममूलजाततत्प्रतिभासपवित्रितप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्ध्वननव्यापार”[2] इति।

काव्यप्रकाशे द्वितीयोल्लासे मम्मटाचार्यः प्रथमां व्यञ्जनाविषयिणीं परिभाषां कथयति –

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापराक्रिया[3] ॥ इति।

इदं लक्षणमूलाया व्यञ्जनायाः स्थलमस्ति। प्रयोजनवत्याः लक्षणायाः स्थले प्रयोजनस्य ज्ञानाय व्यञ्जनैव व्यापारः।

---

1. ध्व.लो., १/४, पृ.४७
2. ध्व.लो. पृ.६०-६१
3. का.प्र., पृ.६९

काव्यप्रकाशकारः कुत्रापि व्यञ्जनायाः स्पष्टतया स्वरूपं न प्रत्यपादयत् –"तत्र व्यापारो व्यञ्जनात्मकः[1]" इत्येवमुदीर्य व्यापारापरपर्याय-पदप्रयोगमुखेन व्यञ्जनायाः स्वरूपवर्णनं दुरूहं तद्गभीरञ्च। व्यञ्जनायाः स्थलं न सङ्कुचितम्। व्यञ्जनाव्यापारार्थे अनेकान् शब्दान् प्रायुञ्जत काव्यविदः – "तटादौ ये विशेषाः पावनत्वादयस्ते च अभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः। तच्च ध्वनव्यञ्जनद्योतनादिशब्दवाच्यमवश्यमेषित-व्यम्" इति। सा व्यञ्जना शाब्दी आर्थी चेति द्विविधा भवति। कविराज-विश्वनाथः मम्मटीयं व्यञ्जनासूत्रं विशदयन् व्यञ्जनाया लक्षणविधौ मम्मटोक्तव्यञ्जनासूत्रस्थं 'तत्र' शब्दविवेचनपूर्वकम् उल्लिखति व्यञ्जनाम्।

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च[2] ॥

शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति नयेन अभिधा-लक्षणातात्पर्याख्यासु स्वस्वार्थावबोधपरायणासु एवंभूतासु अन्यार्थप्रतिपादन-विरतासु तिसृषु वृत्तिसु सतीषु यया वक्तृबोद्धव्यवैशिष्ट्यादिमुखेन अन्यः अर्थ उपपाद्यते सा शब्दगता अर्थगता प्रकृतिप्रत्ययादेश्च शक्तिः व्यञ्जनध्वनन-गमनप्रत्यायनद्योतनादिव्यपदेशविषया व्यञ्जना नाम्नी शक्तिः भवति। एवं व्यञ्जनास्वरूपं प्रतिपाद्य तस्या शाब्दी आर्थी चेति भेदावपि अदर्शयत्। रसरूपस्य आत्मनः अभिव्यक्तये आलङ्कारिकैः रससत्तात्मिका व्यञ्जना अङ्गीकृता। वामनीटीकाकारः अपि ब्रूते-"व्यञ्जना च शक्तिलक्षणाद्य-जन्यप्रतीतिजनकः पदादिगतो व्यापारः[3]" इति। शाब्दी आर्थी चेति व्यञ्जना द्विधा भवति। शाब्दी यथा-

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्॥[4]इति

---

1. तत्रैव
2. सा.द.पृ.५३
3. का.प्र.वा.टी.,२/१२, पृ.६९
4. तत्र, पृ.७७

आर्थी व्यञ्जना-

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्॥
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा[1]॥इति

इत्थं काव्यशास्त्रे व्यञ्जनास्वरूपं प्राप्यते।

**तात्पर्याख्यावृत्तिः**

तात्पर्याख्या शक्तिः मीमांसादर्शने शक्तिवर्णनप्रसङ्गे द्वितीयस्थानं भजते। शक्तेरस्याः मूलप्रवर्तकः कुमारिलभट्टः। तात्पर्याख्यां शक्तित्वेन अभ्युपेतुं केवलं मीमांसकानामेव अध्यवसायः दरीदृश्यते। अस्याः प्रथमं स्वरूपं शाबरभाष्ये दृश्यते। "पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीमर्था अवगताः सन्तो वाक्यार्थं सम्पादयन्ति[2] इति।

तत्र कौमारिलमते पदानां पदार्थैस्सह सङ्गतिः भवति वाक्यार्थबोधस्तु लक्षणया भवति। तस्मात् वाक्यार्थप्रतिपत्तये पदार्थप्रतितिः द्वारभूता स्वीकृता इति काव्यप्रकाशोक्तं तत्स्वरूपमग्रे वर्ण्यते। अस्याः शक्तेः स्वीकाराय तत्रैव मतभेदो दृश्यते। एतच्छक्तिस्वीकारस्य आवश्यकता का इति निरूप्यते। मीमांसकानाम् एकं प्रधानमुद्देश्यं वर्तते यत् वेदवाक्यार्थानाम् अर्थावगतिः इति। अतः मीमांसका वेदवाक्यार्थं विचारयितुं तत्र श्रुतिलिङ्गादिषट्कारणैः वेदोक्तवाक्यस्य तात्पर्यार्थं संयोजयन्ति। तत्र मीमांसका वाक्यार्थविचाराय अभिहितान्वयवादम् अन्विताभिधानवादं कल्पयन्ति। अभिहितान्वयवादः कुमारिलमतानुयायिनां विद्यते, अन्विताभिधानवादस्तु तच्छिष्यप्रभाकर-मतानुयायिनाम् अस्ति। अभिहितान्वयवाद एव तात्पर्यशक्तेः मूलकारणं भवति। वस्तुतस्तु एतद्वादविषयकः विचारः मीमांसाशास्त्रे विशदतया उपवर्णितः अस्ति। परमत्र प्रकृतानुपयुक्ततया किञ्चित् विमृश्यते।

---

1. तत्रैव ३/२१-२२,पृ.८२
2. पू.मी.सू.भा,१/१/२५

काव्यप्रकाशे अभिहितान्वयवादः मम्मटेन एवं निरूपितः यत्- "आकाङ्क्षा-योग्यता-सन्निधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीति अभिहितान्वय-वादिनां मतम्[1]" इत्युक्तेः आकाङ्क्षायोग्यतासत्तीनां कारणेन पदार्थानां परस्परं सम्बन्धे विहिते सति तात्पर्यार्थ उदेति। एष च सामान्यवपुरहितः विशेषशरीरः अपदार्थः प्रत्येकपदार्थभिन्नः वाक्यार्थापरनामा बोध्यते इत्याशयः। एतन्मते पूर्वम् अभिधया पदार्थानाम् उपस्थितिः जायते, ततः तेषाम् उपस्थितानां पदार्थानां तात्पर्यशक्त्या मिथः सम्बन्धो भवति एष एव वाक्यार्थः न केवलं प्रत्येकं पदस्य अपितु समग्रस्य अपि पदसमुदायस्य सम्बन्धविशेष एव। अन्विताभिधानवादे तु एतस्य मतस्य विपर्ययता स्वीकृता। प्रभाकरस्य मतं काव्यप्रकाशे एवं निरूपितं यत् "वाच्य एव वाक्यार्थ इति अन्विताभि-धानवदिनः"[2]मतस्य अस्य अभिप्रायः अस्ति यत् अभिधया पदार्था उपस्थिता भूत्वा पुनः तात्पर्याशक्तिद्वाराअन्वयम् अवाप्य वाक्यार्थप्रतिपत्तिं कारयन्ति। तन्न। अभिधया एव अन्वितानां पदार्थानाम् उपस्थितिः भवति ततः तात्पर्यशक्तिस्वीकारेण को लाभ इति। ततः अभिधाशक्तिजन्यार्थ एव वाक्यार्थो भवतीति तात्पर्यम्।

इदमेव दर्पणकारः विश्वनाथः एतत्सन्दर्भे एकां कारिकां प्रस्तौति|

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे[3]॥

केचित् पदार्थानाम् सम्बन्धबोधाय तात्पर्यार्थं कथयन्ति।

तत्र शक्तिः तात्पर्याख्या, शब्दः वाक्यं, अर्थः तात्पर्यार्थः इति व्यवह्रियते।

---

1. का.प्र.,पृ.३६
2. तत्रैव पृ. ३७
3. सा.द.,ल.,पृ.६७

अभिनवगुप्ताचार्यः ध्वन्यालोकस्य लोचनटीकायां व्यञ्जनास्थापने अभिहितान्वयवादाद्युक्तव्यङ्ग्यार्थप्रतिपत्तये व्यञ्जनानिराकरणोक्तयुक्तीः दूषयितुम् उपपादयति- "तदन्यथानुपपत्तिसहायार्थावबोधनशक्तिस्तात्पर्य-शक्तिः[1]"। एवं रीत्या उपर्युक्तवृत्तिविवेचनं परिशील्य एषा वृत्तितया केवलं मीमांसानुयायिनां सिद्धान्ते निर्णीयते।

**विमर्शः**

काव्यविद्भिः वाच्यार्थादतिरिक्तस्य अर्थस्य बोधाय वक्त्रादिवैशिष्ट्याद् व्यञ्जनारूपस्य व्यापारस्य कल्पना कृता। सा शक्तित्वेन तु व्याकरणशास्त्रे स्फोटरूपव्यङ्ग्यस्य व्यञ्जने क्षमस्य शब्दस्य व्यञ्जनरूपव्यापारं दृष्ट्वा ततः स्वीकृता। एतद्वचनं स्वयं ध्वन्यालोककारेणापि मुक्तकण्ठेन भणितम्। काव्यशास्त्रे व्यञ्जनरूपव्यापारः शब्दस्य अर्थस्य च उभयोः एव भवति। व्याकरणशास्त्रे तु केवलं शब्दगतः व्यञ्जनव्यापारो भवति। उभयत्र अयमेव भेदः। व्याकरणशास्त्रे व्यञ्जनाशक्तेः अवश्यकता स्फोटशब्दस्य स्वरूपवर्णने उपसर्गनिपातप्रकरणे च आसीत्। काव्यशास्त्रे तु मुख्यार्थाद् भिन्नः कश्चन अन्योऽर्थः अवगन्तव्यश्चेत् तदा स व्यञ्जनयैव गम्यः। अथ च काव्यात्मतया ध्वनेः स्वरूपावसरे रसनिर्वचने च व्यञ्जना नाम्नी शक्तिरेव अपेक्षिता आसीत्। व्याकरणशास्त्रे व्यञ्जनायाः स्वरूपं प्रयोगश्चेति परिभाषितम्। संस्कारमात्रत्वं व्यञ्जना इत्येव कथितम्। परं काव्यशास्त्रे तु केवलं व्यञ्जनाव्यापारमात्रमेव उपपादितम्। विश्वनाथादयः तस्याः लक्षणं कर्त्तुम् उपाक्रामन् किन्तु तत्र प्रयोगवैपुल्यात् अर्थावबोधने अन्यासु वृत्तिषु क्षीणासु अर्थान्तरस्य बोधकारिका शक्तिः व्यञ्जना एव इत्येव अकथयन्।

काव्यप्रकाशकारोक्तवचनेन इदं ज्ञायते यत् अन्याः वृत्तयस्तु लक्षयितुं शक्याः नियता, किन्तु व्यञ्जना नामाख्या एषा शक्तिः अलक्ष्या अनियता अर्थवैविध्यात्। अतः व्यञ्जनाया अस्तित्वं विपुलीकृतम् काव्यशास्त्रे स्वच्छन्दता च तस्याः प्रतिपादितम् इत्ययं भेदः। व्यञ्जनाया अपि भेदौ भवतः।

---

1. ध्व.लो.,टी.,पृ.६०

शाब्दी आर्थी च इति। शब्दोऽपि व्यञ्जकः अर्थोऽपि व्यञ्जकः भवति। मम्मटः काव्यप्रकाशे पञ्चमोल्लासे नैयायिकादीनां व्यञ्जनाविषयकं मतं समुपस्थाप्य प्रबलयुक्त्या तत् खण्डयित्वा व्यञ्जनास्थापानाम् अकार्षीत्।

तात्पर्यशक्तेः अनुशोधः मीमांसाशास्त्रे कृतो वर्तते। तत्रापि शाबर-भाष्यादिग्रन्थेषु केवलं वाक्यार्थरूपपरतया उल्लेखो लभ्यते। किन्तु एषा शक्तिः कुमारिलभट्टस्य बुद्धिप्रसूतरूपा वर्तते तस्माद् अभिहितान्वयवादोऽपि प्रसिद्धिमुपगतः। वाक्यार्थविचारक्रमं दर्शयितुम् आचार्यभट्टेन तात्पर्यनाम्नीं शक्तिं प्रसूय वाक्यार्थविचारप्रणालिः सरलीकृता। काव्यशास्त्रे तु मुख्यतस्तु शक्तित्रयस्यैव वर्णनं प्राप्यते। परं लोचनादिटीकासु व्यञ्जनाप्रतिष्ठापने तद्विरोधिनां मतं व्याचक्षाणोऽभिनवगुप्तः तां सीमाङ्कनपुरस्सरम् अलक्षयत्। तल्लक्षणविधानेन अविधानेन चतुर्थकक्षासन्निविष्टार्थस्य व्यङ्ग्यस्य प्रतीत्यर्थं हानिर्नास्ति। काव्यप्रकाशसाहित्यदर्पणादिग्रन्थेषु तात्पर्यार्थनिरूपणरीत्या तत्र मम्मटादीनाम् औदासीन्यमेव प्रतीयते इति। अतः एषा शक्तितया केवला कुमारिलादिभिः मीमांसकैरेव अभ्युपेता।

इत्थमहं गभीरं शब्दशक्तिविचारविषयं वेदोपनिषन्निरुक्तशास्त्रान् आलोड्यव्याकरणन्यायमीमांसाशास्त्रकुक्षेरागतंकाव्यशास्त्रहृदयस्थं विविध-शास्त्रदृष्ट्या व्यधाम्। अथ च तत्तच्छास्त्रीयविपश्चिद्भिरुपस्थापितवृत्तिविषयक-मतान्यपि सन्दर्श्य सविशदम् अभिधादिवृत्तिस्वरूपविषयं यथाविधि व्यमृशम्।

## तृतीयाध्यायः

# प्राक्तनालङ्कारिकोदीरितलक्षणावृत्तिविमर्शः

अस्मिन्नध्याये अधोलिखिता विषया एवं भवन्ति - प्रस्तावः, लक्षणाशब्दस्य निष्पत्तिः निर्वचनम् अभिधानकोशादिग्रन्थदृष्ट्या तस्यार्थः चेति। लक्षणाशक्तेः उद्भवः विस्तरश्च, लक्षणावृत्तेः उपजीव्यता इत्युक्तेः काव्यशास्त्रतत्त्वोपजीव्येषु नाट्यशास्त्र-अग्निपुराण-विष्णुधर्मोत्तरपुराणादिषु लक्षणाशब्दशक्तेः अवस्थितिः केतिविचारः। लक्षणायाः किं बीजम् ? उक्ते लक्षणावृत्त्यभ्युपगमनाय प्रमुखतमं कारणं किमिति। प्राचीनपदग्रहीतॄणामाचार्य-भामहात्प्रभृतिमम्मटपर्यन्तानामाऽलङ्कारिकाणां ग्रन्थानुरोधाल्लक्षणाशक्तेः स्वरूपंतेषाञ्च मतभेदविमर्शः चेत्येते विषयाविस्तरेण विचारयिष्यन्ते। अयं सीमा न केवलम् आलङ्कारिकाणां जन्मकालाद् गृहीतः प्रत्युत शब्दशक्तिलक्षणविवेचनदृशा अस्ति। अमुष्मिन् सीम्नि भामह – दण्डि – उद्भट – वामन – रुद्रट – आनन्दवर्धन – मुकुलभट्ट – राजशेखर – अभिनवगुप्त – महिमभट्ट – भोजराज – मम्मटाचार्या आलङ्कारिकाः प्राचीनाः इति प्रसिद्धाः इतिहासविद्भिः तथाम्नातत्वात्। क्रमशस्तेषांच कृतयः भामहकाव्यालङ्कार-काव्यादर्श-अलङ्कारसारसङ्ग्रह-भामहविवरण-काव्यालङ्कारसूत्रवृत्ति-रुद्रटकाव्यालङ्कार-ध्वन्यालोक-अभिधावृत्तिमातृका-काव्यमीमांसा-लोचन-व्यक्तिविवेक-शृङ्गारप्रकाश-सरस्वतीकण्ठाभरण-काव्यप्रकाशाभवन्ति।

**प्रस्तावः**

'सर्वोऽपि शब्दोऽर्थप्रत्यायनार्थं प्रयुज्येत' इति नियमात् लोके सर्वविधव्यवहारः शब्दाधीनोभवति। यथा कस्यचिद्विद्यमानस्य प्रकाशनीयस्य पदार्थस्य ज्ञानार्थं प्रकाशकरूप आलोकः अपेक्ष्यते। तथैवप्रकाश्यरूपस्य अर्थस्य ज्ञानार्थं शब्दरूपः प्रकाशकः आवश्यकः। तस्मात् अर्थप्रत्यायनमेव शब्दस्य प्रयोजनम्इत्येवावसीयते। शब्दस्य अर्थः, शक्तिः, अर्थस्य च शब्दः

शक्तिः, द्वयोः वाच्यवाचकशक्तिः। एष एव सम्बन्धः इति कथ्यते। अत्र त्रयः अंशाः अनिवार्या भवन्ति-प्रतियोगी, अनुयोगी, सम्बन्धः चेति। उक्तञ्च- "सम्बन्धो हि सम्बन्धिद्वयभिन्नः द्विष्ठः एकः विशिष्टबुद्धिनियामकः"[1] इति यथा- दण्डी स्वामी इत्यत्र यस्य सम्बन्धः, स प्रतियोगी। दण्डिनः दण्डेन सह सम्बन्धः (दण्डविशिष्टपदघटतया) इत्यतः दण्डी प्रतियोगी भवति। यत्र सम्बन्धः सःअनुयोगी। यथा दण्डः। स सम्बन्धः द्वयोस्तिष्ठति, यथा-दण्डिनि दण्डे च अस्ति, एकश्च अस्ति। सः दण्डनिष्ठाधेयतानिरूपिताधारतावान् दण्डीति-दण्डिदण्डयोः अधाराधेयभावसम्बन्धः। एवमेव वाच्यनिष्ठवाच्यतानिरूपित-वाचकतायाः आश्रयः शब्दः. द्वयोः सम्बन्धः वाच्यवाचकभावः यद्वा बोध्यबोधकभावरूपः। काव्यप्रकाशस्य वामनीटीकाकारः कथयति। को नाम पदार्थः? पदोद्देशः पदार्थः इत्युक्तौ यम् अर्थम् उद्दिश्य पदं प्रयुक्तंसः पदार्थः। अर्थप्रयोगाय एव शब्दः प्रयुक्तो भवतीतिशब्दस्य अर्थेन सह अर्थस्य शब्देन सह यः सम्बन्धःस एव शक्तिपदेन, क्वचित्वृत्तिरूपेण कुत्रचिच्च व्यापाररूपेण व्यपदिश्यते तत्तत्साम्प्रादायिकैः। तस्माद् अयं सम्बन्धः काव्यशास्त्रे शब्दशक्तिनाम्ना आलङ्कारिकैः व्यपदिष्टः। काव्यशास्त्रे शब्दशक्तेः त्रिविधाः प्रकाराः सम्भवन्ति। शब्दशक्तेः विचारे अन्येषां काव्यशास्त्रिणां मतान्तराणि बहुलतया सन्ति। प्रत्युत विषयोऽयं काव्यशास्त्रे स्फुटतया परिशीलितो दरीदृश्यते। काव्यशस्त्रे शब्दः अर्थस्य प्रत्यायनार्थं त्रीन् व्यापारान्कुरुते। तस्मात् शब्दोऽपि त्रिविधः तत्प्रतिपाद्यत्वात् अर्थोऽपि त्रिविधः व्यापारोऽपि त्रिविधः भवति। व्यापार एव शक्तिपदपर्यायत्वेनापि गृह्यते। क्रमेण वाचक-लाक्षणिक-व्यञ्जका इति शब्दाः। वाच्य-लक्ष्य-व्यङ्ग्या इति तदीयार्थाः। अभिधा-लक्षणा-व्यञ्जनेति शक्तयः। यथोक्तं साहित्यदर्पणे विश्वनाथेन–

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः[2]॥ इति

---

1. परम. शक्ति निरूपणम्
2. सा.द, द्वि. प. का.२.

अभिधावृत्त्या बोधितोऽर्थः सर्वैरपि सुकरतया ज्ञातुं शक्यः। किन्तु लक्ष्यार्थस्याधिगमनाय वक्तृतात्पर्यरूपा कुशलता आवश्यकी। तदनन्तरं वक्तृविवक्षितं गम्यमानार्थं पार्यन्तिकार्थं ज्ञातुं व्यङ्ग्यार्थस्य प्रत्ययस्तु आवश्यकः, तत्र आवश्यकी महती सहृदयता। ततः व्यङ्ग्योऽर्थः काव्यतत्त्व-मर्मज्ञैः सहृदयैरेव वेदितुंशक्य इति। उक्तमपि त्रिवेणिकाकारेण। यथा-

शक्तिं भजन्ति सरलाः लक्षणां चतुरा जनाः।
व्यञ्जनां नर्ममर्मज्ञाः कवयः कमना जनाः॥[1] इति।

कदाचिच्छब्दप्रयोगचतुराः व्यवहारकुशलावाग्मिनो जनाः साधारण-जनस्य कथननिरपेक्षया किञ्चिद्विशिष्टतयाअल्पशब्देन स्वकीयम् आशयं प्रकटयितुं लाक्षणिकं प्रयोगम् आश्रयन्ति। अस्य प्रयोगस्य कारणद्वयं भवति, एकम् रूढिः अपरञ्च प्रयोजनमिति। तत्र शब्दस्य द्वितीया लक्षणानाम्नी शक्तिः हेतुभूता भवति। लोकेऽपि लाक्षणिकाः प्रयोगाःप्रचुरतया श्रुता भवन्ति। यथा-कश्चित्स्वगृहाद्बहिः गन्तुं वाहनवाहिनं आह्वातुं तं प्रति वक्ति- `हे वाहन इहागच्छ इति 'रूढिहेतुतया वाहनस्य अचेतनतया स्वक्रियाशून्यतया वाहनस्य वाहनवाहके लक्षणा भवतीति एवंविधाः प्रयोगाः नित्यं व्यवह्रियन्ते।

यथा च 'जापानः तकनीकिमत्सु देशेषु अग्रणीः' 'उत्तरकोरिया परमाणुपरीक्षणे कुशलः' इत्यत्र जापान-उत्तरकोरिययोः देशविशेषयोः अचेतनतया अग्रणीत्वरूपः अर्थः न सङ्गच्छते तस्माज्जापान-उत्तरकोरिययोः देशविशेषयोः तत्स्थितजनविशेषार्थस्य स्वीकारेण वक्तृप्रयुक्तवाक्यार्थतात्पर्य-सिद्धिः उपपद्यते। अतः तत्स्थितजनविशेषार्थः लक्षणाशक्त्या बोध्यते।

एवं तत्केवलं रूढिवशात् एवंविधा प्रयोगा दैनन्दिनव्यवहारे आनीयन्त एव। तस्मात् तथाविधशब्दप्रयोगोऽपि वाचक इवार्थप्रत्ययकारी भवति। एतादृशः प्रयोगः काव्यशास्त्रे लक्षणाकोटौअन्तर्भवति इति। उक्तमपि ध्वनिकारेण-

---

1. त्रिवे, का.1

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते। वेद्यते स तु काव्यार्थतत्त्वज्ञैरवकेवलम्[1]॥

लक्षणाशब्दस्य निष्पत्तिः निर्वचनञ्च-

चुरादिगणस्य लक्षिदर्शनाङ्कनयोः इत्यस्माद्धातोः **करणाधिकरणयोश्च**[2] "इतिपाणिनीयशास्त्रेण करणार्थे ल्युटि विहिते लक्षण इत्यतः स्त्रीत्वविवक्षायां **अजाद्यतष्टाप्**[3] इत्यनेन सूत्रेण टाप्प्रत्यये सति **लक्षणा**शब्दो जायते।

**व्युत्पत्तिः** – लक्ष्यते प्रतिपाद्यते अनया यद्वा लक्षणं लक्षणा चेतिकरणे भावे इति उभयविधव्युत्पत्त्या 'लक्षणा' शब्दः सिद्ध्यति।

**लक्षणाशब्दस्य अर्थः**- लक्ष्यार्थबोधिकाशक्तिः मुख्यार्थव्यवहितार्थान्तरोपस्थापिका शक्तिविशेषा।

**अभिधानकोशादिग्रन्थदृष्ट्या अर्थः** सारसी इति मेदिनीकोशे[4]। 'हंसी'[5] इति सिद्धान्तकौमुद्यामुणादिवृत्तौ। महाभारते अप्सराः इत्यर्थः। यथोक्तं भारतकारेण – 'अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा'[6] इति। शक्यसम्बन्ध इति भाषापरिच्छेदः[7]। काव्यशास्त्रे तु अस्याः लक्षणावृत्तेः अर्थस्तु शक्यार्थस्यान्वयबोधविशेषरूपार्थे शब्दशक्तौ द्वितीयायामत्वेन गृह्यते। स च लक्ष्यार्थो भवतीति।

---

1. ध्वन्या. प्रथमोद्योत
2. अष्टा., ३.३.११७
3. तत्रैव ४.४
4. मेदि,
5. वै. सि. उ
6. महा.भारत. `मदनमोहनझाचित्रितसंस्कृत-ऐप्सजालानि-वाचस्पत्यम्, अमरकोशः, शब्दकल्पद्रुमः इत्यादि'।
7. भा.प., मुक्ता,शब्दनिरू, पृ.४८

## लक्षणाया उद्भवो विकासश्च

शब्दस्य साक्षात् सङ्केतितार्थस्य बोधिका शक्तिरभिधा। तेन बोध्यः अर्थः मुख्यार्थो भवति। यश्च शब्दात् सर्वादौ उपस्थाप्यते। परं क्वचित् मुख्यार्थः वाच्यार्थो वा वाक्यपदैस्सह अन्वयं न प्राप्नोति। इत्युक्ते मुख्यार्थेन तात्पर्यं नोपपद्यते। फलतः मुख्यार्थः बाधितो भवतिएतद्दशायां स्थितौ तत्सम्बद्धः कश्चिद् अन्यः अर्थः प्रतीयते। स प्रतीतः अर्थः रूढेः प्रयोजनस्यवा हेतुना कस्यचिद् विशेषप्रयोजनस्य प्रतिपादनाय भवति। स अन्यः अर्थ एव लक्ष्यार्थापरपर्यायः, तत्प्रतिपादिका शक्तिः लक्षणा इति व्यपदिश्यते आलङ्कारिकैः।

मानवव्यवहारे एतादृशाः प्रयोगाः अतिसाधारणाः सन्ति। शास्त्रजगति शब्दस्य शक्तितया लक्षणा सुप्रतिष्ठिता वर्तते। लक्षणा भक्तिगुणवृत्तिनाम्नापि वेद्यते। कुत्रचित्तु एते त्रयोऽपि शब्दाः पर्यायतया प्रायुज्यन्त। क्वचित् तु त्रयोऽपि शब्दा पृथक्तया प्रयुक्ता प्राप्यन्ते। काव्यशास्त्रेलक्षणायाः विकसितरूपंशब्दस्य द्वितीयशक्तित्वञ्च प्राप्यते। परन्तु लक्षणायाः बीजन्तु वैदिकसाहित्ये व्याकरणग्रन्थे दर्शनग्रन्थेषु चावलोक्यते। संस्कृतकाव्यशास्त्रे प्रतिष्ठित-लक्षणावृत्तेः आधारभूः मुख्यतयाव्याकरणमीमांसान्यायशास्त्राणां विमृष्टमतेभ्य एव आनायि।

## संहितासु लक्षणाशब्दप्रयोगः

अशेषविश्वस्य उपलभ्यमानेषु वाङ्मयेषु ऋग्वेद एव आद्या कृतिः वर्तते। तत्र लक्षणाभक्तिगौणीप्रभृतयः शब्दाः प्राप्यन्ते। उदाहरणाय वैदिक-वाक्यानामर्थविचारार्थं प्रवृत्तस्य पूर्वमीमांसाशास्त्रस्य प्रवर्तकेन भगवज्जैमिनिना द्वादशसूत्र्यामेकं सूत्रमारितम्।[1] तत्र पठितं गौणीशब्दं विवेचयन् मीमांसा-सूत्रभाष्यकारः शबरस्वामी भाष्ये वैदिकमुदाहरणम् उद्धरति यत्-**आग्नेयो वै ब्राह्मणः**[2] इति। एतेन उदाहरणेनगुणवृत्तिप्रसङ्गः प्राप्यते। इत्यतःश्रुतावपि लाक्षणिकः गौणश्च प्रयोगौ स्वीकार्यौ।

---

1. तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायैर्गौणी पू.मी.सू.१-४-२२, पृ. ३१३
2. तै.स. २-६-३

स्पष्टतः लक्षणायाः प्रयोगः शक्तिपरतया कृतः इति निश्चप्रचं वक्तुं न शक्यते। यतोहि ऐतरेयब्राह्मणस्य एकमुदाहरणं विहाय शक्तित्वेन लाक्षणिक-शब्दस्य प्रयोगो वैदिकवाङ्मये कुत्रचनापि न लभ्यते। ब्राह्मणग्रन्थेषु भाक्तपदस्य उल्लेखः प्राप्यते, ऋग्वेदस्य ऐतरेयब्राह्मणे पठितः भक्तिशब्दः -**मरुतां सा भक्तिर्मरुत्वतीयमुक्थं शस्त्वा मरुत्वतीयया यजति यथाभागं तद्देवताः प्रीणाति**"[1] शब्दः लक्षणापरतया उपवर्णितो नैव साधु। परन्तु वेदवाक्यार्थं विचारय**द्भिः** प्रप्रथमं लक्षणायाः प्रयोगा आश्रिता इति मे भाति।

**निरुक्ते लक्षणाविचारः**

**बहुभक्तिवादीनि ब्राह्मणवाक्यानि भवन्ति** इत्युद्घुष्य यास्काचार्यः स्वयं लक्षणां समर्थयते इति प्रतीयते। निरुक्तस्य द्वितीये अध्याये लक्षणाया अङ्कुरः द्रष्टुं शक्यते। अत्रैव लक्षणालक्ष्यार्थं कानिचन उदाहरणानि प्रदर्शितानि। तद्यथा- गमनार्थकात् पदधातोः निष्पन्नः पाद इति शब्दः मुख्यतः पशुपादरूपार्थस्य बोधको भवति। पशूनां चतुष्पादता भवति एतत्सादृश्यात् चतुश्चरणवतः श्लोकस्य प्रतिचरणं पादः इति व्यवहारो भवति। इत्ययं लक्षणिकप्रयोगः। एवमेव कस्यचनापि वस्तुविशेषस्य चतुर्थांशः पादः इति व्यपदेशः। एवं गोशब्दस्य मुख्यार्थः पृथिवी धेनुः गवेन्द्रः चेति, परं सः शब्दः तत्सम्बद्धम् अन्यपदार्थमपि बोधयति। अतः एवंविधाः प्रयोगा लक्षणा-वृत्तिगम्या भवन्ति। अथ च एकं प्रकरणं विद्यते **यत्र-मन्त्राः सार्थका उत निरर्थकाः** इति विचारेतत्र पूर्वस्मिन् पक्षे वेदमन्त्राणां नैरर्थक्यम् साधयितुं कौत्सः नानविधाभिः वाचोयुक्तिभिः मन्त्राणाम् अनुपपन्नार्थता विप्रतिसिद्धार्थता सिद्धानुवादकता निरर्थकता अविस्पष्टार्थता चेति अचकथत्। यास्काचार्यः निरुक्तग्रन्थे पूर्वपक्षस्य मतम् 'अदितिः सर्वम्' इति मन्त्रांशे भाक्तत्वं भक्तिलक्षणागौण्यादिशब्दप्रयोगं विनैव उपवर्णयति।

ततः निरुक्तकारस्य यास्कस्य समये इदृग् विचारक्रमः आरभत इति निश्चीयते। निरुक्तस्य दुर्गाचार्यकृतायां दुर्गवृत्तौ लक्षणा इत्यर्थे भक्तिशब्दः

---

1. ऐतरेय, ३.१२.९ पृ.४५२

गुणवृत्तिरितिशब्दश्च प्रयुक्तौ प्राप्येते। **यथा** 'अत्र ब्रूमः'। भक्तिरेषा। द्विविधा हि शब्दप्रवृत्तिः मुख्यार्था गौणी च। तदेवं सति यत्र मुख्यासम्भवः तत्र गौणी आश्रीयते। स एष भक्तिवादोऽदितिः सर्वमिति। यथा कथञ्चिदनेकोपकारिणं ब्रूयात्त्वमेवमाता त्वमेव मे पितेत्येवमेतदपि द्रष्टव्यम्। लौकिकेष्वपि चार्थवत्सु शब्देषु एतदुच्यमानंदृष्टं यथा सर्वरसा अनुप्राप्ताः पानीयमिति। ततो हि तेषां प्रभव इत्यनया गुणवृत्त्यैवमुच्यते। एवमिहापि गुणवृत्त्या कयाचिददितेः, सर्वत्वमुच्यते। सर्वमेवैतदुपपद्यत एव गुणवृत्त्या तस्मादर्थवन्तो मन्त्रा इति[1]। " इति भक्तिशब्दस्य गुणवृत्त्यर्थे प्रयोगो दृश्यते। तत्र निरुक्ते सप्तमाध्यायस्य तृतीयपादे तिसृणां देवतानां भक्तिसाहचर्यं प्रकटितमस्ति। भक्तिसाहचर्यद्वारा देवा अवगम्यन्ते इति मन्त्राणामर्थस्मारकत्वमभ्युपगतम् तदिदं कथयति दुर्गाचार्यः वृत्तौ **यथा**- 'तासामेव तिसृणां भक्तिसाहचर्यम्। भक्तिश्च साहचर्यं च भक्तिकृतं वा साहचर्यमिति। लोकादीनामग्न्यादिभिर्भजनं भक्तिः। सहचरभावः साहचर्यम्। असंविज्ञातपदे मन्त्रे भक्त्या साहचर्येण वा यथा देवता अवगम्यते इत्येवमर्थं भक्तिसाहचर्यमुच्यते'**इति**[2]। उक्तोद्धरणात् **एतत् स्पष्टं वक्तुं** यद् वेदमन्त्राणां नैरर्थक्यादिदोषापकरणार्थं यास्कादिभिः सर्वप्रथमतया लाक्षणिक-शब्दप्रयोगचिन्तनार्थो विचारः निरूपितः अत्र साहचर्य- मूलत्वतदितरसम्बन्ध-मूलत्वञ्च बीजरूपतया वर्णितम्।

**पाणिनीयाष्टाध्याय्यां लक्षणासङ्केतः**

शब्दार्थसम्बन्धविचारपरकेषु सूत्रग्रन्थेषु पाणिनिविरचिताष्टा-ध्यायात्मकेषु सूत्रेषु लक्षणाविचारः स्पष्टरूपेण नैवोपलभ्यते। परं पुंयोगादाख्यायामिति सूत्रनिरूपणे सङ्केतस्तु दृश्यते। **पातञ्जलमहाभाष्ये लक्षणासङ्केतः**

लक्षणावृत्तिविषयस्य निरूपणे व्याकरणमहाभाष्यस्य विचारः अपेक्षितो भवति। यद्यपि अष्टाध्यायीकारेण पाणिनिना व्याकरणसूत्रधिया

1. दुर्ग., पृ.३५८
2. तत्रैव, पृ.३५८

अनेकशः गौणार्थस्य सङ्केतः सूत्रशैल्यां विहितो वर्तते। तथापि तत्र स्पष्टरूपेण कल्पना नैव प्राप्यते। ततः ईदृशी कल्पना भाष्यग्रन्थे एव सुस्पष्टतया व्यक्ता वर्तते। तथाहि – **पुंयोगादाख्यायाम्** इति सूत्रे उक्तमस्ति यत् पुरुषवाचकशब्देभ्यः पुंयोगे स्त्रियः आख्यायां ङीष् विधीयते। यथा- 'प्रष्ठस्य स्त्री''ब्राह्मणस्य स्त्री' इत्याद्यर्थे 'प्रष्ठ' 'ब्राह्मण' शब्दाभ्यां स्त्रीत्वविवक्षायां उपर्युक्तसूत्रात् ङीष्प्रत्ययेन 'प्रष्ठी' 'ब्राह्मणी' इति शब्दौ निष्पद्येते। प्रश्नः उत्पद्यते यत् एते शब्दास्तु मूलतः पुल्लिङ्गाः, स्त्रीलिङ्गा कथं भवितुं शक्या, अर्थात्भिन्ने अभिन्नस्य ज्ञानम्, अतस्मिन् तज्ज्ञानम् इति कथं सम्भवति। एतत्समाधानं भाष्यकारेण पाणिनीयं सूत्रद्वयम् उद्धृत्य अकारि। तदर्हति[1] तदर्हम्[2] इति सूत्रद्वयं सूचयतियत्द्वयोः पदार्थयोः योग्यतरूपसम्बन्धः भगवते पाणिनये सम्मत आसीत्। अतः भिन्नपदार्थयोः भिन्नपदार्थस्य अभेद आरोपितः भवति। इमम् अभेदसम्बन्धं स्पष्टीकर्तुं लक्षणा आवश्यकी भवति। भगवान्भाष्यकारः अन्यस्मिन् अन्यदीयस्य धर्मस्य आरोपार्थं चतुरः प्रकारान् मेने। तात्स्थ्यम्**,** ताद्धर्म्यम्**,** तत्सामीप्यम्**,** तत्साहचर्यम्**,**[3] इति। तद्यथा-

१. **तात्स्थ्यम्** इत्यस्योदाहरणं **मञ्चा हसन्ति**, **गिरिर्दह्यते** इति। मञ्चानाम् अचेतनतयाहासस्याभावे सति मञ्चा इत्यत्र मञ्चस्था इति**,** तथैवगिरेः दाहनस्य असत्वात् गिरौ वर्तमानं यत्किञ्चिदिति आधेयपदार्थे आधारस्य आरोपः। तस्मिन् तिष्ठति तत्स्थः**,** तत्स्थस्यभावः तात्स्थ्यम् इति।

**२. ताद्धर्म्यम्**- इत्यस्योदाहरणं भवतिजटिनं यान्तं कश्चित् सङ्केतयन् **ब्रह्मदत्तः जटीति** वाक्यं प्रायुङ्क्त। ब्रह्मदत्ते यावन्ति विद्यमानानि लक्षणानि तावन्ति जटिनि क्रियन्ते इत्यतः जटी ब्रह्मदत्त इत्युच्यते ताद्धर्म्यात्[4]। तस्य धर्मस्य भावः**,** ताद्धर्म्यम्।

---

1. अष्टाध्यायी, ५.१.६३
2. अष्टाध्यायी, ५.१.१७
3. महा., ४.१. ४८
4. तत्रैव

३. **तत्सामीप्यम्**- गङ्गायाः तटे घोष इति वक्तव्यापेक्षयागङ्गाया अत्यन्तसमीपे घोषस्य वर्तमानत्वात् **गङ्गायां घोष** इत्युक्तम्। एवमेव **कूपे गर्गकुलम्** इत्युच्चार्यमाणे कूपस्य समीपे गर्गकुलमिति विवक्षितम्। कूपसमीपे विद्यमानत्वं गङ्गाप्रवाहसमीपित्वञ्च कारणमस्य।

४. **तत्साहचर्यम्**- कुन्तधारिपुरुषान् प्रवेशय इति वक्तव्यापेक्षया कुन्तान् प्रवेशय इति व्यपदिश्यते। कुन्तसाहचर्यात् पुरुषस्य विवक्षया यष्टिधारिणः प्रवेशयइति वक्तव्ये यष्टिसाहचर्यात्पुरुषस्ययष्टीः प्रवेशय इति व्यवह्रियते।

महाभाष्यस्य पर्यालोचनेन इदं तु बुद्ध्यते यत्लक्षणाशब्दप्रयोगेण सार्धं तत्सङ्कल्पनम् इतोऽपि स्पष्टतया नैवाधिगतम्। प्रत्युत तदभाववति (अतस्मिन्) तदारोपो महाभाष्ये पतञ्जलिना स्वीकृत एव। अयमारोपः लक्षणाया बीजमिति अवगम्यते। अतः वदितुं शक्यते यत् लक्षणाशब्दप्रयोगमन्तरेण लक्षणा-प्रतिपाद्योऽर्थः भाष्यकारेण निरूपितः इति।

**न्यायसूत्रे लक्षणाविषयकसङ्केतः**

न्यायसूत्रे लक्षणाविषयकसङ्केतोऽवश्यं दृश्यते। तथापि गौतमस्य न्यायसूत्रे 'वाक्छलसामान्यच्छलोपचारच्छलभेदात्' छलस्य प्रकारत्रयं स्वीकृतमस्ति। तत्रोपचारच्छलस्य लक्षणानिर्देशात् प्राक् शब्दस्यार्थेन यः सम्बन्धोऽस्ति तं धर्मत्वेन कथयति। यदि तादृशधर्मविकल्पनिर्देशात् अर्थस्य निषेधः क्रियते तदेव उपचारच्छलम्।

यथा- सूत्रं बोधयति – **धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्**[1] इति। उदाहरणत्वेन मञ्चाः क्रोशन्ति इत्येवोपलभ्यते। अत्र उदाहरणपर्यालोचनेन लक्षणाबीजस्यआनयनं तदानीमेव जातमितिबुध्यते। इतोऽपि एकं सूत्रं विशेषतः लभ्यते यत्र यः उपचारः स उपचारः दशसु अर्थेषु प्रयुक्तो वर्तते। सूत्रे अतद्भावेऽपि तद्भाव इत्यस्मिन्नर्थे उपचारः परिभाषितः।

1. न्या. सू. १.२.१.४.

एतस्मिन् न्यायसूत्रेलक्षणादिशब्दपरतया व्यवहारः नैव कृतः, विहितस्तु उपचारशब्दतया। तथाहिसूत्रं **"सहचरणस्थानतादर्थ्यवृत्तमानधारण-सामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गा-शाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः[1]"** इति अत्र उपचारशब्दस्य दशविधाः अर्थाः सोदाहरणं निम्नरूपेण प्रस्तूयन्ते –

अ. **सहचरणार्थे**–'यष्टिकान् भोजय' इत्यत्र विप्राः सयष्टिका "यष्टिका" पदेन कथिता उभयोः यष्टिविप्रयोः सहस्थितिसम्बन्धात् भोजनविषयकः प्रवेशः। एवमेव 'कुन्ताः प्रविशन्ति' इत्यपि।

आ. **स्थानार्थे**–'मञ्चाः क्रोशन्ति' इत्यादौ मञ्चशब्दः मञ्चोपरि सुप्तान् शिशूनअभिधत्ते, अतः इहउपचारः

इ. **तादर्थ्यार्थे**–'कटमादत्ते' इत्येष प्रयोगः कटपदं कटार्थकान् कुशान् तृणविशेषान्नुद्दिश्य क्रियते इति तादर्थ्यादुपचारः।

ई. **वृत्तार्थे** – 'अयं यमो राजा' इत्यत्र यमसदृशकार्यसम्पादयितरि नृपे तात्कर्म्यात् यमशब्दः उपचारात् प्रायुज्यत।

उ. **मानार्थे** – **'**आढकसक्तवः' इति प्रयोगः आढकेन तुलायन्त्रविशेषेण मिता परिमापिताः सक्तवः पदार्थविशेषा इत्यर्थे भवति।

ऊ. **धारणार्थे**– 'तुलाचन्दनम्' इति प्रयोगः तुलायां तुलायन्त्रे स्थापितचन्दनम् इत्यर्थेअस्ति।

ऋ. **सामीप्यार्थे** – "गङ्गायां घोषः" "गङ्गायां गावश्चरन्ति" इत्यत्र गङ्गापदं सामीप्यसम्बन्धेन गङ्गातीररूपम् अर्थं प्रत्याययति।

ऌ. **योगार्थे** – **कृष्णः शकटः** इत्यत्र कृष्णशब्दस्यअभिधाशक्त्या वाच्योऽर्थः कृष्णगुणः भवति कृष्णगुणविशिष्टे जने तुसमवायसम्बन्धाद् उपचारः।

ऍ. **साधनार्थे** – अन्नं प्राणाः इत्यत्र प्राणानां कारणभूतमन्नमेव तत् प्रथमान्तकथनात् – अभेदेन प्राणाः इति शब्देन अन्वयं प्राप्नोति। तस्माद् अन्नं प्राणाः इति उल्लिखितम्।

1. न्या.सू.,२/२/६३

ऐ. **आधिपत्यार्थे** – अयं कुलम् इत्युदाहरणे आधिपत्यरूपसम्बन्धेन पुरस्स्थिते पूर्णस्य कुलस्यारोप उपचारतः।

निरूपितेषूदाहरणेषु लोकप्रसिद्धेषु, नित्यं व्यवह्रियमाणेषु उपचारः गौतममहर्षिणा प्रादर्शि। तेन लक्षणाशब्दप्रयोगो नैव कृतः। अत्र यानि सहचरणस्थानादीनि दश कारणानि निरूपितानि तानि परस्परं नितरां भिन्नानीति वक्तुं न शक्यते अतिव्याप्तिदोषप्रसक्तित्वं विद्यते एव तेषाम्। अतः एतद्वक्तुं शक्नुमः यत् गौतमाचार्यः लोकसिद्धप्रयोगान् व्याख्यातुम् उपचाररूपस्यातद्भावेऽपि तद्भावस्य कारणानि निरूपितवान् इति।

**५. मीमांसासूत्रे लक्षणासङ्केतः**

उपर्युक्तसूत्रग्रन्थादनन्तरं जैमिनिसूत्रं क्रमप्राप्तं भवति। वेदवाक्यानां गूढार्थं निहिततात्पर्यार्थंपरस्परं सङ्गतिं स्थापयति मीमांसाशास्त्रम्। अतः मीमांससूत्रेष्वपि विचारः कर्तव्यः इति। तत्र अर्थवादानां प्रामाण्य-विचारावसरे पूर्वपक्षिभिरर्थवादानामसदभिधातृत्वमापादितम् तदिदं निरस्य विधौ अन्वयनं तेषामर्थवादानां निरूपयति तत्सिद्धिपेटिकायां जैमिनिः। तस्मात्विधिद्वारा अर्थवादानां प्रामाण्यम् उपस्थापितम्। जैमिनिः अत्र लाक्षणिकार्थप्रयोगस्य षट्कारणानि न्यरूपयामास। प्रत्युत तेन कुत्रापि लक्षणागौण्युपचारादिशब्दाः वृत्तिपरतया नैव प्रयुक्ता इति ज्ञायते। तथा हि सूत्रम् – **तत्सिद्धिजातिसारूप्यप्रशंसाभूमालिङ्गसमवाय इति गुणाश्रयाः**[1] इति। अस्य सूत्रस्य व्याख्या शाबरभाष्ये गौणव्यवहारपरत्वेन विहिता। जैमिनिना प्रयुक्ताः गुणवादगौणमुख्यादयश्शब्दाः अर्थपरकाः एव नैव वृत्तिपराः। तथाहि-गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः[2] गुणाद्वाप्यभिधानं स्यात्सम्बन्धस्याशास्त्रहेतुत्वात्[3] गुणानां च परार्थत्वात् असम्बन्धः समत्वात्[4]। **अक्ताश्शर्करा उपदधाति, तेजो वै घृतम्** इत्यत्र

1. पू.मी.सू. १.४.२.३.
2. तत्रैव ३.३.९.
3. तत्रैव ३.२.४.
4. तत्रैव ३.८.२.४.

श्रुत्या घृतस्तुतिः, लक्षणया सामान्यस्य श्रुतिश्च लक्षणाया ज्यायसी[1]। जैमिनिनाप्रयुक्ताः वचनं सामर्थ्यम् लिङ्गम् इति शब्दाः शब्दशक्ति-माहुरितिमम मतिः यथाश्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् यदर्थस्याभिधानं शब्दस्य श्रवणमात्रा-देवावगम्यते स श्रुत्या अवगम्यते[2]। श्रवणं श्रुतिः। श्रुतिशब्दः अभिधापरकः। जैमिनिः भक्तिः इति शब्दं मुख्यार्थादितरत्र प्रयुक्तवान् प्रयुक्तः भक्ति-सन्निधावन्याय्येति चेत्' इति सूत्रे। पूर्वपक्षिणो मतस्य निरूपणावसरे इमं भक्तिशब्दं भाष्यकारः शबरस्वामी शब्दशक्तिपरत्वेन व्याख्यात्। भक्तिश्चान्याय्या मुख्ये सम्भवति[3] इति।

तत्सिद्धिजात्यादिभिः हेतुभिः गौणलक्षणायाः कारणानि उक्तानि। **तत्सिद्धिः** –कार्यसिद्धिरपि गुणवादस्य सम्बन्धो[4] भवति। अत्र तत् इत्यनेन सूत्रसम्बन्धेन शब्देन कार्यं परिगृह्यते । उदाहरणाय च यजमानः प्रस्तरः यजमान एककपालः[5] इति च श्रूयते। अत्र द्वयोः शब्दयोः समान-विभक्त्यन्तत्वाच्च अभेदसम्बन्धे बाधिते अन्योऽर्थः अन्वेष्टव्यो भवति। अन्विष्टे च शब्दप्रयोगहेतौ प्रस्तरस्य एककपालस्य च यजमानकार्य-कारित्वात् यजमानशब्देन व्यवहारो ज्ञायते।

**जातिः** – अत्र जातिः इति शब्देन जन्मकारणम् उत्पत्तिर्वा विवक्षिता[6]। जातिरिति चात्र जन्मोपादानं विवक्षितम्। वेदे श्रूयते 'आग्नेयो वै ब्राह्मणाः' इत्यत्र अग्नेः सम्बन्धीत्यर्थे अग्निशब्दात् ढक् 'अग्नेर्ढक्[7]' इति पाणिनिशास्त्रेण एवं विचार्यमाणे ब्राह्मणे अग्निसम्बन्धो न युज्यते इति

1. तत्रैव १.३.२.४.
2. तत्रैव ३.३.१४, पू.मी.सू.भा. पृ. २२३.३.३.१४.
3. पू.मी.सू.भा. ३.८.४३.
4. तत्रैव १.४.४२२
5. तत्रैव
6. त. वा.१.४४.२२,पृ.३२३-२५
7. अष्टा. ४.२.३३

सामञ्जस्येऽन्वेष्टव्ये एककारणत्वं– (जातिः) सम्बन्धतया स्वीकर्तव्यं भवति। पूर्वं प्रदर्शितेन मन्त्रेण अग्निब्रह्मणोः प्रजापतिः मुख्योद्भूततया एव कारणत्वमवगम्यते[1]। एवम् अत्र गुणसम्बन्धः।

**सारूप्यम्**- समानरूपता। क्वचित्समानरूपेण गुणेन कस्यचित् स्तुतिः क्रियते तत्सङ्कलनाय सारूप्यमिति सूत्रे पृथग्ग्रहणम्। आदित्यो यूपः[2]इति निशम्यमाने वाक्ये अञ्जननिमित्तकतेजस्वित्त्वसादृश्येन च यूपे आदित्यत्वं सारूप्यगुणसम्बन्धित्वेनारोप्यते।

**प्रशंसा**- स्तुतिरित्यर्थः। स्तुतेः कृतेऽपि प्रयोगो भवति यथा- 'अपशवो वा अन्ये गोऽश्वेभ्यो, पशवो गोऽश्वाः अयज्ञो वा एष योऽसामा, असत्रं वा एतद् यदच्छन्दोमम्'[3]इति। इत्थं लोकेऽपि 'यद् अघृतं तद् अभोजनं यत् मलिनम् अवासः तत्' इति। अत्र उदाहरणे गोपशुभिन्नेषु असामवत्सु अच्छन्दोमेषु अघृतवद्भोजने मालिन्यवाससि क्रमात्पशुत्वयज्ञत्वासत्रत्वभोजनत्व-वासस्त्वानां प्रतिषेधे अर्थतः तत्त्वनिषेधपर्यवसायि नैव किन्तुतेषां तेषां गुणनिषेधात् प्राशस्त्यस्यैव प्रतिषेधः[4]। ततः गुणवादे प्राशस्त्यमपि हेतुः।

**भूमा** – बहुत्वम् इति तात्पर्यम्। गुणवादे बहुत्वस्यापि प्राप्तिर्भवति हेतुत्वेन। यथा सृष्टीरुपदधाति इत्यत्र सृष्टिहेतुकानां मन्त्राणाम् एवोच्चारणाभि-मन्त्रितायाः इष्टिकाग्रहणं श्रुत्या अप्रतिपादितमिति स्वीकारे असृष्टिकाणा-मानर्थक्यम्। इदं कारणं यत् सृष्टिपदसहितमन्त्राणाम् आधिक्येन तत्र पाठसिद्धेःभूमा इति हेतुना च तदन्येषामपि ग्रहणम्[5]। लोकव्यवहारेऽपि मल्लग्रामोऽयमिति श्रूयते। न हि ग्रामे मल्लातिरिक्तजनानामभावो विद्यते, परन्तु प्रयोगेण तद्बाहुल्यंप्रतीयते।

---

1. त.वा.पृ.३२२
2. तैति. २.१.५.२.
3. तत्रैव ५.२.९.
4. त. वा. पृ.३२४-३२६
5. अष्टा. १.४.६२., ५.२.६८., ५.२.७२., ५.२.७६,,५.२.७५,,५.३.९६, ५.३.१०६

**लिङ्गसमवायात्**-सूच्यपदार्थस्य यस्सूचकस्तस्य ज्ञानोत्पादकहेतुना सम्बद्धात् इत्याशयः, यथा- छत्रिणो यान्तीत्युक्ते छत्रिशब्दस्य हि छत्रिणाम् अच्छत्रिणां च सङ्ग्राहकत्वम्। वक्ता छत्रिरूपं ज्ञानस्योत्पादकं लिङ्गं हेतुरूपेण संयोज्य छत्रिणो यान्तीति वाक्यम् प्रयुङ्क्ते। तस्मात्कारणात् लिङ्गसमवायात् परशब्दः अन्यत्र चलति इति पर्यवसितम्।

पूर्वोक्तेषु षट्सूदाहरणेषु गुणवादो हि मुख्यस्य स्तुत्यर्थ इति कारणेन लक्षणाबीजस्य अन्वेषणं कर्तुं शक्यते। प्रत्युत सूत्रे कुत्रापि लक्षणापदेन व्यपदेशो नैव आचरितः इति मुहुर्मुहुः भणितम्। इत्थञ्च प्राच्येषु ग्रन्थेषुबीजरूपेण अवस्थितस्य लक्षणाशब्दप्रतिपादनीयार्थस्य सुविचारः प्रदर्शितः।

**लक्षणेति शब्दप्रयोगः**

जैमिनिना उपलक्षणम् इत्यर्थे लक्षणाशब्दः प्रायुज्यत। यथा – 'लक्षणार्था श्रुतश्रुतिः[1] लोके कर्मार्थे लक्षणम्'[2] इति सूत्रद्वयमननेन ज्ञायते यत् शब्दवृत्तिपरतया प्राथम्येन लक्षणशब्दप्रयोगं पूर्वमीमांसासूत्रस्य भाष्यकारः शबरस्वामी एव अकरोत् इति[3]। जैमिनिः लक्षणाशब्दार्थे-उपलक्षणम्[4] इति पदं प्रयुक्तवान्, भाष्यकारेण शबरस्वामिनापि उपादान-लक्षणार्थे उपलक्षणशब्दः प्रायोजि[5]। जैमिनिप्रयुक्तस्य उपलक्षणशब्दस्य-लक्षणेति स्वप्रयुक्तशब्देन सह शबरस्वामी भेदम् आदधाति। अतो लक्षणाशब्दो हि भाष्यकारेण अभिधेयाविनाभूतप्रतीतिरित्यर्थे कृत इति वक्तुं शक्यते। लक्षणा इत्यर्थे भक्तिशब्दस्य व्यपदेशः कृत इति ततः समुपलभ्यते। तथा प्रयोगस्तु आचार्येण ऐतिशायनेन कृतः न तु जैमिनिना इति। आचार्येण इन्द्रपीताधिकरणे 'लक्षणा' शब्दः भक्त्यर्थे प्रयुक्तः इति

---

1. मी.सू., मी.सू.८.३.४४
2. पू.मी., ११.१.२६
3. पू. मी.सू. भा. १.४.२८,१.२.१९, १.२.२७
4. पू.मी. २.२.३१
5. पू.मी.सू.भा. ३.२.३०, ३.२.३८

जैमिनिः असूत्रयत्। 'सर्वेषां वैदिकमन्त्र्यमैतिशायनस्य भक्तिपानत्वात्'[1]? यथा – **इन्द्रपीतम्** – इन्द्रेण पीतम् इति इन्द्रं लक्ष्यीकृत्य यः सङ्कल्पितः इन्द्रो यस्य देवता इति सोमपरं लक्ष्यम् अर्थं परित्यज्य यत्र इन्द्रेण पीतम् इति सवनसम्बन्धी इत्यर्थः भक्त्या उक्तः। भक्त्या तु अपीतः अपिपीत इत्युच्यते।

एवमुक्तेषु उदाहरणस्थलेषु लक्षणशब्दः भक्त्यर्थे आचार्यैः प्रयुक्तः इति स्पष्टतयादृश्यते। किन्तु भाष्यकारेण लक्षणाशब्दः शब्दशक्तिरूपत्वेन प्रयोगस्थलेषु प्रकटितः अस्ति।

### काव्यशास्त्रोपजीव्येषु ग्रन्थेषु वर्णिता लक्षणावृत्तिः

**नाट्यशास्त्रे लक्षणावृत्तिसङ्केतः**-काव्यशास्त्रे काव्यप्रयोजन-काव्यकारण-काव्यस्वरूप-काव्यभेद-शब्दशक्ति-ध्वनि-रस-गुण-दोष-रीति-वृत्त्यलङ्काराः इत्येतानि काव्यतत्त्वानि काव्यप्रमेयापरपर्यायाणि प्रतिपाद्यानि भवन्ति। काव्यशास्त्रस्य काव्यसामग्रीप्रकाशकानि बहूनि स्रोतांसि सन्ति। तद्यथा – ऋग्वेदस्य विश्वामित्रनदीसंवादादयः, नाट्यशास्त्र-अग्निपुराण-विष्णुपुराण-विष्णुधर्मोत्तरपुराणानि चेति। किन्तु स्पष्टतया यथा काव्यसामग्री भरतसूत्रे लभ्यते न तथान्यत्र इति विमर्शकाः विविदन्ते। भरतमुनिप्रणीतं नाट्यशास्त्रं काव्यशास्त्रस्य आदिमो ग्रन्थो वर्तते। नाट्यशास्त्रमेव काव्यशास्त्रस्य उपजीव्यभूतः सर्वप्रथमः ग्रन्थः विद्यते। अस्य वर्ण्यसामग्री नाट्यतत्त्वीया अस्ति यतोहि नाट्यरचनां मनसि निधायैव एतच्छास्त्रस्य रचना अभवत्। तथापि भरतमुनेः पश्चाद्भाविनः काव्यशास्त्रिणः इदमेवाश्रित्य स्वीयं सम्प्रदायम् आविरकुर्वन् इति तेषामालङ्कारिकाणाम्सम्प्रदायानाम् उपजीव्यम् इदमेव पर्यवस्यति। परं काव्यशास्त्रीयतत्त्वानि तु महर्षिवेदव्यासप्रणीतेषु अग्निपुराणविष्णुपुराण-विष्णुधर्मोत्तरपुराणप्रभृतिषु विषयीकृतानि दृश्यन्ते। एतेषां कालिकदृष्ट्या पौर्वापर्यं भवितुमर्हति। विमर्शकाः नाट्यशास्त्रात्पश्चाद् क्रीष्टाब्देः नवम-

1. पू.मी.सू., ३.२.४४

शताब्द्याम् अग्निपुराणविष्णुधर्मोत्तरपुराणादीनां प्रणयनमामनन्ति। किन्तु काव्यशास्त्रीयतत्त्वानां रसगुणादीनामिदं सर्वमपि काव्यशास्त्रोपजीव्यतया वक्तुं शक्यमिति भाति। उपमा-दीपक-रूपक-यमकानां चतुर्णामलङ्का-राणां नाट्यशास्त्रे वर्णनया भामहादयः स्वस्वप्रस्थानं प्रवर्तयितुं नाट्य-शास्त्रादेव काव्यसामग्रीम् समकलयन्। यद्यपि भरतसूत्रे अभिधा लक्षणा व्यञ्जना चेति भेदात् शब्दशक्तीनामुल्लेखो न प्राप्यते, तथापि सूक्ष्मेक्षिकया विचार्यमाणे नाट्यतत्त्वानुसारिविषयप्रतिपादनमुखेन शब्दार्थ-सम्बद्धा अपि विचाराः प्रस्तुताः। परं सूक्ष्मरूपेण यद्यत् सन्ध्यङ्गरूपेण वृत्त्यङ्गरूपेण लक्षणरूपेण च प्रतिपादितं तदेव दण्डिप्रभृतिभिराचार्यैः अलङ्काररूपतया अग्रे निरूपितम्। तत्रोक्तम् –

यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे
व्यावर्णितमिदं चेष्टमलङ्कारतथैव नः[1] ॥ इति।

नाट्यशास्त्रे षोडशाध्याये लक्षणनिरूपणकारिकासु शब्दार्थसम्बद्धः सङ्केतः प्राप्यते यथा –

विभूषणं चाक्षरसंहतिश्च शोभाभिमानो गुणकीर्तनञ्च।
प्रोत्साहनोदाहरणे निरुक्तं गुणानुवादोऽतिशयश्च हेतुः॥
सारूप्यमिथ्याध्यवसायसिद्धपदोच्चयाक्रन्दमनोरथाश्च।
आख्यानयाच्ञाप्रतिषेधपृच्छा दृष्टान्तनिर्भासनसंशयाश्च ॥
आशीः प्रियोक्तिः कपटः क्षमा च प्राप्तिश्च पश्चात्तपनं तथैव।
अर्थानुवृत्तिर्ह्युपपत्तियुक्ती कार्योऽनुनीतिः परिदेवनञ्च ॥
षट्त्रिंशदेतानि हि लक्षणानि प्रोक्तानि वै भूषणसंमितानि।
काव्येषु भावार्थगतानि तज्ज्ञैः सम्यक्प्रयोज्यानि यथारसं तु ॥
प्रशंसा चैव निन्दा चकल्पिता सदृशी तथा।
या किञ्चित्सदृशी ज्ञेया सोपमा पञ्चधा बुधैः॥[2]

---

1. काव्या., २.३६४
2. नाट्य., अध्याय १६. १११, १६.८८

अत्ररुक्तगुणानुवादातिशयसारूप्यमिथ्याध्यवसायाख्यान अर्थानुवृत्त्युपपत्तिलक्षणेषु शब्दविचारः स्पष्टो भवति। तत्र उपमायाः निरूपितेषु पञ्चभेदेषु प्रशंसा-निन्दा-कल्पित-सदृशीप्रभृतयः शब्दाः पठिताः सन्ति। तेषां पर्यालोचनेन ज्ञातं यत्सादृश्यार्थप्रशंसार्थकल्पितार्थनिन्दा (तिरस्कृतार्थ) र्थादीनामर्थानाम् उपमालङ्कारभेदगतार्थतया प्रयोगः विहितइति। किन्तु लक्षणागौणवृत्तिभक्त्यादिशब्दतया अर्थतया च प्रयोगः न कृतः। मुनेः नाट्यग्रन्थानुरोधात्प्रधानतया तद्विषयकतत्त्वविवेचनाविषयात् वृत्तेः स्वरूपं नोक्तम्। किन्तु उपमाद्यलङ्कारनिरूपणे सङ्केतः अवश्यं कृतः इति मम भाति।

एवं नाट्यशास्त्रे कुत्रापिलक्षणाशब्दशक्तेःअथवा अन्यशब्दशक्तेः वा नाम्ना प्रयोगः नाभवत्इत्येव पर्यवस्यति।

**अग्निपुराणे लक्षणासङ्केतः**

महर्षिव्यासप्रणीतत्वात् सर्वाण्यपि पुराणानि विशेषपरकाणि सन्ति। तेषुच अग्निपुराणं न केवलं काव्यशास्त्रदृष्ट्या अपि तु सर्वशास्त्रदृष्ट्यासुतराम् उपयुक्तं वर्तते। अत एव तस्य उपादेयताविषयिणी काचन श्रुतिः कर्णिका भवति यत् – 'आग्नेये हि पुराणेऽस्मिन् सर्वा विद्याः प्रकीर्तिताः' इति।

इदं काव्यशास्त्रदृष्ट्याभामहादिभिरालङ्कारिकैः क्वचिदुदाहृतम् उपादत्तञ्च। काव्यशास्त्रोपजीव्येषु**अग्निपुराणं** द्वितीयत्वेन स्वीकृतं वर्तते। अग्निपुराणस्यसप्तत्रिंशदुत्तरत्रिशताद् अध्यायादारभ्य सप्तचत्वारिंशदुत्तरत्रिशत-तममध्यायं यावद्एकदशसु अध्यायेषु काव्यतत्त्वानि रीत्यलङ्कारादीनि निरूपितानि। तत्र एकादशाध्यायात्मकेकाव्यशास्त्रीयतत्त्वविवेचके प्रसङ्गेप्रथमं वाङ्मयस्य स्वरूपं वर्णितम्। तत्र ध्वनिवर्णपदवाक्यानामेव समवायः वाङ्मयमिति निगदितम्। ततः वाङ्मयं शास्त्र-काव्य-इतिहासादिभेदेन त्रिविधं भवति। तत्र वेदानां शब्दप्रधानतया शास्त्रेऽन्तर्भावः,रामायण–महाभारत–पुराणादीनामर्थ-प्रधानतया इतिहासेऽन्तर्भावः, पुरावृत्तस्याभिधानात्तस्यार्थप्राधान्यमिति केचित् वदन्ति। काव्यं तुअभिधाप्रधानं भवति।

अत एव विलक्षणतमं तस्य शब्दाऽर्थाभ्यां विशिष्यते। अत्र अभिधायाः अर्थः व्यापारः विवक्षितः। अभिधा इत्यस्य व्यापारस्वीकारेण

अभिधा-लक्षणा-व्यञ्जनेति तिसृणां शक्तीनांत्रयो व्यापारा उपादीयन्ते। परं प्रधानता तु अभिधेयस्यैव भवति। अग्निपुराणकारः लक्षणादीः त्रिविधाःशक्तीः उभयालङ्कारे गतार्थयति। अतस्तन्मतेऽपि लक्षणादिवृत्तीनाम्उभयालङ्कार-परिनिष्ठितत्त्वात् पृथक्सत्ता नास्ति।

वृत्तीनाम् अन्तर्भावः अभ्युपगन्तव्यमिति मे भातिदण्ड्याचार्येणापि तमेव विचारमुद्दिश्य अलङ्कारपरकः काव्यादर्शाख्यो ग्रन्थः प्रणीतः। अतः तन्मते वृत्तिसन्धिरीतिगतायाः लक्षणादिशक्तेः सत्ता आसीत् न तु पृथक्तया।

काव्यशास्त्रोपजीव्येषु द्वितीयो ग्रन्थः व्यासमहर्षिप्रणीतम् अग्नि-पुराणम्। अष्टादशपुराणेषु इदं विशिष्टं वर्तते। न केवलं काव्यशास्त्रधिया अपि सर्वविद्यादिदृशापि पुराणमाग्नेयम् अतिशेते। अग्निपुराणस्य ३३७ तमाध्यायात् ३४७ अध्यायपर्यन्तं यः भागः विद्यते सः एकादशाध्यायः समाश्रितः वर्तते।

काव्यशास्त्रीयतत्त्वविवेचकस्य अग्निपुराणस्य माहात्म्यविषये विमर्शकैः उक्तमपि–

आग्नेये हि पुराणेऽस्मिन् सर्वा विद्याः प्रकीर्तिताः ॥ इति

अत्रापि लक्षणादिशब्दवृत्तिविषये पृथग्रूपेण चर्चा न लभ्यते। किन्तु चत्वारिंशदुत्तरत्रिंशत्संख्याके अध्याये नाट्याङ्गानां रीतिवृत्यादीनां वर्णनं प्राप्यते। तत्र रीतीनां वैदर्भी-गौडी-पाञ्चाली-लाटीयाः इत्येतासां निरूपणावसरे लक्षणादित्रिविधशक्तीनाम् अन्तर्भावः कृतः इति मे भाति। अग्निपुराणकारेणापि लक्षणावृत्तेः स्वरूपम् प्रयोगश्च नादर्शि। किन्तु तस्य रीत्यादीनां नाट्याङ्गानां वर्णनमेव अभीष्टमासीत्। अतः रीतिवृत्यादिगता लक्षणा स्वीकार्या।

### 5. लक्षणाया बीजं किम्?

लक्षणाशक्तेः स्वीकाराय मूलकारणं किम् अथवा तस्याः बीजं किमिति किञ्चिद्विचार्यते। लक्षणाविषये शास्त्रकाराणां मतानि विविधानि सन्ति। लक्षणावृत्तेः असन्दिग्धं स्पष्टस्वरूपंमम्मटाचार्येण निर्दिष्टम्। तद्यथा-

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया[1]॥

---

1. का. प्र., २/९

इत्यत्र लक्षणानिमित्तानि त्रीणि कारणानि उक्तानि, यथा- मुख्यार्थबाधः तद्योगः रूढिप्रयोजनान्यतरत् चेति। मम्मटोक्तकारिकया अनया एतत्तु स्वच्छं वर्तते यत् तन्मते दण्डचक्रचीबरादिन्यायात् मुख्यार्थादीनां त्रयाणां समुदितरूपेण लक्षणावृत्तये कारणता अभिमता इति। मम्मटोत्तरवर्तिनः आलङ्कारिकाः प्रायेण तन्मतं स्वीचक्रुः। इतरे केवलं मुख्यार्थबाधरूपमेव हेतुम् अङ्गीकुर्वन्ति। मुख्यार्थस्य बाधः द्विधा जायते। प्रथमं तावन्मुख्यार्थस्य अन्वयः अनुपपन्नो वा भवति। द्वितीयप्रकारे मुख्यार्थस्य वाच्यार्थस्य अन्वयः अबाधितः भवति। किन्तु वक्तृतात्पर्यस्य विषयः न भवति। अथवा श्रोता कथयितुः तात्पर्यं कस्मिन्नर्थे इति तदानीं न भावयति, ततोऽपि मुख्यार्थे बाधः। तस्मात् कारणात् त्रीणि मतानि प्राप्तानि भवन्ति।

**प्रथमम्**- अन्वयानुपपत्तिरेव लक्षणाया बीजमिति।

**द्वितीयम्-** तात्पर्य्यानुपपत्तिरेव लक्षणाया बीजमिति।

**तृतीयम्-** अन्वयतात्पर्यानुपपत्ती इत्युभयमपि लक्षणाया बीजमिति। तस्मात् अमीषाम् अन्वयानुपपत्तिवादी, तात्पर्यानुपपत्तिवादी, उभयानुपपत्तिवादी चेति व्यवहारो भवति।

**प्रथममतानुसारम्-**

एतन्मते लक्षणायाः केवलं बीजम् अन्वयानुपपत्तिरेव। को नाम अन्वयः- वाक्यार्थबोधे आकाङ्क्षायोग्यतासन्निधिबलात् कर्तृ-कर्म-क्रियादीनां सम्बन्ध एव अन्वयः। यथा- गङ्गायां घोषः इत्यत्र जलप्रवाहरूपस्य मुख्यार्थस्य घोषाधारत्वं नोपपद्यते, जलप्रवाहे घोषाधिकरणत्वासंभवात्। अत एव अत्रगङ्गाघोषयोः अधाराधेयभावरूपः सम्बन्धः न सिद्ध्यति। एवं सति गङ्गापदस्य लक्षणा तटरूपार्थे भवति घोषाधिकरणसिद्धये। काव्यशास्त्रे प्रायः सर्वैरालङ्कारिकैः अन्वयानुपपत्तिरेव लक्षणाबीजत्वेन स्वीकृता। प्राधान्येन प्राचीननैयायिका अपि अन्वयानुपपत्तिमेव तद्बीजत्वेन मेनिरे। तत्र वाचस्पति-मिश्रः, मधुसूदनसरस्वती, गागाभट्टः, आपदेवः अन्ये च प्रमुखाः सन्ति। वाचस्पतिमिश्रः तत्त्वबिन्दुनामके ग्रन्थे स्पष्टतया लिखति-तात्पर्यं न बीजं सामर्थ्यसाधने (शक्तिसाधने) व्यक्तिभेदात् अनन्तस्तात्पर्यार्थो नोपपद्यते

लक्षणायाः हेतुः[1] इति। मधुसूदनसरस्वतीवर्यः वेदान्तकल्पलतायाम् एवम् अभिप्रैति। अन्वयानुपत्तिरेव लक्षणायाः हेतुरिति। [2] गागाभट्टमतानुसारम्-वेदेषु तात्पर्यविषयाभावात् अन्वयानुपपत्तिरेव लक्षणायाः मूलम्[3]। जगदीश-तर्कालङ्कारः शब्दशक्तिप्रकाशिकायाम् अन्वयानुपत्तिमेव लक्षणाबीजं मन्यते। तात्पर्यानुपपत्तिवादं निरसन्कथयति-

`तत्र अन्वयानुपपत्तिज्ञानस्य लक्षणाबीजत्वं न हि तज्जनकत्वं शक्यसम्बन्धात्मिकाया लक्षणायास्तदजन्यत्वात्, नापि तज्ज्ञापकत्वं मुख्यार्थान्वयानुपत्तिज्ञानमन्तरेणापि प्रमाणान्तरेण तद्ग्रहसम्भवात्, अत एव न लक्ष्यार्थतात्पर्यग्राहकत्वमपि प्रकरणादिः सोऽपि लक्ष्यार्थपरत्वग्रहात्। न च लक्षणाजन्यान्वयबोधं प्रति तस्याः कारणत्वमेव लक्षणाबीजत्वमिति साम्प्रतम् 'यष्टीः प्रवेशय' इत्यादौ व्यभिचारात्, तादृशहेतुतायाम् प्रमाणाभावाच्च'[4]। मीमांसका अपि अन्वयानुपपत्तिं स्वीकुर्वन्ति। एतदेव अनन्तदेवः मीमांसान्याय-प्रकाशे दर्शयति। यथा-

एवञ्च 'सोमेन यजेत' इत्यत्र न मत्वर्थलक्षणा। यदि ह्यत्र विशिष्टविधानं स्यात्तदाऽन्वयानुपपत्त्या मत्वर्थलक्षणा स्यात्। यदा तु भावनायां धात्वर्थस्य करणत्वेनान्वयस्तदाऽन्वयानुपपत्त्या साङ्गीकर्तव्या[5]" इति।

**द्वितीयमतानुसारम्-**

**काकेभ्यो दधि रक्ष्यताम्** इत्यत्र काकपक्षिविशेषात् दधिरक्षण-कार्यसम्पादनमिति मुख्यार्थः अबाधितः अस्ति। मुख्यार्थमात्रस्य एव बाधम् अभ्युपगन्तॄणां मते अत्र लक्षणाप्रसङ्ग एव नोपपद्यते। अत्र वक्तृतात्पर्य-

---

1. त.बि., पृ.५७
2. वे.क., पृ.७५ गङ्गायां घोषः...... अत्र चोद्देश्यान्वानुपपत्तिर्बीजम्। पृ० ७५
3. चिन्ता., पृ.५८ "लक्षणाबीजं शक्यार्थान्वयानुपपत्तिः, न तु तात्पर्यानुपपत्तिः। वेदे तदसम्भवात्"
4. श.श.प्र., नामप्रकरणम्, पृ.१४७
5. मी.न्या.प्र., पृ.६९-७०

विषयकस्य मुख्यार्थस्य अन्वयः अनुपपन्नः। वक्तुराशयं परिशील्य ज्ञायते यत्न केवलं काकमात्रेण दध्नः रक्षणं करणीयम् अपि तु दध्युपघातकादिभ्यः सर्वेभ्यः काकमार्जारादिभ्यः दधिरक्षा विधेया इति। अत्र काकपदं दध्युपघातकपरं वर्तते। अत्र अन्वये अनुपपन्ने सति वक्तृतात्पर्यस्य अविषयात् लक्षणा स्वीकार्या अतः तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति। तात्पर्यानुपपत्तिवादिषु नागेशभट्टः नव्यनैयायिकाः वैशषिकाः सन्ति। वृत्तिदीपिकायां मौनिश्रीकृष्णभट्टेन तात्पर्यानुपपत्तिरेव लक्षणामूलत्वेन उररीकृता। तेनोक्तं यत् अन्वयानुपपत्तिमात्रविशेषस्य स्वीकारेण सर्वेष्वपि स्थलेषु लक्षणाप्रसरः सङ्कुचितो लक्ष्यते। अतः अन्वये अभिधायाः लक्षणायाश्च अभावात् तात्पर्यानुपपत्तिरेव लक्षणायाः मूलम्- 'घटमानय' इत्यादौ घटकर्मत्वयोः आधेयत्वरूपसंसर्गे तात्पर्यसत्वात् लक्षणात्वं स्यात्। न चेष्टापत्तिः। 'अन्वये न शक्तिर्न वा लक्षणेति' सिद्धान्त-व्याघात्[1]।

वैशेषिका अपि तात्पर्यानुपपत्तिमेव लक्षणाया बीजत्वेन स्वीकुर्वन्ति। यथालिखितमपि - तर्कसङ्ग्रहदीपिकाकारेण- तात्पर्यानुपपत्तिर्लक्षणाया बीजम्[2] इति धर्मराजाध्वरीन्द्रः वेदान्तदर्शनस्य मतमुपस्थापयन्वेदान्तपरिभाषायां लक्षणाबीजं स्पष्टयति। यथा-'लक्षणाबीजं तु तात्पर्यानुपपत्तिरेव न त्वन्वयानुपपत्तिः, काकेभ्यो दधि रक्ष्यतामित्यत्रान्वयानुपपत्तेरभावात्। 'गङ्गायां घोषः' इत्यादौ तात्पर्यानुपपत्तेरपि सम्भवात्'[3] इति। विश्वनाथपञ्चाननः न्यायसिद्धान्त-मुक्तावल्यां लक्षणानिमित्ताय बीजे कथयति- "लक्षणाशक्यसम्बन्ध-स्तात्पर्यानुपपत्तितः"[4] इति। यथा 'यष्टीः प्रवेशय' इत्यत्र वक्तृतात्पर्यविषयः यष्टिधारिविप्राणां भोजनाय उपवेशनं कुरु इति।

---

1. वृत्ति., पृ.१०
2. दीपिका., पृ.१९२
3. वे.प.,पृ०,२३६
4. मुक्ता.,शब्दनिरूपण, पृ.४८

## तृतीयमतानुसारम्-

अत्र एकदेशिन आलङ्कारिकाः सन्ति ये तात्पर्यानुपपत्तिम् अन्वयानुपपत्तिं च अभ्युपगच्छन्ति। केशवमिश्रः अलङ्कारशेखरे प्रतिपादयति यत्- सा तात्पर्यानुपपत्त्या मुख्यार्थानुपपत्त्या वा प्रवर्तते[1] इति। राजचूडामणि-दीक्षितः काव्यदर्पणे लक्षणायाः बीजमेवमाह-तात्पर्यविषयीभूतार्थान्वयानुप-पत्तितः शक्यभिन्नार्थधीहेतुर्व्यापारो लक्षणोच्यते[2] इति।

एवं रीत्या अन्वयतात्पर्यानुपपत्तिद्वयमपिव्यस्तरूपेण समुदितरूपेणवा लक्षणायाः बीजतया आमनन्ति वैयाकरण-मीमासक-नैयायिकाः। आलङ्कारि-काणां लक्षणावृत्तिप्रसङ्गाय तन्निमित्तेषु भेदः अस्ति इत्येकम्। प्रायशः आलङ्कारिका अन्वयानुपपत्तिमेव स्वीकुर्वन्ति। केचिच्च लक्षणायाः मूलत्वेन तात्पर्यानुपपत्तिम् अथवा उभयविधानुपपत्तिम् अभ्युपयन्ति इति।

## भामहस्य लक्षणाविषयकमतम्

अलङ्कारशास्त्रस्य आदिमग्रन्थतया काव्यालङ्कारः प्रतिष्ठितो विद्यते। एतद्ग्रन्थरचनयैव भामहाचार्यः अलङ्कारसम्प्रदायस्य प्रवर्त्तको बभूव। ग्रन्थकारः काव्यजीवातुतत्त्वेन अलङ्कारं व्यवस्थापयामास। ग्रन्थस्य निश्शेषालोढनात् कुत्रापि लक्षणावृत्तेः विचारः न निरूपित **इति ज्ञायते।** ग्रन्थकारेण किन्तु समासोक्तिवक्रोक्तिपर्यायोक्त्यादिषु अलङ्कारेषुमुख्यार्थात् भिन्नस्य अर्थस्य सङ्केतः अवश्यं व्यधायि। समस्ते काव्यालङ्कारे गौणमुख्यविभागः कुत्रापि शब्दमुखेन नैवाकथ्यत। अलङ्कारनिरूपणावसरे गौणमुख्यविभागः विद्यते। रूपकालङ्कारवर्णनेगौणीवृत्तिः क्वचित् उपपादिता। गुणवृत्त्यां यथा गुणानां साम्यं विलोक्य तदारोपः भवति। तथैव गुणानां समानतया गुणानां रूपणं भवति रूपके इत्येव कथयति भामहः –

1. अल.शे., पृ.०९
2. का.द., पृ.४९

उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः[1] ॥ इति

भामहेन रूपकालङ्कारे उपमानोपमेयगततया गुणानां साम्यविषये यन्महत्त्वं दत्तं तस्मात् वदितुमर्हामः यत्गुणवृत्तिप्रतिपाद्यस्य अर्थस्य सम्यक्तयाकाव्यशास्त्रे प्रयोगः विहितः इति।एतदतिरिच्य इतोऽप्यधिका गुणवृत्तिसन्दर्भे सङ्कल्पना नावाप्ता। प्रतिवस्तूपामालङ्कारविवेचनेऽपि उभयोः वाक्यार्थयोः गुणविषयक-साम्याद् उपमाप्रतिपत्तिरिति। यथोक्तम् -

समानवस्तुविन्यासे प्रतिवस्तूपमोच्यते।
यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः[2] ॥

अत्र गुणवृत्तिविषयकप्रतीतिस्तु परिलक्ष्यते किन्तु पूर्वोक्तप्रतीतिसदृशा नैव।

**आचार्यदण्डिनः लक्षणाविषयकमतम्**

दण्डिभामहाचार्यात्पश्चाद्वर्त्याचार्यत्वेन स्वीक्रियत गवेषकैः। केचन समीक्षकाः एनं भामहात्पूर्ववर्तीति अङ्गीकुर्वन्ति। केचिच्च एतस्य कालं भामहादुत्तरं निश्चिन्वन्ति। अद्यापि निर्णय अस्पष्ट एव वरीवर्ति। एतत्प्रणीतः काव्यादर्शः त्रिपरिच्छेदात्मकः अस्ति। अत्र काव्यशास्त्रे अलङ्कारादि-विवेचनेन सहैव गुणनिरूपणं सातिशयं तेन व्यधायि। केचन दण्डिनं गुणसम्प्रदाये (रीतिसम्प्रदाये) परिगणयन्ति। गुणवृत्तेः काव्यशास्त्रे प्रयोगः केन प्रथमतया अकारि इति तु बहोः ग्रन्थराशेः नाशात् न ज्ञायते। किन्तु प्राप्तेषु साहित्येषु चमत्काराधानाय काव्यशास्त्रीयविवेचनगर्भे गौणवृत्तेः प्रयोगः दण्डिनैव सर्वप्रथमं व्यधायि इति लक्ष्यते। एतस्मात्परमेव परैः आलङ्कारिकैः अयं मार्गः गृहीतः। तत्र काव्यादर्शस्य कारिका एव अस्मान् विज्ञापयन्ति, यथा-

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा ॥

---

1. भामह. अ. २.२१
2. भामह.,अ. २.३४

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च।
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ॥
निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम्।
अतिसुन्दरमन्यत्तुग्राम्यकक्षां विगाहते ॥
पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः।
भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः[1]॥

स्थालीपुलकन्यायेन अत्र उदाहरणतया चत्वारः श्लोकाः स्वीकृताः। गुणवृत्त्या समाधिगुणस्य अभिधायकाः सन्तिइमे श्लोकाः। आचार्यदण्डी गुणवृतिविचारं ९३तमश्लोकतः १००श्लोकपर्यन्तम् अकरोत्। एष शब्दशक्ति-विषयिकं प्रसङ्गम् अतिरिक्ततया न चकार। स अन्यस्य धर्मस्य अन्यस्मिन् व्यवहारकरणम् इति वदन् समाधिनामकगुणं प्रास्तौत्। टीकाकारस्य प्रेमचन्द्रतर्कवागीशस्य मन्तव्यमस्ति यत् समाधिगुणे उपचारस्तिष्ठति। उपचारश्च लक्षणाया मूलं विद्यते। अतः स्पष्टमेव समाधिगुणे लक्षणा भवति। एतत्स्थले स साध्यवसानगौणीनामिकां लक्षणां स्वीचकार[2]। एवमत्र उपर्युक्तश्लोकेभ्यः गौणवृत्तिविषयः प्राप्यते। तां गुणवृत्तिं विवेचयन् काव्यादर्शस्य प्रसिद्धटीकाकारो रत्नश्रीज्ञानभिक्षुः अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना इति कारिकां समाधिगुणपठितां गौणशब्दादिव्यवहारपरतया व्याख्यात्। यथा-अन्यस्य वस्तुनः प्रकृतापेक्षया, धर्मः गुणः प्रसिद्धस्ततस्तस्मात् मुख्यादन्यत्र गौणविषये सम्यक् साधु। लोकसीमानुवर्तित्वमेव सम्यक्त्वमिह द्रष्टव्यम्। आधीयतेऽध्या-रोप्यते यत्र। केन लोकसीमानुरोधिना लोकप्रतीत्यनुवर्तिना कविना समाधीयतेऽध्यारोप्यते यस्मिन्निति समाधिस्समारोपविषय उच्यते। गौणशब्द-व्यवहारः काव्योपयोगी समाधिरिति यावत् [3]।

---

1. काव्या., १.९३,९४,९५,९६
2. काव्यादर्श, प्रेमचन्द्रकृतटीकासहित, पृ.८४
3. रत्नश्री. १.९.३.

एवं टीकायां टीकाकारेणापि एतस्य समाधिगुणनिरूपणावसरे दण्डिकृतगौणवृत्तिशब्दः प्रयुक्तः स इति दर्शतः। पुनश्च काव्यादर्शकारेण गुणवृत्तिं केन्द्रीकृत्य निष्ठ्यूतोद्गीर्णवान्तादिशब्दा अतिसुन्दरत्वेन वर्णिताः। तस्माद् अर्कांशनिष्ठ्यूताः पावकविप्रुषः पीत्वा पद्मानि उद्गीर्णारुणरेणुर्भिमुखैः पावकविप्रुषो भूयो वमन्तीत्येतदतीव हृद्यम् इति पद्यस्य आशयः। अस्य श्लोकस्य अर्थो वर्तते यत् कमलानि सूर्यमरीचिभिः निष्ठ्यूतान् उद्गीर्णान् कणान् पीत्वा स्वमुखत्वेन परागरेणुं प्रसारयन्ति। वमनं कुर्वन्ति इव प्रतीयन्ते अत्र श्लोके सान्ध्यपवनकम्पितपरागपातिनां कमलानां वर्णनं प्रस्तुतमस्ति। अत्र निष्ठ्यूत-पदस्य अभिधा वमनरूपार्थे अस्ति। लक्षणा निर्गमनरूपार्थे तिष्ठति 'वान्तादि' इति पदस्य मुख्यार्थः वमनकरणमिति लक्ष्यार्थश्चबहिः निर्गमनमिति, उद्गीर्णस्य मुख्यार्थः – ऊर्ध्वगिरणमिति। लक्ष्यार्थश्चपातनमिति वर्तते। निष्कर्षतः वक्तुं शक्यते यत् मुख्यार्थं परित्यज्य गौणवृत्तिद्वारा ह्यन्यार्थबोधः कार्यते चेत्तत्र सौन्दर्यं भविष्यति। लाक्षणिकप्रयोगसिद्धेः समाधिगुणस्य उद्भूतपरतया चरकादिविशेषो भवति। अतः समाधिगुणनिरूपणावसरे दण्ड्याचार्यप्रयुक्तः गौणवृत्तिशब्दः मुख्यार्थपरित्यागपूर्वकं तदितरार्थं बोधयति। पद्ये नेत्रक्रियाया निमेषोन्मेषलक्षणाया विषये प्रपञ्चयन् दण्डी अभिधानमित्यर्थे मीमांसातन्त्र-प्रसिद्धं श्रुतिशब्दं प्रायुङ्क्त। स च शब्दः अलङ्कारतन्त्रे तस्मिन्नर्थे काव्यादर्शादन्यत्र नैव प्राप्यते। तत्र उदाहरणे नेत्रक्रिययोरध्यासः निमीलन्ति उन्मिषन्ति इति द्वाभ्याम् शब्दभ्याम् नेत्रस्य च कमलानि कुमुदानीति शब्दाभ्यां कृतो वर्तते। तादृशशब्दप्रयोगो गुणवृत्तिविषय इति दण्डी स्वयम् अवदत्। परन्तु रत्नश्रीज्ञानभिक्षुः भक्तिशब्दव्यवहारविषयत्वेन एतद् एकनवतिसङ्ख्याके पद्ये उपवर्णयामास। तस्माद् निरूढाद्विषयान्तरे शब्दस्य प्रयोगः काव्ये नितान्तं चमत्काराधायी इति दण्डिनिरूपितं सिद्धान्तं गुणवृत्तिहृदयभूतं स्पन्दयति। यथा हि `कोऽपि धर्मः काव्यप्रयोगस्य विषयरूपेण अभिमतः गौणवृत्तिविषये एव शोभते काव्ये न मुख्यविषयः इति निष्ठ्यूतोद्गीर्णवान्तादिशब्दैः कारिकासु प्रतिपादितः। एतदेव सुस्पष्टम्यथा निष्ठ्यूतं वान्तम् उद्गीर्णञ्च इति। आदिशब्देन रिक्तादिस्वीकारः। तानि एतादृशानि पदानि गौणी प्रधानेतरा निरूढाद्विषया-

द्विषयान्तरपरिग्रहलक्षणावृत्तिप्रयोगरूपा व्यापाराश्रयो यस्य तत्तथा। गौणमिति यावत्। अतिसुन्दरम् इत्यादि पदम् इतस्तु पुनः गौणवृत्तिव्यपाराश्रयात् मुख्यमिति यावत्[1]।

काव्यादर्शस्य उक्तासु कारिकासु गौणवृत्तिप्रतिपादितस्य अर्थस्य काव्ये समाधिगुणरूपत्वं तस्य काव्यप्राणत्वं च भणितम्। तस्य गौणार्थस्य काव्यप्राणत्वं काव्यादर्शकारेण अङ्गीकृतम्, लक्षणावृत्तिविषये इति एष एव विषयः लक्षणाशक्तेः बीजत्वेन औप्यत। दण्ड्याचार्यमते अध्यासः एव अध्यारोपपदेन उच्यते। तस्य एव परिकल्पना इति अपरं नाम। रत्नश्रीटीकाकारः आह- 'योऽर्थोऽस्त्यर्थमतिमात्राध्यारोप्यते परिकल्प्यत'[2]इति आह। अथ च एष अंशः तन्त्रवार्तिके कुमारिलभट्टैः पूर्वपक्षतया निर्दिष्टः।

इत्थं काव्यशास्त्रविवेचनश्रेण्याम् इदम्प्रथमतया दण्डी एव गौणार्थविषये पथप्रदर्शनम् व्यधात्। तत्रदण्डिनः गौणार्थोल्लेखने मीमांसादर्शस्य प्रभावः वर्तत इति स्पष्टं प्रतीयते। यतः गौणार्थ-अध्यारोपयोः साम्यग्रहणेन तस्यैव अर्थस्य मीमांसाभाष्ये तन्त्रवार्तिके च पूर्वपक्षतया तथैव उपलब्धेः आचार्यदण्डी लक्ष्यार्थप्रयोगपप्राचुर्येणसमाधिगुणादौ चमत्कृतिम् आनीय-गौणव्यवहारं समावेशयत्।

**उद्भटस्य लक्षणाविषयकमतम्**

उद्भटाचार्यः भामहप्रणीतस्य काव्यालङ्कारस्योपरि भामहविवरण-मिति नाम्ना एकां टीकां लिलेख। एतस्यच स्वीयमौलिकग्रन्थः अलङ्कार-सारसङ्ग्रह अपिप्राप्यते। तत्र एषः लक्षणावृत्तेः स्वरूपं न अलक्षयत्। किन्तु पूर्वाचार्यवत्लक्षणाया बीजानि अदर्शयत। भामहोक्तस्य "शब्दाश्छन्दोऽभि-धानार्था इतिहासाश्रयाः कथा "इत्यभिधानस्य शब्दाद्भेदं व्याख्यातुमाचष्टे-शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्च इति[3]। भामहोक्तस्य

1. रत्नश्री १.९५
2. काव्या., १.८६
3. ध्व.लो., प्र, उद्योत,पृ.५२

अभिधानशब्दस्य व्याख्यां करोति अभिधाव्यापारः इति। स च द्विविधः मुख्यःगौणः चेति। उद्भटस्तु रूपकाऽलङ्कारे गुणवृत्तिप्रयोगेण अलङ्कारतां व्यवस्थापयामास। यत्र अभिधयाप्राप्तानाम् अर्थानां सम्बन्धस्य यत्र अनुपपन्नतया गुणवृत्तिपदस्य प्रधानपदेन योगः भवेत् तत्र रूपकालङ्कारः इति। गुणवृत्तिपदस्य अर्थता गुणबोधकपदेन अस्ति। अभिधयोपस्थापितस्य भिन्नार्थकस्य अभेदसम्बन्धस्य सिद्धिः न शक्या, प्रत्युत रूपकं द्वयस्य भिन्नपदार्थस्य अभेदसम्बन्धः एव । यथा निर्दिष्टं ग्रन्थे-

श्रुत्या सम्बन्धविरहात् यत्पदेन पदान्तरम्।
गुणवृत्तिप्रधानेन युज्यते रूपकं तु तत्[1] ॥

इत्युक्ते यत्र श्रुत्या अभिधावृत्त्या बोधितो योऽर्थः तस्यार्थस्य सम्बन्धस्य वा विरहात् बाधात् गुणवृत्तिप्राधाने सति तद्बोधकपदेन पदान्तरम्, अन्यपदेन सह सम्बन्धस्य योजनं तत्र रूपकालङ्कारप्रसङ्ग इति आशयः। तदेव वृत्तिकारः प्रतीहारेन्दुराजः ग्रन्थस्य लघुवृत्तिनाम्न्यां वृत्त्याम् आह। **पदान्तरस्य गुणवृत्तेरपरेण पदेन योगे रूपकं भवति नन्वेवं सति नीलमुत्पलमित्यत्रापि नीलशब्दस्य गुणवृत्तेरुत्पलशब्देन योगे रूपकताप्रसङ्गः इत्यत उक्तं श्रुत्या विरहादिति श्रुतिर्निरन्तरार्थनिष्ठः शब्दव्यापारः** इति। तया श्रुत्या अनुपपद्यमानस्य पदान्तरस्य सम्बन्धः सन् पदान्तरं गुणवृत्तिः यत्रापरेण पदेन युज्यते तत्र रूपकता। यथोक्तमपि –

ज्योत्स्नाम्बुनेन्दुकुम्भेन ताराकुसुमशारितम्।
क्रमशो रात्रिकन्याभिर्व्योमोद्यानमसिच्यत[2] ॥ इति

अत्र अम्बुशब्दो निरन्तरार्थनिष्ठशब्दव्यापारविषयीकृते उदकत्वे विद्यमानो ज्योत्स्नाशब्देन सामानाधिकरण्यं न लभते। अम्बुत्वज्योत्स्नात्वयोरेकार्थसमवायाभावात्। एतस्मात् कारणात् अम्बुगताः शौभ्र्य-आह्लादकत्व-प्रसरशीलत्वादयो ये गुणास्तैस्तुल्यः ज्योत्स्नागतगुणवृत्तिस्सन्

1. का.सा.,पृ.०९
2. तत्रैव, का..सा.ल.,

अम्बुशब्दः ज्योत्स्नायां वर्तते। ततः अम्बुशब्दस्य श्रुत्या (अभिधापर-पर्यायतया) निरन्तरार्थनिष्ठेन अभिधाव्यापारेण यः अन्येन पदेन ज्योत्स्नाशब्देन सम्बन्धः तच्छून्यत्वात् गुणवृत्तिता इति गुणवृत्तौ शब्दार्थयुगलस्य अध्यारोपविषये प्रतीहारेन्दुराजः उल्लिलेख। एवं वदितुं शक्यते यत् गुणवृत्तिविचारः तावत् उद्भटस्यासीत् तस्मात् हि रूपके गुणवृत्तिद्वारा अर्थसंयोजनं प्रतिहारेन्दोः चिन्तनम् इति।

**प्रतिहारेन्दुराजस्यलक्षणाविषयकमतम्**

प्रतिहारेन्दुराजमते गुणवृत्तिः एव लक्षणा वर्तते। यदा अभिधाव्यापारात् विरुद्धार्थम् अभिदधानस्य समानविभक्तिकस्य शब्दस्य अभेदः न सिद्ध्यति। तदा एतेषु एकस्य लक्षणाश्रयिता जायते। अतः सा एव गुणवृत्तिः इति। यथोक्तं मूलभागेविरुद्धार्थाभिधयिनोः समानाधिकरणयोः शब्दयोर्निरन्तरार्थनिष्ठेन अभिधाव्यापारेण अनुपपद्यमानान्योन्य-समन्वयत्वाद्यद्येकस्य लक्षणया गुणवृत्तित्वमभिधीयते[1] इति।

**वामनस्य लक्षणाविषयकमतम्**

अलङ्कारशास्त्रकारेषु एतस्य स्थानम् उद्भटाचार्यात् पश्चात् आगच्छति। यथा भामहादीनां साहित्यशास्त्रे प्रसिद्धिः अभवत् तथैव एतस्यापि। एषः कश्मीरदेशीयः 'काव्यालङ्कारसूत्राणि' इत्येकाम् अनुपमां कृतिं विरचय्य गुणानां काव्याङ्गित्वेन स्वीकारं विधाय साहित्यक्षेत्रे पूर्वाचार्यमताद्भिन्नम् अभिनवं मतम् उपस्थापयामास। तस्मात् एतदाविष्कृतः विचारः रीति-सम्प्रदायत्वेन पल्लवितः प्राकाशितः चेति। वामनाचार्यस्य काले प्रायो लक्षणावृत्तेः प्रयोगो लोके प्रसिद्धिमुपागत आसीत्। एतस्य काव्यालङ्कार-सूत्रवृत्तिरिति ग्रन्थस्य परिशीलनेन ज्ञायते। यतो हि काव्यशब्दस्य मीमांसां प्रस्तुवन् तद्भक्तिमूलत्वं प्रतिपादयति –

---

1. का.सा.ल. पृ.२७०

काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते।
भक्त्या तु शब्दार्थमात्रवचनः अत्र गृह्यते[1] ॥ इति।

माधुर्यादिगुण-उपमानुप्रसादाद्यलङ्कारसंवलितस्य शब्दार्थयुगलस्य काव्यशब्दस्य अभिधया व्यवहारो जायते। भक्तिद्वारा गुणवृत्त्या तु काव्यशब्दः शब्दार्थयुगलपरकः इति व्यपदेशः। कविप्रभेदविचारावसरे अरोचकिसतृणाभ्य-वहारिशब्दौ कव्योः वाचकगौणार्थौ इति। उक्तञ्च – 'इह खलु द्वे कवयः सम्भवन्ति, अरोचकिनः सतृणाभ्यवहारिणश्चेति। अरोचकिसतृणाभ्यवहारि-शब्दौ गौणार्थौ' इतिवामनोक्तं वचनं काव्यालङ्कारसूत्रे गुणवृत्तिविषयं सूचयति – 'उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम्'[2] इत्यत्र ग्रन्थकारेण गुणानां तुल्यधर्मतया अभेदारोपणं दर्शयित्वा रूपकालङ्कारो न्यरूप्यत। तेन गुणवृत्तेः लक्षणावृत्तेः वा विषये स्पष्टतया किञ्चनापि नोक्तम्। श्लेषालङ्कारस्य निरूपणावसरे 'स धर्मेषु तन्त्रप्रयोगः श्लेषः' इति सूत्रयित्वा उपमानोपमेय-निष्ठधर्मेषु गुणक्रियाशब्दरूपेषु तत्त्वाध्यारोपे तन्त्रोच्चारणे सति श्लेषः भवतीति निरदिशत्। श्लेषस्वरूपनिर्धारणेन गौणार्थतः श्लेषोत्पत्तिः इतिएषः वक्रोक्त्य-लङ्कारं निरूपयितुं कथयति, बहूनि हि निबन्धनानि लक्षणायाम्। यथा- ''सादृश्याल्लक्षणा वक्रोक्तिः'[3] इति उदाहरणम् – 'उन्मिमील कमलं सरसीनां कैरवं च निमिमील मुहूर्तात्' इत्यत्र नेत्रधर्मावुन्मीलननिमीलने सादृश्यात् विकाससङ्कोचौ लक्षयतः। असादृश्यनिबन्धना तु लक्षणा न वक्रोक्तिः। यथा – 'जरठकमलकन्दच्छेदगौरैर्मयूखैः' इति इह छेदःसामीप्याद् द्रव्यं लक्षयति। तस्यैव गौरत्वस्योपपत्तेः[4] इत्युक्तत्वात् वामनमते लक्षणायाः प्रवृत्तिहेतवः अनेके भवन्ति। सादृश्यनिमित्तकलक्षणायां तु वक्रोक्त्यलङ्कारः।

---

1. का.सू. १.१.१.
2. तत्रैव, ४.३.६.
3. तत्रैव, ४.३.७ पृ.१७२.
4. का.सू. ४/३,पृ.१७२-१७३

गौणार्थस्य यथा अलङ्कारत्वम् तथा लाक्षणिकस्यापि इति दर्शयित्वा तेन वक्रोक्त्यलङ्कारः प्रतिपादितः। न हि सर्वा अपि लक्षणा अलङ्कारसूचिका अपि तु सादृश्यमूला एव इत्यभिधाय झटिति अर्थज्ञानविधायित्वं लक्षणाया रहस्यमिति अचकथत्।

१. एकन्तु लक्षणा वक्रोक्तिश्लेषाद्यलङ्कारान्तर्गता स्वीकृता सादृश्यमूलत्वात्।

२. द्वितीयञ्च लक्षणायाः सारः झटित्यर्थप्रतिपत्तिकारणम् इति अंशद्वयम् एतैरभ्युपगतमस्ति।

काव्यप्रकाशस्य मङ्गलश्लोकात् प्राक् तदवतरणिकावाक्ये पठितग्रन्थारम्भे इति शब्दस्य प्रसङ्गे टीकाकारैः लक्षणाप्रसङ्गः विचारितो वर्तते। ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति इति वृत्तिभागः। तत्र ग्रन्थारम्भे इति पदस्यार्थं स्वीकर्तुं टीकाकारेषु विचारवैमनस्यं वर्तते। ग्रन्थारम्भ इति पदस्य अभिधेयार्थः आद्यकृतिरिति। कृतिस्तु नारब्धा। तर्हि अन्वयानुपपत्तौ लक्षणया ग्रन्थारम्भ इति पदस्य अन्वयः तत्प्राक्कालरूपः अर्थो भवति । झटिति विघ्नविघातसामर्थ्यप्रतिपत्तिरिति प्रयोजनम्। एवं वामनाचार्येण लक्षणास्वीकारे द्वितीयं यद्वचनम् उक्तं "झटिति अर्थप्रतिपत्तिः" इति तदेव टीकाकारैः अभिमतमस्ति इत्यत्र उभयत्र साम्यं लक्ष्यते।

**रुद्रटस्य लक्षणाविषयकमतम्-** एषः प्रसिद्धः आलङ्कारिकः **काव्यालङ्कार**नामानं ग्रन्थं विलिख्य काव्यशास्त्रीयाणि तत्त्वानि सविशदं विवेचयामास। अस्मिन्नपि ग्रन्थे ग्रन्थकर्त्रा लक्षणागौण्योर्विषये किञ्चिदपि स्वरूपं न लक्षितम्। तथापि तन्मते रूपकालङ्कारनिरूपणेगुणानां साम्यमुपमानोपमेयगततयारूपकस्य अलङ्कारता च विवक्षिता। रूपकपरिभाषां टीकमानः नमिसाधुः "सिंहो देवदत्तः" इति उदाहरणं प्रस्तूय रुद्रटोक्तकारिकांविमृशति–

यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिधा।
अविवक्षितसामान्या कल्पत इति रूपकं प्रथमम्[1]॥इति।

1. रुद्रट. ८.३८

उपमानभूतस्य सिंहस्य उपमेयभूतस्य देवदत्तवटुकस्य गुणान् परिचीय तत्साम्यवशात् देवदत्ते सिंहगततीक्ष्णपराक्रमादेः गुणस्यारोपात् सिंहो देवदत्तः इति व्यवहारः क्रियते। गुणानाम् आरोपत्वात् द्वयोः अभेदप्रतीतिरेव रूपकालङ्कारस्य रहस्यं भवतीति अतः तस्यापि मते लक्षणान्तर्गतः सारोपाख्यः भेदो वर्तते। एतन्मते सादृश्यव्यतिरिक्ता काऽपि अन्या शक्तिः नास्ति अलङ्कारेषु तां वृत्तिं सादृश्यमूलत्त्वात् अन्तर्भावयति।

## आनन्दवर्धनस्य लक्षणाविषयकमतम्

काश्मीरदेशस्थः राजानकानन्दवर्धनः ध्वनिसम्प्रदायम् अस्राक्षीत् एषः ध्वनेः सर्वात्मना प्रस्थानत्वेन ध्वन्यालोकाभिधं ग्रन्थं व्यरीरचत्। एतस्य मुख्यम् उद्देश्यम् केवलं ध्वनेः विरोधमतानि उपस्थाप्य तत्खण्डनम् अभिधाय काव्याङ्गित्वेन ध्वनितत्त्वस्य स्थापना आसीत्। विशेषतस्तु कविनानन्दवर्धनेन शब्दशक्तिविषये बहुकिमपि न प्रोक्तम्। किन्तु ध्वनिविरोधिनां मतं परिशील्य ज्ञायते यत् द्वितीयध्वनिविरोधिन आचार्यस्य मतोपस्थापने ध्वनिशब्दस्य कृतेभक्तिशब्दः तत्र उपलभ्यते। ग्रन्थकारःयथा भाक्तमाहुस्तमन्ये इत्यनेन समकेतयत्। ध्वनिविरोधिनः एके आचार्याः तमेव ध्वनिं भक्त्या कथयन्ति। तत्रैव पुनः तेन 'भाक्तमाहुस्तमन्ये। अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः' इत्युक्तम्। एवं ध्वन्यालोके कारिकायां वृत्तौ च लक्षणा-गौणीभक्तिविषये भाक्तवादिनाम् उल्लेखः प्राप्यते। आनन्दवर्धनाचार्येण यः कारिकायां भक्तिरिति शब्दः प्रयुक्तः, स च पूर्वेषामालङ्कारिकाणां कृतिषु ध्वनेरभावे अलङ्कारपरःभाक्तवादतया च प्रसिद्धः। ग्रन्थकारेण लक्षणाशब्दः ध्वनेः विभागावसरे कृतो वर्तते। द्वितीयोद्योते लक्षणामूलकध्वनिविचारः कृतः -

अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।
अविक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्[1]॥इति।

लक्षणामूलध्वनिविचारे तस्यैव विभागं कृत्वा सर्वप्रथमं लक्षणायाः निमित्तानि ध्वन्यालोके प्रथमोद्योते प्रदर्शयति। यथा-

---

1. ध्वन्या.,२.१

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः ॥[1] इति।

मुख्यावृत्तेः परित्यागादनन्तरं यत् फलं लक्ष्यीकृत्य गुणवृत्तिःआश्रीयते तमर्थं बोधयितुम् उद्दिष्टफलज्ञानाय शब्दः स्खलद्गतिकः न भवतीति। यत् च अनेनाचार्येण मुख्यार्थात् भिन्नार्थे ध्वनितः भिन्नार्थे च गुणवृत्तिः, उपचरितः, भाक्तः इत्येते शब्दाः प्रयुक्ताः । तथा च

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥
भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथाव्याप्तेर्न चाऽसौ लक्ष्यते तया [2]॥

अत्र आचार्यानन्दवर्धनः ध्वनेः लक्षणायाः स्थलं व्यावर्तयति। अर्थात् ध्वनिस्तु रूपभेदादिभ्यः अनेकप्रकारको भवति, किन्तु उपचारमात्रं तु भक्तिः भवति। आनन्दवर्धनाचार्येण मूले लक्षणेति शब्दः न प्रयुक्तः। अपि तु लक्षणावृत्तिप्रयोगाय गुणवृत्ति-भाक्त-उपचरितादयःशब्दाः पर्यायत्वेन उक्ताः।

## मुकुलभट्टस्य लक्षणाविषयकमतम्

मुकुलभट्टः शब्दशक्तिविवेचने लक्षणावृत्तिविवेचने च स्वकीयं स्वतन्त्रं मतं स्थापयति। यतोऽहि एष आचार्यः नहि केनापि शास्त्रसम्प्रदायेन सम्बद्धोऽस्ति। प्रत्युत व्याकरण-मीमांसा-न्याय-काव्यशास्त्रादिषु पारङ्गतः समवैदुष्यश्च आसीत्। काश्मीरदेशस्य प्राणतत्त्वभूतं दर्शनं शैवदर्शनमित्यतः शैवसम्प्रदायस्य तु निसर्गात् पण्डितः चासीत्। मीमांसाशास्त्रस्य तु जैमिनिभाष्यकारकुमारिलादिमतानि अनुसृत्य तेषाम् उदाहरणानि लक्षणा-विवेचनप्रसङ्गाय प्रादात्। ततः एषः मीमांसकः इतिलक्ष्यते। एतत्प्रणीतः अभिधावृत्तिमातृकानामा ग्रन्थः उपलभ्यते। तत्रएतेन अभिधा दशधा व्यवेच्यत। मुकुलभट्टस्य मतानुसारं लक्षणाशक्तिः मुख्यार्थात्परमेव प्रवर्तते। सर्वेऽपि अर्थाः

1. ध्वन्या प्रथ.उ.,पृ.२७६
2. तत्रैव, पृ. २६२

लाक्षणिका भवन्ति, तेषाम् अवबोधः लाक्षणिकव्यापारेण भवति। यश्च अभिधाया एव भेदोऽस्ति। लक्ष्यार्थस्य ज्ञानं मुख्यार्थस्य पर्यालोचनेन एव भवति। यथागौः इत्यत्र अभिधया गौरिति शब्दस्यार्थः गोत्वरूपः, लक्षणया गोव्यक्तिश्च लक्ष्यते। "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे"[1] इति न्यायः चरितार्थो भवति अभिधाविषये। एतन्मते अभिधायाः द्वौ व्यापारौ भवतः- एकः मुख्यः अपरः लाक्षणिकः। इत्येवमाह –

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते॥[2] इति

अर्थावसेयस्य शब्दव्यापाराभावस्य लाक्षणिकस्य अर्थस्य ज्ञानाय मुख्यार्थः कारणम्। लक्ष्यार्थप्रतीत्यर्थं मुख्यार्थस्य ज्ञानम् आवश्यकं भवति। मुकुलभट्टस्तु मुख्यार्थं निरन्तरार्थनिष्ठं लक्ष्यार्थं सान्तरार्थनिष्ठम् इत्यभिदधाति। एतन्मते लक्षणा अभिधायामेव पर्यवसिता। तस्मादभिन्ना सा अस्ति। यदुक्तम्- तेनासौ लाक्षणिकी। एवमयं मुख्यलाक्षणिकात्मकाविषयोपवर्णनसान्तरार्थ-विषयश्च[3] इति।

**अभिनवगुप्तस्य लक्षणाविषयकमतम्**

अलङ्कारशास्त्रे मुकुटमणेः ध्वन्यालोकस्य लोचननाम्नीं टीकां व्यलेखीत् अभिनवगुप्तपादः। जटिलस्य ग्रन्थस्य काव्यप्रमेयतत्त्वानि काव्यशास्त्रपिपठिषुभ्यः सौलभ्येन हृदयङ्गमानि भवेयुरित्येतदर्थं तेन लोचनटीका आरचिता। एष आचार्याभिनवगुप्तः कश्मीरदेशस्य परं शैवः तन्त्रशास्त्रपण्डित चासीत्। एषः ध्वन्यालोकग्रन्थमादायलोचननाम्नीं टीकां लिखित्वा तत्र सम्यक्तया ध्वनिविरोधिमतानि युक्तायुक्तविचारपुरस्सरं विचार्य ध्वनितत्त्वंव्यवस्थापयामास। लक्षणावृत्तिविषये एषः स्पष्टशैल्या लक्षणागौण्योः मध्ये भेदं दर्शयामास। ध्वनितत्त्वस्य विप्रतिपत्तिषु अन्यतमायाः भाक्तवादा-

1. का.प्र., द्वि.उ.,पृ.५५
2. अभिधा, का.१
3. तत्रैव पृ.०३

ख्यायाः निरूपणावसरे भक्तिं व्याख्याति लोचनकारः – भज्यते सेव्यते पदार्थेन प्रसिद्धतया उत्प्रेक्षते इति भक्तिः। तत आगतः भाक्तः लाक्षणिकोऽर्थः इति। इयमेव भक्तिः आलङ्कारिकैः नामान्तरेण लक्षणा इत्यभिधीयते। आचार्यः गुप्तपादः भक्तिमेव लक्षणा-गुणवृत्त्यपरपर्यायतया गृह्णाति। यथा – गुणसमुदाय-वृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिर्भक्तिः तत आगतो गौणोऽर्थो भाक्तः। भक्तिः प्रतिपाद्ये सामीप्ये तैक्ष्ण्यादौ श्रद्धातिशयः तां प्रयोजनत्वेनोद्दिश्य तत आगतो भाक्तःइति गौणो लाक्षणिकश्च इति। लोचननकारमते लक्षणार्थे उपचार इति शब्दः प्रयुक्तः न तु भक्तिरिति। यतोऽहि मुख्यार्थस्य भङ्गो भक्तिः। मुख्यार्थबाधः मुख्यार्थयोगः प्रयोजनमिति लक्षणाभ्युपगमनार्थम् उपचारस्य बीजत्वेन च इमे त्रयोऽशाः अपेक्ष्यन्ते। एतेषां मते शब्दस्य चतस्रो वृत्तयो भवन्ति। अभिनवगुप्तपादाचार्यः अर्थविभागनिरूपणानन्तरं प्रतीयमानार्थस्य द्वितीयार्थस्य निषेधत्वप्रकरणप्रसङ्गे मीमांसकानां मतं दूषयन् ताः वृत्तीः लक्षयति। ताश्च अभिधातात्पर्यालक्षणाव्यञ्जना इति। लक्षणायाः लक्षणं करोति **मुख्यार्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्लक्षणाशक्तिः**[1] इति लोचनकारः लक्षणायाः सहकारिकारणानि एव तन्निमित्तकोटौ स्थापयति। अर्थात् मुख्यार्थबाधतद्योगप्रयोजनरूढ्यन्यतरहेतुत्रयस्य साहाय्यमपेक्ष्यते लक्षणा। लोचनकारः ग्रन्थकारानन्दवर्धनापेक्षया लक्षणास्वरूपं स्पष्टतया उपवर्णयामास। अभिनवगुप्तः लोचनटीकायां लक्षणावृत्त्यर्थं भक्ति-उपचार गौणवृत्तिः इत्यादयः शब्दाः पर्यायतया प्रायुङ्क्त।

### महिमभट्टस्य लक्षणाविषयकमतम्

आचार्यमहिमभट्टः काश्मीरदेशे जनिं प्राप। एतस्य काव्यशास्त्रे बहुमहत्त्वं वर्तते। यतो हि महिमभट्टात्पूर्वं काव्यसम्प्रदायस्य नैका धारा असृज्यन्त। ताःरससम्प्रदायादारभ्य ध्वनिसम्प्रदायं यावत्प्रावर्तन्त। एषः लोचनकाराद् अभिनवगुप्तपादात् पश्चाद्वर्ती भोजराजमम्मटादिभ्यः पूर्ववर्ती चासीत्। यदा ध्वनिसम्प्रदायः सर्वाङ्गिकतया स्वविकासताम् आरोहन्

1. ध्वन्या. लो., तारावती, पृ.४८-५०

आसीत्। तदा एषः आचार्यः स्वीयतर्कमनीषया ध्वनेः खण्डनाय व्यक्तिविवेकं ग्रन्थं विचारयामास। वस्तुतः एषग्रन्थः ध्वनिविपर्यये लिखितः वर्तते। अतः ग्रन्थकृतः तत्र स्वकीया अभिनवा युक्तिवियुक्तिपूर्णानव्यन्यायशैली एव बीजभूता। एषः शब्दशक्तिविषये किमपि नूतनं लक्षणान्तरं नावोचत्। किन्तु व्यञ्जनावृत्तेः अस्वीकाराय केवलाम् आद्यां शब्दस्य अभिधामेव शक्तिं स्वीचक्रे। एषः लक्षणां वृत्तिं तु स्वीकरोति किन्तु अनुमाने एवगतार्थी-करोतिस्वरूपतः न परिभाषते। एषः व्यञ्जनाशक्तिम् अनुमाने अन्तर्भाव-यन्शब्दस्य एक एव अभिधाव्यापार इति स्वीकरोति। उक्तञ्च तेन–

शब्दस्यैकाभिधा शक्तिरर्थस्यैकैव लिङ्गता।
न व्यञ्जकत्वमनयोः समस्तीत्युपपादितम्[1] ॥ इति।

शब्दस्य केवला एकैव शक्तिः अभिधा भवति। अर्थे तु केवला लिङ्गता (साहाय्यानुमापिका) भवति इति। महिमभट्टः रसादिम् अनुमेयं वस्त्वलङ्कारौ च शब्दानुमानविषयपरत्वेन स्वीचकार। स रसादिः अनुमेयः लक्षणया व्यङ्ग्यो भवति। यतोहि लक्षणायाः प्रयोजनमस्ति चमत्कारप्रसरः इति। तेनलक्षणायाः स्वरूपम् एवमभिहितम् –

अन्त्योऽनुमेयो भक्त्या तु तस्य व्यङ्ग्यत्वमुच्यते।
भक्तेः प्रयोजनांशो यश्चमत्कारित्वलक्षणः ॥
स तत्रास्ति सोऽप्यस्य विभावाद्येकहेतुकः।
अत एव न लोकोऽपि चमत्कारः प्रसज्यते[2]॥ इति।

महिमभट्टः अनुमितिवादी, तन्मते शब्दस्य केवला शक्तिः अभिधा भवति। अन्याः शक्तयस्तु अनुमानपरतया स्वीक्रियन्ते। एतन्मते शब्दः केवलम् अभिधाशक्त्या मुख्यार्थं प्रतिपाद्य ये अन्ये अर्थाः भवन्ति। यथा – लक्ष्यार्थः तात्पर्यार्थः व्यङ्ग्यार्थश्चेति। सर्वविधमपि अर्थान्तरं शब्दः अभिधया न ज्ञापयितुं क्षमते। अपि तु अर्थान्तस्य प्रतीतिः लिङ्गताशक्त्या भवति। सा च शक्तिः

1. व्यक्ति. २७ पृ.८५
2. व्यक्ति., का.४१-४३, पृ.८६

अर्थनिष्ठा। अतः एतन्मतानुरोधेन शब्दव्यवहारः केवलम् अभिधाशक्तेः कृत एव सम्यक् न तु लक्षणाव्यञ्जनयोः कृते। यतोऽहि ते शक्ती तु अर्थनिष्ठे अनुमेयगते स्तः। एषः लक्षणां वृत्तिमपि स्वीकृत्य तस्याः अनुमेयतया ज्ञानं कारयति। एषः पूर्वाचार्याणां मतं समुपस्थाप्य तत् परिष्करोति यथा –

जातिशब्दोऽन्तरेणापि जातिं यत्र प्रयुज्यते।
सम्बन्धसदृशाद्धर्मात् तं गौणमपरे विदुः[1] ॥ इति।

जातिशब्दस्य प्रयोगः जातिरहितपदार्थेष्वपि भवति। सादृश्य-सम्बन्धिपदार्थस्य धर्मसाम्यं भवति चेत् अन्यं तं गौणमिति आहुः। स्पष्टयति यत् "उपोढरागेण" इत्यादिषु स्थलेषु अभिधा केवलं वाच्यार्थं बोधयित्वा विरमति। अर्थान्तरस्य प्रतीतिस्तु यया शक्त्या भवति सा अर्थे तिष्ठति। अर्थद्वारा अर्थान्तरज्ञानम् अनुमानद्वारा एव भवति। यथा धूमरूपधर्मेण वह्निरूपस्य अर्थान्तरस्य प्रतीतिः। गौर्वाहीकः इत्यत्र गोत्वस्य वाहीकत्वाद् भेदपरतया एकविभक्त्या प्रतिपादितस्य शब्दस्य अभिन्नता न भवति। तदा जाड्याद्यभेदः अनुमीयते। अतः सा शक्तिः अर्थनिष्ठा भवति। वक्तापि वाहीके गोगुणान् आरोपयितुम् साधर्म्यवशात् अभेदं कारयति। एतस्य अभेदस्य हेतुरस्ति वाहीकनिष्ठगोतुल्यं जाड्यादिगोत्वभिन्नधर्माणाम् अस्तित्वम्। अतः साधर्म्यं विनाभिन्नपदार्थेषु अभिन्नतायाः व्यवहारो न भवति। भङ्ग्यन्तरेण सहोच्चरितं पदं गौर्वाहीकः इति। तस्य प्रयोजनं गवादेः वाहीकादौ आरोपविषये आरोप्यमाणादर्थस्य जात्यादिधर्मस्य अस्तित्वम्। स तु अनुमानेन एव ज्ञायते। आचार्येण उक्तोदाहरणे द्वौ शब्दौ चर्चितौ। तौ च सादृश्यसाधर्म्ये इति। काव्यशास्त्रे इमौ उभावपि शब्दौ विचारपरकौ वर्तेते। तौ शब्दौकाव्यप्रकाशे द्वितीयोल्लासे अर्थालङ्कारगताया उपमाया निरूपणावसरे मम्मटेन व्याख्यातौ। साधर्म्यमुपमाभेदे इत्युपमा परिभाषिता। अत्र साधर्म्यशब्दस्य इत्थं व्याख्यानम् – समानः धर्मः गुणक्रियादिरूपः ययोरुपमानोपमेययोः तौ सधर्माणौ तयोः भावः साधर्म्यम् इत्यतः साधारणधर्मवत्त्वम्इति। केचन साधर्म्यं साधारण-

1. व्यक्ति, का. ४५ पृ.८८

धर्मप्रतियोगिकः उपमानोपमेयानुयोगिकः सम्बन्धविशेषः इति स्वीकुर्वन्ति। उपमानप्रतियोगिकः उपमेयानुयोगिकः सम्बन्धविशेषः सादृश्यमिति व्याख्याय उभयत्र पार्थक्यमुपस्थापयन्ति। अन्ये टीकाकाराश्च साधर्म्यसादृश्ये साधारण-धर्मवत्त्वार्थे पर्यायतया अभ्युपजग्मुः।

पुनः द्वे उदाहरणे प्रस्तूय तदनुमाने अन्तर्भावयति। तथा हि –

**कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्** इत्यत्र विचारः कर्तव्यः। अविनाभावस्य निश्चयात्परम् अन्यपदार्थेण अपरपदार्थस्य प्रतीतिः अनुमानं भवति। अत्र वदति इत्यादिप्रयोगेषु वदनादिद्वारा प्रकाशनादेः प्रतीतिः भवति। तयोः द्वयोः अविनाभावसम्बन्धः अस्ति। तस्य च आधारः कार्यकारणभावः। यतोहि प्रकाशनं वदनक्रियायाः कार्यत्वेन प्रसिद्धमस्ति। परन्तु वदतीति क्रियया प्रकाशनम्**,**अभिधया ज्ञायमानमस्ति इति वक्तुं न शक्यते। यत् अभिधायाः तत्र सङ्केतो नास्ति प्रकाशनञ्च वदनात् अभिन्नं नास्ति। वदति इतिक्रियापदमपि स्वार्थस्य प्रतीतिं कारयितुं क्षमं न, तस्य द्वितीये क्षणे बाधितत्वात्। लक्षणयापि वदति पदस्य वदनक्रियया तुल्यं प्रकाशनरूपार्थे तदितरक्रियायां तात्पर्यं वर्तते। तदपि न श्लोके तदुपादानम् उपायं विना अर्थसिद्ध्यभावात्। अस्यां स्थितौ अन्यथानुपपत्तितया अर्थापत्तिप्रमाणेन वदनादिपदेन प्रतीयमानं प्रकाशनम् अनुमेयमेव आवशिष्यते अर्थापत्तेः अनुमानेऽन्तर्भावत्वात्। अतः लक्षणया ये प्राचीनालङ्कारिकाः अर्थं साधयन्ति तदपेक्षया अनुमानगम्यात् लाघवं वर्तते। अतः महिमभट्टानुसारं लक्षणा-शब्दशक्तिः अनुमाने अन्तर्भवति, सा च अर्थनिष्ठा अस्ति। क्वचित् रसादिः लक्षणाद्वारा अनुमेयः अस्ति। इत्येवंविधं विचारं महिमभट्टः सविशदं उपस्थापयामास।

### भोजराजस्य लक्षणाविषयकमतम्

भोजराजः परमवैयाकरणो महान् आलङ्कारिको धारानरेशः चासीत्। एतस्य संस्कृतवाङ्मये नैके ग्रन्थाः समुपलभ्यन्ते। काव्यशास्त्रे एतेन उभौ ग्रन्थौ प्रणीतौ। सरस्वतीकण्ठाभरणम् श्रृङ्गारप्रकाशः चेति। वृत्तिविषयकविचारः स्फुटतया तु अनेन श्रृङ्गारप्रकाश एव अकारि। तथापि पञ्चपरिच्छेदात्मके

सरस्वतीकण्ठाभरणेऽपि लक्षणादिवृत्तिपरकाः शब्दा दृश्यन्ते। प्रसङ्गतः द्वितीयपरिच्छेदे शब्दालङ्कारनिरूपणावसरे शय्यायाः विचारः प्रस्तुतः। तत्र शय्यायाः षड्विधेषु भेदेषु अन्यतमायाः प्रकीर्णघटनानामिन्याः चर्चावसरे मुख्या गौणी लक्षणा तद्भावापत्तिः उपचरिता लक्षकलक्षणा इति एतादृशाः वृत्तिविशेषाः उपन्यस्ताः। तेनैवोक्तम् 'या इमा महाकविप्रबन्धेषु मुख्यागौणी-लक्षणा-स्तद्भावापत्तिरुपचरिता लक्षितलक्षणेति शब्दवृत्तयस्ता अपीह श्रूयन्ते'[1] इति।

वस्तुतस्तु भोजराजस्य वृत्तिविषयकविवेचनन्तु श्रृङ्गारप्रकाशे प्राप्यते। केवलशब्दसम्बन्धशक्तिप्रकाशाख्ये सप्तमे प्रकाशे शब्दार्थयोर्द्वादशविधं सम्बन्धं साहित्यम् इति स्वीक्रियते। तदुक्तम्- **अभिधाविवक्षातात्पर्य-प्रविभागत्यपेक्षासामर्थ्यान्वयैकार्थीभावदोषहानगुणोपादानालङ्कार-रसावियोगरूपाः शब्दार्थयोर्द्वादश समर्थाः साहित्यमुच्यते**[2] इति। एवं विधाः द्वादश समर्थाः शक्तिबोधकाः सम्बन्धबोधकाः शब्दार्थवृत्तिपराः साहित्यपदेन उच्यन्ते। उक्तेषु द्वादश सम्बन्धप्रकारेषु अभिधा इति पदं परिगणितमनेन।

एषः अभिधाशक्तेः प्रकारत्रयं मुख्या गौणी लक्षणा चेति अङ्गी-करोति। इत्युक्ते एतस्य मते केवला एका एव शब्दशक्तिः वर्तते। लक्षणातः पृथग् गौणीं व्याखात्। गौणीं लक्षयति – **गम्यमानशौर्यादि- गुणयोगव्यवहितार्था गौणी**इति। ये लक्ष्यमाणशौर्यपराक्रमवीरादयः गुणाः तेषां योगेन अन्यस्मिन् पुरुषे आरोपः क्रियते सा गौणी भवति। भोजराजः लक्षणां लक्षयन् वदति – **स्वार्थाविनाभूतार्थान्तरोपलक्षणा तु लक्षणेति**। गौणेः स्थलं दर्शयति – यथा हि गौरित्ययं शब्दः मुख्यया वृत्या सास्नादिमन्तं गलकम्बलादिमन्तं पिण्डपदार्थं प्रतिपादयति। स एव तिष्ठन् मूत्रतादिगुण- समुदायमपेक्षमाणो यदा वाहीके वर्तते तदा गौणीं वृत्तिमनुब्रवीति शब्दः। तदाह–

---

1. सरस्वती, पृ.८५
2. श्रृङ्ग. प्र. सप्तम. अध्याय, पृ. २२३.

**रूढ्या यत्र सदर्थोऽपि लोके शब्दो निवेशितः।**
**स मुख्यस्तत्र तत्साम्याद् गौणोऽन्यत्र स्खलद्गतिः॥** इति।

यदाशब्दः स्वार्थतः क्रियासिद्धौ साधनभावं गन्तुमसमर्थस्तदाभिधेयाविनाभूतमर्थान्तरं लक्षयति सा लक्षणा। यथा गङ्गायां घोषः प्रतिवसतीति। अत्र गङ्गाशब्दो विशिष्टोदकप्रवाहे निरूढाभिधानशक्तिः, स च घोषकर्तृकायाः प्रतिवसनक्रियायाः अधिकरणभावं गन्तुमसमर्थः स्वार्थाविनाभूतं तीरादिं लक्षयति। तदुक्तम् –

**अभिधेयाविनाभूतप्रतीतिर्लक्षणेति या।**
**सैषा विदग्धवक्रोक्तिर्जीवितं वृत्तिरिष्यते[1] ॥**

इत्युक्त्वा भोजः अभिधातः अभिन्नां लक्षणां वृत्तिं प्रत्यपीपदत्।

**आचार्यमम्मटस्य लक्षणाविषयकमतम्**

वाग्देवतावतारः काश्मीरदेशवास्तव्यः राजानकमम्मटाचार्यः प्रसिद्धो वर्तते। काव्यशास्त्रीयसर्वतत्त्वविवेचनम् एतदीये ग्रन्थे काव्यप्रकाशे परिलक्ष्यते। अयं सर्वेषां प्राचामालङ्कारिकाणां मतं यथासारं ग्रथित्वा सर्वमतसमन्वयरूपं ग्रन्थं विरचयामास। ततः एषः समन्वयवादी आचार्यः अभवत्। लक्षणावृत्तिविवेचनम् अत्यन्तं व्यासशैल्या न्यरूपयत्। काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयनामके द्वितीयोल्लासे अभिधां निरूप्य लक्षणालक्षणरूपां कारिकाम् उपबध्नाति। यथा-

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया[2]॥इति।

एतत्कारिकापर्यालोचनेन ज्ञायते यत् अन्योऽर्थो लक्ष्यते यत्सा लक्षणा इत्येव लक्षणायाः स्वरूपम्। कारिकायाः पूर्वार्द्धे उक्तानि सर्वाणि विशेषणानि न लक्षणघटकानि। तानि तु लक्षणायाः उपस्थापकानि हेतुभूतानि वर्तन्ते। ततः मुख्यार्थबाधे तस्य योगे रूढिप्रयोजनयोः अन्यतरस्मिन् च सति अन्यः अर्थः

---

1. शृङ्ग. प्र. सप्तम. अध्याय, पृ. २२३-२२४
2. का. प्र., २/९

लक्षितः प्रतिपादितोयया भवति सा लक्षणेति अर्थः। अत्र लक्षणाशक्ति-स्वीकाराय त्रीणि निमात्तानि दत्तानि। तानि यथा-

१. **मुख्यार्थबाधे**- को नाम मुख्यार्थबाधः इत्यतः उच्यते। न तु शब्दबाधः, न च अर्थस्य बाधः अन्यत्रापि तयोः दर्शनात्, न च तयोः अन्वयस्य आधाराधेयरूपस्य सामीप्यसम्बन्धस्य बाधः, अपितु वक्त्रा उक्तार्थश्रवणसमनन्तरं प्रत्यक्षादिप्रमाणेन तत्र पूर्ववर्त्तिनि ज्ञाने अप्रामाण्यस्य या प्रतीतिः भवति स एव मुख्यार्थबाधः इत्येव तात्पर्यं, - ध्वनति। वामनीटीकाकारः **गङ्गायां घोषः** इत्यादौ प्रत्यक्षादिप्रमाणेन भगीरथ-खातावच्छिन्नगङ्गा-प्रवाहादिरूपस्य मुख्यार्थस्य बाधे घोषाद्यधिकरण-त्वाद्यसंभवरूपे बाधे सति यद्वा अनुपपत्तिरूपबाधे सति यद्वा वक्तृतात्पर्याविषयत्वे सति इत्यभिप्रायः।

२. **तद्योगे-** तस्य प्रत्यक्षादिप्रमाणेन व्यवहितस्य मुख्यार्थस्य योगेसाक्षात्सम्बन्धे इत्युक्तौ अमुख्येन लक्षणीयेन तटादिनार्थेन सह सामीप्यादिरूपसाक्षात्सम्बन्धे सतीति यावत् ।

३. रूढिप्रयोजनान्यतरत्वम्- तयोः द्वयोर्मध्ये एकस्य ताविअवश्यं भाइत्याशयः रूढिर्नाम प्रसिद्धिः प्रयोगप्रवाह इत्यर्थः। रूढिकारणात् उताहो प्रयोजनात् शैत्यपावनत्वादिप्रतीतिरूपफलादिति। एतेषु उपर्युक्तेषु निमित्तीकृतेषु त्रिषु मुख्यार्थबाधतद्योग-रूढिप्रयोजनान्यतरेषु सत्सु लक्षणायाः अवसरो भवति। इति कारिकापूर्वार्द्धस्य पिण्डितोऽर्थः। लक्षणायाः स्वरूपदलं वर्तते अन्योऽर्थः लक्ष्यते यत्सा लक्षणा इति। अत्र लक्षणे यत् इति पदं यया इत्यर्थे 'लुप्तकरण- तृतीयान्तमव्ययम्' इति नियमात् पठितम्। यया वृत्त्या अन्यः अर्थः, अर्थान्तरं मुख्यार्थाद्भिन्नः तटादिरूपोऽर्थः लक्ष्यते प्रतिपाद्यते सा लक्षणा इति व्यपदेश्यम्।
यल्लक्ष्यते यत्प्रतिपाद्यते सा लक्षणा इति। इत्युक्ते ज्ञानम् एव लक्षणा इति। व्याकरणरीत्या अर्थो भवति लक्ष्यते इति - क्रियापदं णिजन्तम् अभ्युपेत्य णिच्प्रत्ययस्य अर्थः हेतुव्यापारः। हेतुस्तु शब्द एव, अर्थः निर्वर्तते

अन्यार्थप्रतिपत्तिहेतुः शब्दव्यापारः लक्षणा इति। वैयाकरणानां मते लक्षणा शक्यतावच्छेदकारोपरूपा भवति।

मम्मटोक्तकारिकांशेन तद्योगे इत्यनेन नैयायिकानां मते शक्यसंबन्धरूपा वक्तृतात्पर्यरूपा लक्षणा पर्यवस्यति।

**आरोपिता क्रिया** इति उक्तकारिकांशः अयं न लक्षणघटकः किन्तु लक्षणास्वरूपबोधकः। सा लक्षणा आरोपिता मुक्यार्थव्यवहितलक्ष्यार्थ-विषयकत्वात् शब्दे कल्पिता आनीता इत्याशयः। अभिधा शब्दस्य शक्तिः इति नास्ति संशयः। परम् इयंलक्षणावृत्तिः शब्दस्य न, अपितु अर्थस्यैवभवति। तथाहि- शब्दस्य वाच्यार्थे अनुपपन्ने असङ्गते सत्येव लक्षणा भवति। एतस्याः शक्तेः स्वीकाराय मुख्यार्थस्य बाधः आवश्यकः। तत एव तस्याः प्रसङ्ग उदेति अन्यथा नेति। अत एव काव्यशास्त्रविदः साक्षात्सम्बन्धेन अर्थस्य, परम्परासम्बन्धेन उपचारतः शब्दस्य शक्तिं मन्वते। क्रिया – व्यापाररूपा इति तात्पर्यम्। वृत्तिभागे मम्मटाचार्यः लिखति – 'आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठः लक्षणा' इति। अन्तरं नाम व्यवधानम्, तेन सहवर्तते इति सान्तरः, मुख्यार्थबाधाद्युपस्थित्या व्यविहितः, मुख्यार्थस्य अन्वयानुपपत्ति-रूपव्यवधानेन युक्तः एवंविधः योऽर्थः लक्ष्यार्थः तन्निष्ठः तद्बोधकः व्यापारः लक्षणा इत्यचकथत्।

आचार्यमम्मटानुसारम् अन्योऽर्थः लक्ष्यते यत्सा लक्षणा इत्याकारकं ज्ञानमेव लक्षणां ये मैमांसिकाः स्वीकुर्वन्ति। तन्न समीचीनम्। यतोहि अभिधाव्यञ्जनाशक्त्योरिव एतस्याः अपि शक्तित्वं वर्तते। अथ च वृत्तिपदार्थः, भिन्नः तज्जन्या या प्रतीतिः सा भिन्ना। अतः लक्षणा ज्ञानाद्भिन्नैव। कारिकायां मुख्यार्थबाधे इति पदं 'भद्रात्मनो दुरधिरोहतनोर्विशाल' इत्यादिषु स्थलेषु मुख्यार्थस्य अबाधे सति व्यञ्जनाशक्तिसत्त्वात्लक्षणास्थले व्यञ्जनाप्रसक्तिं वारयितुं प्रायोजि।

**तद्योगे** – इत्यस्य पदस्य प्रयोजनमस्तिमुख्यस्याप्यभिधारूपमुख्यार्थ-संबन्धेन प्रतिपादनं संभवतीति तद्वारणम्। यद्वा प्रदीपकारमते तु तस्य अर्थः भवति व्यञ्जनायां व्यञ्जनाजन्यशाब्दबोधे शक्तिस्मृतेः अवबोधस्य वारणम्।

**रूढितोऽथ प्रयोजनात्** इत्यस्य आशयः रूढिप्रयोजनान्यतर-शून्यत्वेऽपि लक्षणाव्यपदेशात् रूपवान् घटः इत्यर्थे रूपः घटः इति प्रयोगापत्तिः मा भूत्, इति तत्पदं सन्निविष्टम्।

रूढेः उदाहरणे – कर्मणि कुशलः इत्यत्रकुशान् लातीति व्युत्पत्त्या दर्भग्रहणार्थस्यायोगात्मुख्यार्थस्य बाधेसति लक्षणया चतुररूपार्थस्य विवेचकत्वसम्बन्धेन बोधः जायते। प्रयोजनाभावात् रूढेः कारणात् व्यपदेशो जायते। प्रयोजनस्य उदाहरणेगङ्गायां घोषः इत्यत्र अभिधया जलप्रवाहरूपस्य गङ्गाशब्दार्थस्य घोषपदस्य आभीरवामभ्रूवसतिरूपार्थेन सह प्रत्यक्षादि-प्रमाणद्वारा अधाराधेयभावः (गङ्गानिष्ठाधारः घोषनिष्ठाधेयश्चेति) बाधितः। पश्चात् लक्षणया गङ्गापदेन बाधितार्थस्य जलप्रवाहरूपवाच्यार्थस्य गङ्गातीररूपलक्ष्यार्थेन सह सामीप्यादिसम्बन्धात्बोधः कार्यते। प्रयोजनन्तु शैत्यपावनत्वातिशयरूपं व्यञ्जनागम्यम्।

**मतभेदविचारः**

**भामहमते** लक्षणा केवला व्यवहारपरा आसीत्। शब्दस्य उभयविधव्यापारान्यतरः गौणार्थः इति नाम्ना प्रसिद्ध आसीत्। एषः रूपकप्रति-वस्तूपमाद्यलङ्कारगतः गुणानां साम्यवशात्गौणार्थ एव लक्षणाव्यवहारस्य आवाहकः आसीत्। **दण्डिमते**- लक्षणा गौणवृत्तिनाम्नी आसीत्। सा समाधिगुणस्वरूपे'अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना' इत्यन्यवस्तुनः धर्मस्यअन्यत्र आरोपरूपा गुणवृत्तिः वर्तते। **उद्भटमते**- लक्षणा रूपकालङ्कारे मुख्यार्थस्य सम्बन्धस्य विरहे गुणवृत्तेः प्रधानतया तस्यार्थस्य वाचकपदेन अन्यपदेन सह सम्बन्धः एव लक्षणावृत्तिः इति। किन्तु एषः तां गुणवृत्तिनाम्ना व्यपदिशति। **वामनमते**- लक्षणायाः स्वरूपं भक्तिरूपेण आसीत्। काव्य-शब्दस्य व्यवहारः शब्दार्थयुगले भाक्तः गौणः आसीत्। "सादृश्याल्लक्षणा वक्रोक्तिः" इत्यनेन लक्षणायाः व्यवहारः सादृश्यनिबन्धनायां वक्रोक्तितया आसादृश्यनिबन्धानायां सामीप्यादिनिबन्धानायां वा रूपकाद्यलङ्कारतया व्यवहारः आसीत् इति। **रुद्रटाचार्यमते** लक्षणा रूपकालङ्कारनिरूपणेगुणानां साम्यमुपमानोपमेयगततयारूपकस्यचमत्कारत्वाधायिका विवक्षिता। **आनन्द**-

**वर्धनमते** लक्षणा 'अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः' इत्यनेन वृत्तिभागेन भक्तिशब्दस्य प्रवृत्तिः आसीत्। किन्तु ग्रन्थकारेण लक्षणाशब्दः 'अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्' इत्यत्र ध्वनेः विभागावसरे प्रयुक्तो वर्तते। मुख्यवृत्तिप्रतिपादितस्य अर्थस्य परित्यागात्परं प्रयोजनरूपं फलमुद्दिश्ययया अर्थान्तरं प्रतिपाद्यते सा लक्षणापरपर्याया गुणवृत्तिरुच्यते इति। **मुकुलभट्टमते**लक्षणा- अर्थावसेयस्य शब्दव्यापाराभावस्य लाक्षणिकस्य अर्थस्य ज्ञानाय मुख्यार्थः कारणम्। लक्ष्यार्थप्रतीत्यर्थं मुख्यार्थस्य ज्ञानम् आवश्यकं भवति।

**अभिनवगुप्तमते-**

"मुख्यार्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्लक्षणाशक्तिः[1]"। तन्मते लक्षणायाः सहकारिकारणानि एव तन्निमित्तकोटौ भवन्ति। अर्थात् मुख्यार्थ-बाधतद्योगप्रयोजनरूढ्यन्यतरहेतुत्रयस्य साहाय्यमपेक्ष्यते लक्षणा। अभिनव-गुप्तपादः लक्षणायाः पर्यायत्वेन समानार्थकत्वेन गौणी-भक्ति-उपचारादि-शब्दान्प्रयुयुजे। **महिमभट्टमते** लक्षणाअनुमेयस्य रसादेः अनुमेयता-प्रकाशिकात्वेन वर्तते। यतोहि लक्षणायाः फलं चमत्कारोत्पादनमेव। अर्थान्तस्य प्रतीतिस्तुलिङ्गताशक्त्या भवति। सा शक्तिः अर्थनिष्ठा भवति।

**भोजराजमते** लक्षणा वाच्यार्थेन सम्बन्धितलक्ष्यार्थोपस्थापिकारूपा सम्मता। "स्वार्थाविनाभूतार्थान्तरोपलक्षणा तु लक्षणेति[2]। लक्षणातः भिन्ना गौणी स्वीकृता या च लक्ष्यमाणशौर्यपराक्रमादिगुणवशात् व्यवह्रियते।

**मम्मटमते** अन्यार्थप्रतिपत्तिः प्रतिपत्तिहेतुभूतव्यापारो वा लक्षणा। सा च साक्षादर्थव्यापारः परम्परया (आरोपितः) शब्दव्यापारः। तत्र मुख्यार्थादिहेतुत्रयं कारणम्।

**विमर्शः** भामहदण्ड्योः उभयोः लक्षणाव्यापारविचारेअयं भेदः अस्ति यत्भामहमते गुणवृत्तेरर्थः रूपकप्रतिवस्तूपमालङ्कारयोः चमत्कारस्य

---

1. ध्वन्या.लो., तारावती, पृ.४८-५०
2. शृङ्ग. प्र. सप्तम. अध्याय, पृ. २२३

आधायकः अस्ति। दण्डिमते तु समाधिगुणे चमत्कारस्य निर्वाहको भवतीत्ययं भेदः। साम्यन्तु इदमस्ति यत् उभावपि लक्षणार्थे गुणवृत्तिपदम् प्रायुङ्क्ताम्। उद्भटस्तु श्रुत्यर्थसम्बन्धस्य बाधात्पदान्तरस्य पदान्तरेण सह सम्बन्धरूपां रूपकगतां गुणवृत्तिम् आमनति इत्ययंभामहदण्डिभ्याम् भेदः, गुणवृत्तिस्वीकारः तु समानः अस्ति। वामनस्यरुद्रटस्य च साम्यं भामहदण्डिवामनैस्सह गुणवृत्तिस्वीकारे वर्तते। वामनः वक्रोक्तिरूपकयोः, रुद्रटः रूपके च सादृश्यात् च लक्षणां स्वीकुरुतः। दण्डिनं विहाय भामह-उद्भटवामनरुद्रटानांसाम्यम् अस्ति यत् अलङ्कारार्थे एव लाक्षणिकव्यवहारः गौणार्थः भाक्तः इति नामान्तर-कथनरूपम्। मतभेदस्तुभामहः रूपकादौ कुन्तकश्च वक्रोक्त्यादौ गौणार्थं स्वीकरोति। उद्भटस्तु मुख्यार्थबाधं निमित्तीकृत्य गुणवृत्तिं स्वीकरोति। आनन्दवर्धनमम्मटभट्टयोः तु लक्षणायाः स्वीकारः तन्निमित्ताधरेण स्वीकृतोऽस्ति।

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः॥ इति।

मम्मटः मुख्यार्थबाधतद्योगरूढिप्रयोजनान्यतरत्वत्रयं हेतुं वदति, आनन्द-वर्धनमते लक्षणानिमित्तेषु रूढिप्रयोजनान्यतरत्वमिति हेतुप्रसङ्गे स्पष्टतया-नोक्तम्। किन्तु ध्वनेः लक्षणां विभाजयितुं रूढिः स्वीकृता इति मतभेदः। मुकुलभट्टः लक्षणां तु स्वीकरोति किन्तु तस्याः स्वीकारे कीदृशान्यपि कारणानि नैवावश्यकानि इति मनुते। एषः लक्षणाभ्युपगमनाय मुख्यार्थस्य प्रतीतिरूपं कारणं स्वीचकार। मुकुलभट्टमम्मटयोः साम्यम् इदमेव अस्ति यत् लक्षणा सान्तरार्थनिष्ठा इति। मुकुलः लक्षणाम् अतिरिक्तशक्तिततया न स्वीकरोति। ताम् अभिधायामेव समावेशयति। भोजराजोऽपि अभिधायां तां पर्यजीगणत्। महिमभट्टोऽपिशब्दस्य एकामेव शक्तिं मन्वानः लक्षणां रसादिव्यञ्जकतया आह। रसादिरूपानुमेयं प्रति लक्षणा कारणम् इति मनुते। महिममम्मटभट्टयोः साम्यन्तु लक्षणाया अर्थनिष्ठत्वेन आरोपितक्रियात्वेन चवर्तते। भोजराजः लक्षणां गौणीञ्च भिन्नरूपेण स्वीकरोति। अभिनवगुप्तः लक्षणां मुख्यार्थ-बाधादिनिमित्तपरतया स्वीकरोति। मम्मटभट्टानन्दवर्धनादीनाम् अत्र समानता

अस्ति। भामहदण्डि-उद्भट-वामन-रुद्रटानां पूर्वाचार्याणाम् आनन्दवर्धनादीनाञ्च आलङ्कारिकाणां मध्ये मतभेदः सङ्क्षेपतः एवं वक्तुं शक्यते। भामहादयः लक्षणां व्यवहरन्तोऽपि तत्स्वरूपं न प्राचीकशन्। तन्मते लक्षणा गुणवृत्त्यादि-नाम्ना रूपकाद्यलङ्कारसमाधिगुणेषु प्रयुक्ता। आनन्दवर्धनादयस्तु लक्षणावृत्तेः परिभाषाम् अविदधाना अपि तत्स्थलं न्यगादिषुः। एवं चिरन्तनानाम् आलङ्कारिकाणां सिद्धान्ताः मतभेदविमर्शपुरस्सरं प्रास्ताविषत।

इत्थमत्र गभीरो लक्षणाशक्तिविचारो वेदोपनिषन्निरुक्तशास्त्राणि परिशील्य व्याकरणन्यायमीमांसाशास्त्रान्तर्वर्तीकाव्यशास्त्रबिम्बग्राहितया व्यमृश्यत।

## चतुर्थाध्यायः

# अर्वाक्तनालङ्कारिकोदीरितलक्षणावृत्तिविमर्शः

'शब्दब्रह्मातिवर्तते' इति न्यायात् लोके यः कोऽपि शब्दः सः स्वीयस्वरूपम् अर्थमुखेनैव प्रकटयति। अर्थात् जगति सर्वविधोऽपि वाग्व्यवहारः शब्दाश्रित एव भवति। यदि कश्चिच्छब्दः उच्चारितस्तर्हि तस्य कश्चन अर्थः अवश्यं भवत्येव। शब्दस्य शब्दत्वमेव अर्थप्रकाशनाय वर्तते। अतः पदवाक्यप्रमाणेषु शास्त्रेषु तत्तत्प्रवर्तकैः शास्त्रकारैः वा शब्दस्य अर्थस्य तत्सम्बन्धस्य च वैशद्येन विचारः अक्रियत। परन्तु कविसहृदयहृदयाख्ये कान्तासम्मितोपदेशपरके कामनीयककाव्यशास्त्रे शब्दविचारः शक्ति-वृत्त्यादिपदतयाविवेचितः। शब्दत्रितयस्य अर्थत्रितयस्य शक्तित्रितयस्य च व्यवहर्त्तारः आलङ्कारिकाः त्रिविधानाम् अर्थानां वाच्यलक्ष्यव्यङ्ग्यानां व्यञ्जकत्वं काव्यचमत्कृतिरूपं व्यङ्ग्यार्थं प्रति निरूपयन्ति। अतः शब्दस्य अर्थं प्रति त्रिविधव्यपारत्वात् शक्तेः त्रेधा विभागः कृतः। वस्तुतस्तु काव्यशास्त्रे व्यङ्ग्यार्थस्य प्राधान्यमेव आमनन्त्याचार्याः। किन्तु लक्ष्यार्थोऽपि विशिष्टतया व्यङ्ग्यार्थं प्रति ताण्डवलीलाविधायीव प्रतिभाति। लोकव्यवहारं प्रवर्तयितुं कथयित्रा प्रयुक्तैः अल्पपदैः स्वीयं सारगर्भिताशयं श्रोतुर्मनसि स्थापयितुं लक्ष्यार्थस्य प्रतिपादिका शब्दशक्तिः लक्षणा मन्यते काव्यशास्त्रविद्भिः। किन्तु एतेषु ऐकमत्यं न दृश्यन्ते।। लक्षणावृत्तिं तु आलङ्कारिकाः स्वीकुर्वन्ति किन्तु तस्याः स्वीकारे मुख्यहेतुः क इति क्रियमाणे प्रश्नेतत्सम्बन्धीनि नानाविधानि मतानि परापतन्ति। अयं सीमा न केवलम् आलङ्कारिकाणां जन्मकालाद् गृहीतः प्रत्युत शब्दशक्तिलक्षणविवेचनदृशा अस्ति। 'अर्वाचीनाऽलङ्कारि-काणां लक्षणावृत्तिविवेचने मतभेदविमर्शः' इत्याख्ये चतुर्थेऽध्याये लक्षणा-वृत्तिविवेचनदृशा रुय्यकाचार्यादारभ्य कोरिकनेमिरामभट्टाशाधरपर्यन्तानां काव्यतत्त्वविधायिनां ग्रन्थेषु लक्षणायाः स्वरूपं निश्चेतुं तत्प्रवृत्तेः हेतुः कः

प्रतिपादितरहस्यं किम्, तेषामाचार्याणाम् अर्वाचीनपदगृहीतानां परस्परं साम्यवैषम्ययोः मतभेदः, लक्षणावृत्त्यर्थं गौण्युपचारप्रभृतीनां पदानां प्रयोगः, इत्यादीन् उपविषयान् बिन्दुशः शोधकर्ता अनुसमधात्। रुय्यक-हेमचन्द्र-केशवमिश्र-जयदेव-विद्याधर-विद्यानाथ-विश्वनाथ-कृष्णकवि-धर्मसूरि-अप्पय्यदीक्षित-जगन्नाथ-कर्णपूर-बालकृष्णभट्ट-विश्वेश्वरपण्डित-भूदेवशुक्ल-विश्वनाथदेव-रघुनाथदास-हरिदास-नरसिंह-आशाधरभट्टादयः सन्ति। तदीया ग्रन्थाः साहित्यमीमांसा, हेमचन्द्रकाव्यानुशासनम्, -अलङ्कारशेखरः, चन्द्रालोकः, प्रतापरुद्रयशोभषणम्, एकावली, साहित्यदर्पणः, मन्दारमरन्द-चम्पूः, साहित्यरत्नाकरः, वृत्तिवार्तिकम्, रसगङ्गाधरः, अलङ्कारकौस्तुभम्, अलङ्कारसारः, रसचन्द्रिका, रसविलासः, साहित्यसुधासिन्धुः, साहित्य-भूषणम्, काव्यालोकः, नञ्जराजयशोभूषणम्, त्रिवेणिकाकोविदानन्दौ, इति। अस्यां दिशि उपर्युक्ता ग्रन्थाः शोधविषयस्य चतुर्थाध्यायानुरूपतया अचीयन्त।

## अर्वाचीनालङ्कारिकाणां लक्षणावृत्तिविवेचनम्

### १.रुय्यकमते लक्षणाशक्तिः

मम्मटाचार्यात्पश्चाद्वर्तिषु काव्यशास्त्रकारेषु रुय्यकः प्रथमः वर्तते। एतस्य व्यक्तित्वकृतित्वविषये च एतेन ग्रन्थे किमपि नोक्तम्। एष द्वादशशताब्दे कश्मीरदेशे अभवत्। एतस्य शिष्यः मङ्खकः कश्मीरनरेशस्य जयसिंहस्य सभापण्डित आसीत्। सः ग्रन्थे स्वगुरुपरम्परास्मरणावसरे आदौ गुरुत्वेन रुय्यकं समानर्च। अतः रुय्यकस्य ईषदैतिह्यं द्रष्टुं शक्यते। एतत्प्रणीता ग्रन्था एकादशोर्ध्वाः सन्ति। तत्र अलङ्कारसर्वस्वं साहित्यमीमांसा चेति ग्रन्थौ द्वावपिसाहित्यशास्त्रे प्रथेतेतराम्। साहित्यमीमांसाग्रन्थः केन व्यरचि इति तु ग्रन्थकारस्य नाम्नि संशीतिः वर्तते। जयरथप्रतापरुद्रयशोभूषणकारादीनां[1] मते अस्य ग्रन्थस्यकर्तृत्वेन रुय्यकः स्व्यकारि। अन्येषां मते तु मङ्खकः उदघोषि। अतो विमर्शका अपि एतस्य कर्तृत्वं निश्चेतुं संशेरते। एष ध्वनिवाद्याचार्यत्वेन परिगण्यते। तेन अस्मिन्ग्रन्थे सर्वोऽपि काव्यशास्त्रीयपदार्थः निरूपितः। तस्मात्

1. रुय्यक की साहित्यमीमांसा एक अध्ययन,पृ.०३

एषः एव साहित्यमीमांसाग्रन्थस्य कर्ता इति अङ्गीकृतम्। तेन अष्टप्रकरणात्मके साहित्यमीमांसाग्रन्थे शब्दशक्तिविवेचनावसरे वृत्तिसामान्यमुक्त्वा तत्प्रकार-विषये अकथि। तद्यथा –

वृत्तिः पदानां व्यापारः पदार्थप्रतिपादने।
सा मुख्या लक्षणा गौणीत्येवं त्रैविध्यमास्थिता[1] ॥

इति। पदानाम् अर्थस्य उपस्थापने यो व्यापारः स एव वृत्तिपदेन व्यवह्रियते। तस्याः मुख्यागौणीलक्षणाश्चेति त्रयो भेदा अपि निरूपिताः। एष द्वितीयतृतीयवृत्तितया लक्षणां गौणीं च पार्थक्येन प्रत्यपीपदत्। असौ लक्षणां निरूपयन् अलिखत्-

अभिधेयाविनाभूतं स्पृशन्ती लक्षणोच्यते[2]।

इति। वाच्यार्थसंवलितमर्थान्तरं यया प्रकाश्यते सा लक्षणा। तदुक्तकारिकाशयं विशदयितुं उदाहरणद्वयेन निरूपयति।

**'यत्तालीदलपाकपाण्डुवदनं यद्दुर्दिनं नेत्रयोः**
**यत्प्रेङ्खोलितकेलिपङ्कजदलं श्वासाः प्रसर्पन्ति च।**
**गौरी क्रुध्यतु वर्तते यदि न ते तत्कोऽपि चित्ते युवा**
**धिग्धिक् त्वां खलु पांसुलेखनसखी लोकेऽपि यन्निह्नवः**[3]॥

अत्र यत्तालीदलादिपदे पाकक्रियायाः अमूर्ततया तत्र पाण्डिम्नः सम्भवाभावात् तत्समीपवर्तिनि पाकसदृशद्रव्ये लक्षणावृत्त्या पाण्डुतारूपोऽर्थः प्रत्यपाद्यत। ग्रन्थकारः लक्षणास्थलं निर्विवादं दर्शनाय द्वितीयमुदाहरणं प्रदर्शयति।

अयि पान्थ! विलम्बसे किमेकः सहसा बालवनादितः प्रयाहि।

---

1. सा.मी., २/९
2. तत्रैव,पृ.०३
3. तत्रैव, विद्धशा.भ., पृ.२/१४

कुसुमायुधमाह्वयन्निवोच्चैः सहकारः कुरुते कूहूरुतानि[1] ॥

अत्र सहकारवृक्षस्याचेतनतया कुहू-कुहू इति शब्दकरणे अन्वयानुपपत्तिरुपपद्यते। अतः सहकारस्य तद्विद्यमाने कोकिलपक्षिविशेषे लक्षणा भवति। इत्थं ग्रन्थकारः लक्षणां वृत्तिं निरूप्य तदितरां तृतीयां गौणीं वृत्तिं प्रतिपादयति –

गौणी स्पृशत्यर्थान्तरं गौणी लक्ष्यमाणगुणान्वयात् [2]।

लक्ष्यमाणानां गुणानाम् अन्वयेन सह अर्थान्तरस्य स्पर्शिनीगौणी इत्यभिधीयते। यत्र सादृश्यादिगुणा यदि लक्ष्यमाणा भवन्ति, तेषां सादृश्य-सम्बन्धवशात्या अन्यार्थबोधिकासा गौणी। उदाहरणम्–

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तुविरहः[3]॥ इति।

रमणीयतादिगुणविशिष्टा लक्ष्मीः सीतारूपार्थे गौणवृत्त्या उपस्थापिता। प्रस्तुतस्य अप्रस्तुतीकरणं प्रधानस्य अप्रधानीकरणमेव गौणीति। मुख्या इव लक्षणा गौणी च एवं स्वात्मनि केनचित् निरपेक्षभावेन आत्मतन्त्रे न स्तः। अतः पराश्रितशक्तितया अभिधाश्रिततया वा अल्पप्राणा मन्यते। अतः इयं वृत्तिः जघन्या इत्यपिकथितम्।

**विमर्शः**

एवम् आचार्येण प्राचीनस्य सूत्रकारस्य भगवज्जैमिनेः वृत्तिविषयक-चिन्तनमपि निराधारं कथितम्। जैमिनिमुनिना जातिसारूप्यप्रशंसालिङ्ग-विशेषणैः पाषाणयजमानब्राह्मणवह्नि-आदित्ययूपगवादिषु अश्वात् तदितरे पशवो भिन्नाः। इत्यर्थेगौः अश्वः एव, पशुरस्ति प्राणिनः धारयति शिष्टस्य

1. सा.मी.,२/११
2. सा.मी. द्वि.प्र.,२/२
3. उ.रा.च.,१/३८

कारणमस्ति। इत्यादिपदप्रयोगेषु अन्यार्थस्य या वाचकता अस्ति सा तयैव वृत्त्यागतार्था भवति[1]। न्यायसूत्रकारेण अक्षपादेनदशस्वर्थेषु स्वीकृतम्उपचारं रुय्यकःतदित्थं व्यचारयत्। सहचरणस्थानतादर्थ्यादिभिः यष्टीः भोजय मञ्चाः क्रोशन्तीत्यादिषु पदप्रयोगेषु अपरार्थः कुत्रचिद् वाच्यापेक्षया कुत्रचिच्च-लक्ष्यमाणगुणानाम्अन्वयत्वेन लक्षितः। गौणार्थादतिरिक्तं किमपि नास्ति[2]। इत्युक्त्वा अन्यैराचार्यैरुक्तमतान्यालोचयत् रुय्यकः।

**२. हेमचन्द्रमते लक्षणाशक्तिः**

अयं गुर्जरप्रेदेशे जनिं प्राप्य जैनदर्शने अनेकान् ग्रन्थान् व्यरीरचत्। यथा जैनदर्शने एतस्य प्रावीण्यं तथैव साहित्यशास्त्रे आसीत्। एषः काव्यशास्त्रपरं **काव्यानुशासनम्** इति ग्रन्थमलेखीत्। तत्र भूमिकाख्ये प्रथमेऽध्याये एतेन वृत्तिस्वरूपम् अकथ्यत। असौ शब्दार्थयोः निरूपणावसरे उपाधिभेदात् शब्दान् विभजते। अयम् अभिधादीः चतसृः वृत्तीः शक्तिपदतया अनूपपाद्य शब्दार्थयोः विभागस्वरूपमकरोत्। सः अर्थस्य प्रकाशकशब्दतया वृत्तीः विचार्य शब्दानाम् अर्थप्रतिपादनेशक्त्या सह अविनाभावतया शक्तिम् अध्याहरत्। यथा-शब्दस्वरूपम् – 'मुख्यामुख्यगौणलक्ष्यव्यङ्ग्यार्थभेदान्मुख्यगौणलक्षक-व्यञ्जकाः शब्दाः' इति[3] वृत्तौ लिखति-मुख्यार्थविषयो मुख्यः,गौणार्थविषयो गौणः, लक्ष्यार्थविषयः लक्षकः, व्यङ्ग्यार्थविषयः व्यञ्जकः, विषय-भेदाच्छब्दस्य भेदा न स्वाभाविकः इत्यर्थः।

काव्यशास्त्रे शब्दानां तिस्रः शब्दशक्तयः स्वीकृताः। अभिधा लक्षणा व्यञ्जना चेति। हेमचन्द्राचार्यः मम्मटोक्तं लक्षणावृत्तिविषयकमतम् अनुसरति। परम् एषः त्रिविधशक्तेः स्थाने चतुर्विधशब्दशक्तिं निरूपयतीति केवलमयमेव भेदः लक्ष्यते। एतेन शब्द-अर्थ-शक्तिव्यवहारे एकैव पदं निरदिशि। यथा-शब्द-अर्थ-शक्तीनां कृते मुख्यगौणादिपदतया व्यवहारः इति। अस्येदमेव अन्तरं

---

1. सा.मी.,पृ.०५
2. सा.मी.,पृ.०४
3. हे.का., पृ.२५

लोक्यते शब्दार्थवृत्तिव्यपदेशाय पृथक्शब्दप्रयोगं नैव करोति। एतन्मतस्य पर्यालोचनेन बहुषु स्थलेषु मम्मटमतानुसारिता लक्ष्यते। किन्तु स्वीयनवीन-सर्जनया एष वृत्तिविवेचने बद्धो दृश्यते।

**गौणं लक्षयति**

मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभेदाभ्यामारोपितो गौणः[1]। इति गौणलक्षणाशक्त्योः द्वयोर्मध्ये भेदं सूचयन् कथयति- यत्र मुख्यार्थस्य बाधानन्तरं सादृश्यसम्बन्धेन विषये उपमेये विषयिणः उपमानस्य भेदमुखेन अभेदमुखेन वा आरोपकथनम्, सा गौणवृत्तिः। तत्प्रतिपादितः तत्प्रतिपादकश्चशब्दः इति द्वावपिगौणशब्देन व्यवहृतौ। उक्तञ्च वृत्तौ – 'गौर्वाहीकः', 'गौरयम्' इत्यादौ मुख्यस्यार्थस्य सास्नादिमत्वादेः प्रत्यक्षादिना प्रमाणेन बाधे निमित्तं च सादृश्यसम्बन्धादौ प्रयोजने ताद्रूप्यप्रतिपत्तिरूपे सत्यारोप्यारोपविषययोर्भेदाभेदेन च समारोपितोऽतथाभूतोऽपि तथात्वेनाध्य-वसितो गुणेभ्य आगतत्वाद् गौणः तद्विषयः शब्दोऽपि गौणः उपचरित इति चोच्यते' इति। तत्र सादृश्यनिमित्ते भेदेनारोपितो यथा गौर्वाहीकः। इदम् रूपकालङ्कारस्य बीजम्। अभेदेन यथा– गौरयम् इति इदमतिशयोक्त्य-लङ्कारस्य बीजम्।

लक्ष्यार्थस्य लक्षणाधीनतया ग्रन्थकारः लक्ष्यार्थनिरूप्यतया लक्षणां लक्षयति 'मुख्यार्थसम्बन्धस्तत्त्वेन लक्ष्यमाणो' लक्ष्यः[2] इति।

इति। गङ्गादिशब्दानां मुख्यार्थः स्रोतः प्रभृतिः, भेदाभेदमुखेन-तत्सम्बद्धतटादिरूपस्य लक्षणया ज्ञायमानस्य लक्ष्यार्थस्य शक्तिः लक्षणा इति। शेषं तु गौणलक्षणम् अनुवर्तत एव। लक्षणागौणयोः मिथः अयमेव सूक्ष्मभेदो वर्तते यत् गौणे तु भेदाभेदयोः आरोपकथनं भवति। लक्षणायां तु भेदाभेदयोः आरोपकथनं न भवति इत्ययं भेदो गौणीतः लक्षणां यौति। उदाहरणम् – 'गङ्गायां घोषः' 'कुन्ताः प्रविशन्ति' इत्यादौ गङ्गाप्रवाहे घोषस्य सत्वात्,

1. तत्रैव,पृ.२७
2. तत्रैव,पृ.२८

कुन्तानां प्रवेशस्य असम्भवात् मुख्यार्थे बाधत्वात् सामीप्यसाहचर्य-सम्बन्धाभ्यां गङ्गातीरे, कुन्तवन्तः इति लक्षणया लक्ष्यार्थः बोध्यते।

**विमर्शः**- हेमचन्द्रमते लक्षणाशक्तेरेव विभागद्वयमस्ति गौणवृत्तिः लक्षणा-वृत्तिश्चेति। मम्मटाचार्यमते गौणी लक्षणाभेदेन स्वीकृता न तु पृथक् शक्तितया। काव्यप्रकाशकारमते तु गौणी लक्षणाभेदे निक्षिप्ता। परन्तु अस्य मते तु तस्याः पृथक्सत्ता वर्तते। इति उभयत्र मम्मट- हेमचन्द्रयोः सूक्ष्मभेदः परिदृश्यते शेषं तु समानमेव।

**केशवमिश्रमते लक्षणाशक्तिः**

केशवमिश्रोऽयं आलङ्कारिकः परमनैयायिकः त्रयोदशशताब्दे अजायत। एतेन काव्यतत्वानां रसगुणालङ्कारादीनाञ्च विवेचनाय **अलङ्कारशेखरः** इति ग्रन्थो निरमीयत। अयं 'पदानां वृत्तयस्तिस्रः शक्तिः लक्षणा व्यञ्जना चेति अभ्युपागमत्। एषः व्याकरणसम्बद्धानि उदाहरणानि प्रस्तूय ग्रन्थमिमं प्राणैषीत्। शब्दस्य द्वितीयवृत्तितया लक्षणां व्याख्यातुमाह – 'लक्षणा शक्यसम्बन्धः'[1] इति। केचित्तु 'बोधसम्बन्धो लक्षणा'[2] इत्यामनन्ति। आचार्येण या लक्षणायाः परिभाषा दत्ता सा न्यायवैशेषिकनयावलम्बिनी वर्तते। प्राच्यनैयायिका अन्वयानुपपत्तिं नव्याश्च तात्पर्यानुपपत्तिं लक्षणाबीजतया अभ्युपगच्छन्ति। किन्तु ग्रन्थकारस्तु तात्पर्यानुपपत्तिम् अन्वयानुपपत्तिञ्च हेतुतया स्वीकृत्य लक्षणां पर्यभाषयत्। यथा- 'सा च तात्पर्यानुपपत्या मुख्यार्थानुपपत्या वा प्रवर्तते' इति। शक्त्या युक्तं पदं शक्तमिति भवति शक्त्या प्रतिपादितोऽर्थः शक्यः इति। शक्यार्थस्य वा वाक्ये सङ्गतेरभाव एव मुख्यार्थानुपपत्तिः कथ्यते। मुख्यार्थानुपपत्तिरेव अन्वयानुपपत्तिः इति नामान्तरेणापि व्यवह्रियते। यत्र आकाङ्क्षा-योग्यता-सन्निधिवशात् विधीयमानः कर्तृक्रियाकर्मरूपिसम्बन्धः असङ्गतो भवति। यथा 'गङ्गायां घोषः' इत्युदाहरणे गङ्गापदस्य जलप्रवाहरूपस्य शक्यार्थस्य घोषपदेन सह अन्वयः अचरितार्थो भवति अथवा

1. अ.शे.,पृ.१०
2. भाषाविज्ञान की भारतीयपरम्परा और पाणिनि पृ.६११

कर्मणि कुशलः इत्यादौ कुशान् लाति इति कुशलपदस्य कर्मपदेन सह मुख्यार्थः अनुपपन्नो जायते।

शक्यार्थस्य वाक्ये तात्पर्यं न सङ्गच्छते। तात्पर्यानुपपत्तिः अभिधीयते। वक्तुरिच्छा एव तात्पर्यं कथ्यते – 'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्' इतिकथनस्याशयः इत्थमेव वर्तते यत् शक्यार्थद्वारा वक्तुः इच्छायाः विषयस्य असङ्गतिः भवति चेत् तदा शक्यार्थस्य अन्येन अर्थेन सह सम्बन्धः एव लक्षणा। 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकपदस्य दधिरक्षणपदेन सह अन्वयस्तु भवति। किन्तु वक्तुरभिप्रेतार्थस्तु न सिद्ध्यति। यतोऽहि वक्तृतात्पर्यस्य काकमात्रे असत्वात्। तत्तु दध्युपघातकेषु मार्जारादिषु प्राणिषुवर्तते। अतः अत्र लक्षणायाः द्वे अन्यतरे प्रयोजकत्वे स्वीकृते ग्रन्थकर्त्रा प्राच्यनैयायिकानां नयमनुसरता। नव्यानां मते तु तात्पर्यानुपपत्तिरेव लक्षणा-बीजत्वेन स्वीकृता। अन्वयानुपपत्तिः तत्रैवान्तर्भूता इति तत्पक्षः।

ग्रन्थकारः लक्षणावृत्तिम् इतोऽपि विशदीकर्तुम् उदाहरणेन ख्याति-

निर्माल्यं नयनश्रियःकुवलयं वक्त्रस्य दासःशशी
भ्रूयुग्मस्य सनाभि मन्मथधनुर्ज्योत्स्नास्मितस्याञ्चलम्।
सङ्गीतस्य चमत्तकोकिलरुतान्युच्छिष्टमेणीदृशः
सर्वाकारमहो ! विधेः परिणतं विज्ञानशिल्पं चिरात्[1] ॥

इत्यस्मिन् निर्माल्य-दास-सनाभि-अञ्चल-उच्छिष्टादिभिः पदैः लक्षणावृत्त्या मुख्यार्थभिन्नस्य अन्यार्थस्य प्रतीतिः जायते। इत्थं केशव-मिश्रोक्तलक्षितलक्षणावृत्तेः परिशीलनेन निश्चेतव्यं यत् अस्य उक्तलक्षणास्वरूपे न्यायवैशेषिकदर्शनबिम्बम् आभाति।

**विमर्शः** एतस्य लक्षणाविवेचनं मम्मटविश्वनाथोक्तलक्षणालक्षणात् भिद्यते। एतत्सिद्धान्ते लक्षणाभ्युपगमनाय तात्पर्यानुपपत्तिः अन्वयानुपपत्तिः वेति हेतुरङ्गीकृत इति मे भाति। रूढिप्रयोजनयोः एकस्यापि कारणता लक्षणा-स्वीकारे नास्तीति इत्यपि अध्ययनेनैव समुपलक्ष्यते। ग्रन्थकारस्य साम्यं

---

1. तत्रैव, पृ.०९, प्रथमपादमात्रबालरामायणं,१/४०

पूर्वाचार्यैस्सह अस्मिन्नंश एव प्रतीयते यत् तेषां मते त्रिविधा शक्तिः अभिधा लक्षणा व्यञ्जना चेति। एतन्मतेऽपि समाना शक्तिः वर्तते। एतन्मतेऽपि वृत्तित्रिविधा।

**४.जयदेवमते लक्षणाशक्तिः**

आचार्यजयदेवः पीयूषवर्ष उपपनामा काव्यशास्त्रेप्रसिद्धो विद्यते। एतत्प्रणीताः अन्येऽपि ग्रन्था उपलभ्यन्ते किन्तु काव्यशास्त्रीयग्रन्थतया तु चन्द्रालोकः प्रथितः। स च ग्रन्थो दशसु मयूखेषु विभक्तः। तत्र ग्रन्थकारेण शब्दवृत्तिरसरीतिगुणालङ्कारादीनि काव्यप्रेमायानि सोदाहरणानि व्याख्यातानि। कारिकायाः पूर्वार्द्धे लक्षणम् उत्तरार्द्धे तदुदाहरणम् इत्यनेन क्रमेण सरसशैल्या च ग्रन्थो विलिखितः। तत्र नवमे मयूखे वृत्तिनिरूपणावसरे लक्षणावृत्तिं रूपयितुं मम्मटाचार्यमतमेव स्मरन् लक्षणायाः लक्षणं करोति। तद्यथा –

मुख्यार्थस्याविवक्षायां पूर्वार्वाची च रूढितः।
प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता[1] ॥

इति। जयदेवेन व्यञ्जनानिरूपणानन्तरं लक्षणाशक्तिः न्यरूपि। मुख्यार्थस्य विवक्षाया अभावेवक्तृतात्पर्यस्य अविषये इति तात्पर्यानुपपत्तौ सत्यां मुख्यार्थेन सह सम्बन्धितमर्थम् रूढिप्रयोजनयोः अन्यतरस्य सत्वेवदन्ती प्रतिपादयन्ती लक्षणा कथ्यते इत्यभिप्रैति। कारिकायां च पदेन विकल्पार्थग्रहणात्रूढिप्रयोजनयोः अन्यतरत्वं वक्तुमिष्टम्। मुख्यार्थबाधमुख्यार्थसम्बन्धरूढिप्रयोजनान्यतरहेतुकत्वे सति मुख्यार्थतावच्छेदकातिरिक्तधर्मावच्छिन्नार्थबोधजनको व्यापारो लक्षणा इति फलितम्। निरूढा लक्षणायमुदाहरणं दर्शयति 'कलिङ्गः साहसिकः' इत्यत्र वक्तुः कलिङ्गदेशवासी पुरुषः साहसिकः इत्यभीष्टार्थः। न तु मुख्यार्थः कलिङ्गदेश इति। अतो लक्षणावृत्त्या मुख्यार्थेन कलिङ्गदेशेदेशवासी पुरुषविशेष इति बोधो जायते। इयं पूर्वाचार्यप्रयुक्तत्वात् पूर्वा कथ्यते। एतादृशस्थले प्रयोगवशात् रूढिः वर्तते। अनेन इयं निरूढा

---

1. चन्द्रा., ९/१ पृ.२४२

लक्षणा। ततः प्रयोजनलक्षणायाः उदाहरणम् –'गङ्गायां घोषः' इत्यस्य जलप्रवाहे घोषः इति शक्यार्थः। गङ्गाप्रवाहे घोषावस्थानस्याशक्यत्वात् मुख्यार्थस्य बाधितत्वात्गङ्गार्थेन सह सम्बन्धी तटरूपार्थः लक्ष्यार्थः लक्षणया प्रतिपाद्यते। अत्र घोषस्य शैत्यपावनत्वातिशयपूर्वकपावित्र्यरूपप्रयोजनमिति वक्तृविवक्षया अर्वाचीनप्रयुक्तत्वात् अर्वाची कथिता। इत्थं जयदेवाचार्यः लक्षणाम् उपस्थाप्य तद्भेदान् विशदीकरोति। लक्षणावृत्तिविषयकभेदास्तु पञ्चमेऽध्याये तत्प्रभेदनिरूपणावसरे सप्रञ्चं विचारयिष्यन्ते इति।

**५.विद्याधरमते लक्षणाशक्तिः**

मम्मटोत्तरवर्तिषु काव्यशास्त्रीयाचार्येषु अन्यतमोऽयं विद्याधरः। एषः काव्यशास्त्रे चन्द्रालोककारतः पश्चाद्वर्ती काव्यप्रकाशकारमतमनुवर्तमानः एकावलीग्रन्थम् अरचयत्। एतन्मतेऽपि शब्दस्य तिस्रः शक्तयो भवन्ति। विद्याधरः अष्टोन्मेषात्मके एकावलीग्रन्थे द्वितीयोन्मेषे क्रमशः वाचकशब्दस्य तच्छक्तेः तद्व्यापारस्य च प्रतिपादनानन्तरं लक्षणां वृत्तिं लक्षयितुं ततः प्राक् तत्सामान्यं लक्षणं कथयित्वा व्यापाररूपं तद्वाचकशब्दं च अचकथत्। तद्यथा–

शब्दोऽयं लाक्षणिको व्यापारो लक्षणा भवेद्यस्य।
एतल्लक्षणमस्याः सामान्यं कथ्यते पूर्वम्[1]॥

इति। सामान्यलक्षणे लक्षणाशक्तेः ज्ञापकः शब्दो लाक्षणिकः, तस्य व्यापारः लक्षणा इति कथितम्। यतोहि तच्छक्तेः स्वरूपकथनात् तद्व्यापारः तज्ज्ञापकशब्दश्चेति ज्ञातव्यम्। यतो हि यावत्पर्यन्तं तद्बोधकशब्दस्य ज्ञानं न जायते तावत् तच्छक्तेरपि ज्ञानं न जायते। अतः ग्रन्थकृता आरम्भे लक्षणायाः सामान्यलक्षणं प्रस्तुतम्। तल्लक्षणप्रतिपादनात् परमधुना विशेषलक्षणमुखेन तांव्यनक्ति ग्रन्थकारः–

मुख्यार्थानुपपत्तौ तद्योगे रूढितोऽथवापि फलात्।
अन्योऽर्थो यदि लक्ष्यो भवति तदा लक्षणाभिमता[2] ॥

---

1. एकावली द्वि ३. का.४ पृ.६१
2. तत्रैव,

इति। यदन्यः अर्थः लक्ष्यो यथा सा लक्षणावृत्तिः। तस्याश्च लक्षणायाः प्रकटनाय तन्निमित्तानि कारणानि त्रीणि वर्तन्ते। तानि च मुख्यार्थस्य अनुपपत्तिः तद्योगः रूढिप्रयोजनान्यतरत्वञ्चेति। इत्युक्ते यावत्पर्यन्तं वाच्यार्थस्य वक्तृतात्पर्यविषयीभूतस्य तादृशस्यार्थस्य अन्वयासङ्गतितः बाधानन्तरं तस्य बाधितार्थस्य पुनः वक्तृतात्पर्यं बोधयितुं रूढिस्थले प्रयोजनस्थले वा अर्थेन सह सम्बन्धः यया स्थाप्यते सा लक्षणावृत्तिः भवति।

यथा वृत्तौ उक्तम् – मुख्यार्थस्य बाधस्तेन सम्बन्धः प्रसिद्धिः प्रयोजनं वा इत्येतत् त्रयं लक्षणायामुपयुज्यते। मुख्यार्थस्य बाधे तेनैव सम्बन्धे सति मुख्यार्थेनामुख्यार्थो यल्लक्ष्यते स आरोपितः सान्तरार्थनिष्ठः शब्दव्यापारो लक्षणा। कुशल इत्यादौ रूढितो लक्षणा। गङ्गायां घोष इत्यादौ तु प्रयोजनात् "अन्योऽर्थो यदि लक्ष्यो भवति" इत्यंशं व्याख्याति मल्लिनाथः तरलटीकायाम्। लक्ष्यते इति यत् स शब्दव्यापारो लक्षणेति अन्वयः। यच्छव्देन लक्ष्यते इत्यत्र गुणीभूतप्रकृत्यर्थोपलक्षणं प्रतिपादनापरपर्यायं यत् तत् परामृश्यते। मुख्यार्थबाधे तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणेति सारः। ग्रन्थकारः शङ्कोपस्थापनेन सिद्धान्तं द्रढयति शब्दो लक्षकोऽर्थो लक्षको वेति। वाचकशब्दस्य लक्षकत्वनिषेधाय हेतुं दर्शयति। शब्दस्य स्वार्थप्रकाशनमात्रेणोपरतव्यापारस्य पुनर्व्यापारान्तरायोगात् इत्युक्ते शब्दस्य प्रयोजनं केवलं स्वकीयार्थप्रकाशकारित्वमेव यादृशाय अर्थप्रकाशनाय शब्दव्यवहारः कृतः तादृशमर्थं शब्दः प्रत्याययेत्। अर्थं प्रत्याय्य पुनः शब्दो व्यापारान्तरं विधातुम् अक्षमो भवति। पुनश्च अर्थस्यापि लक्षकत्वं न सम्भवति इति प्रतिपादयन्नाह टीकाकारः- "न द्वितीयः, अर्थस्य लक्षकत्वे शब्दव्यापारो लक्षणेति कथम्? न च सङ्ग्रहे कश्चिन्निश्चय इत्याशङ्क्य अर्थस्यैव लक्षकत्वं सङ्ग्रहे विवक्षितमित्याशयेनाह अर्थस्य लक्षकत्वं न भवति। लक्ष्यार्थस्य प्रतिपादकशब्दो लाक्षणिको भवतीति ग्रन्थकर्तुराशयः।

इत्युक्ते अर्थे लक्षकत्वस्वीकारेणशब्दव्यापारो लक्षणा इति नय एव न प्रसज्यते। एष लक्षणाशब्दव्यापारः शब्दे कल्पितः आरोपितः अस्ति साक्षात्सम्बन्धेन तु लक्षणा मुख्यार्थबाधोपस्थितार्थनिष्ठाभवति।

**६.विद्यानाथमते लक्षणाशक्तिः**

आचार्यो विद्यानाथः नाट्यतत्त्वविद् आलङ्कारिकः नाट्यतत्त्वानि प्राधान्येन विविच्य प्रतापरुद्रयशोभूषणं ग्रन्थं व्यलिखत्। एष बन्धः नाट्य-तत्त्वव्याख्यानपरको वर्तते। अत्र सामान्यतया वृत्तिविचारोऽपि समुपलभ्यते। आचार्योऽसौ विद्याधरमहोदयात् उत्तरवर्त्यस्ति। प्रतापरुद्रीये काव्यप्रकरणाख्ये प्रकरणे वृत्तेः त्रैविध्यं स्व्यकार्षीत्। 'अभिधालक्षणाव्यञ्जनाख्यास्तिस्रः शब्दवृत्तयः' इति तदीयवाक्यम्। शब्दस्य अभिधाव्यापारो लक्षणाव्यापारो व्यञ्जनाव्यापारश्चेति त्रिविधा व्यापारा उताहो तिस्रः शब्दशक्तयो भवन्ति इति। पुनः लक्षणवृत्तिं परिभाषते– 'वाच्यार्थानुपपत्या तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणा इति लक्षणालक्षणम्'[1]। वाच्यार्थस्य अनुपपत्त्या बाधतया तस्य सम्बन्धिनि वाच्यार्थभिन्नार्थे आरोपितशब्दव्यापारो सा लक्षणा भवति। ग्रन्थकारेण उक्तलक्षणे शब्दव्यापार इति पदम् उपन्यस्तम्। तेन शब्दव्यापारस्तु तिसृणां वृत्तीनां भवत्येव। किन्तु एषा लक्षणा परम्परासम्बन्धवशात् शब्दे कल्पिता भवति। साक्षात्सम्बन्धान्मुख्यार्थव्यवहितार्थपरा अस्ति अतः अर्थनिष्ठा भवतीति इदं ग्रन्थकर्तुस्तात्पर्यम्।

**विमर्शः-** विद्याधरः एकावल्यां लक्षणाङ्गीकाराय हेतुत्रयं स्वीचकार। तेनलक्ष्यार्थस्य प्रतिपादिका लक्षणेति चर्चिता। प्रतापरुद्रीये ग्रन्थे स लक्षणाम् अभ्युपेतुं केवलं तल्लक्षणमेव प्रस्तौति । तन्निमित्तकहेतून् तु न प्रतिपादयति। इदं स्पष्टमेव भाति यत् विद्याधरो लक्षणास्वीकाराय तस्याः स्वरूपं निमित्तघटकान् च प्रतिपादयितुं विशिष्यते। केवलम् लक्षणायाः स्वरूप-प्रतिपादनमेव विद्यानाथस्य अभीष्टमासीत्, न तु तस्याः स्पष्टमार्गनिर्धारणम्। अत उभयत्र अयं मतभदो दृश्यते। वृत्तीनां त्रैविध्यं तु उभाभ्यां विद्यानाथ-विद्याधराभ्यां स्व-स्वग्रन्थेषु प्रतिपादितमस्ति। गौणीवृत्तिविषयेऽपि ग्रन्थकारस्य विद्यानाथस्य तत्प्रभेदतया स्वीकारः वर्तते न तु तद्व्यतिरिक्ततया इदमेव कथनं विद्यनाथस्यापि सम्मतमेव। अनया रीत्या ग्रन्थकारोक्तलक्षणावृत्तिविषयकमतं

1. प्रताप.,पृ.२१

विवेचितम्।

**७. विश्वनाथमते लक्षणाशक्तिः**

कलिङ्गदेशभवः चतुर्दशभाषाविदः नारायणपण्डितस्य पौत्रः विश्वनाथः अभवत्। एतत्प्रणीताः अनेके प्रबन्धाः सन्ति। तत्र एतस्य साहित्यदर्पणः तादृगस्तियथा बाह्यसौन्दर्यालोकार्थदर्पणः इष्टः तथैव काव्य-शास्त्रपथे समग्रपदार्थप्रतिपत्त्यर्थम् एष प्रथतेतराम्। दशपरिच्छेदात्मकेग्रन्थे दृश्यश्रव्यकाव्ययोः उभयोः सम्यक्तया निरूपणञ्चक्रे। ग्रन्थेऽस्मिन् विश्वनाथेन स्वपूर्ववर्तिनां मम्मट्टभोजराजादीनां काव्यप्रमेयेषु मतानि तत्र तत्र उपपाद्यदोष-दर्शनपूर्वकं तदीयमतं निरस्य स्वीयमतं प्रास्तौत्। तेन काव्यतत्त्वजिज्ञासूनां सचेतसां कृते समीक्षाबुद्धिभैषजं प्रादीयत। अयं रसात्मकवाक्यस्य काव्यतां सर्वात्मना काव्यशास्त्रजगति अभिनवां दृष्टिं प्राकटयत्। एष परमसाहित्यिकः महद्वैयाकरणः भगवज्जगन्नाथस्य प्रसादात् स्वीयतर्कशैल्या काव्यशास्त्रजगत्यां प्राथत। द्वितीये परिच्छेदे वाक्यस्वरूपस्य निरूपणावसरे तद्घटकीभूतस्य पदस्य उपपादनपूर्वकं पदपदार्थयोः व्यापारावसरे शब्दशक्तिः निरूपिता। तत्र शब्दस्य विभागक्रमनिरूपणात् तदीयार्थान् च विभज्य 'अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मताः'[1] इत्युक्त्वा तेषामर्थानां शक्तिप्रतिपादनावसरे प्रथमम् अभिधावृत्तिमभिधायलक्षणाशक्तिं निरूपयितुं कारिकाम् अवतारयति दर्पणकारः। तद्यथा –

> मुख्यार्थबाधे तद्युक्तः ययान्योऽर्थः प्रतीयते।
> रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता[2] ॥

इति। मुख्यार्थस्य बाधे जाते रूढिप्रयोजनान्यतरत्वे सति तद्युक्तम् अर्थान्तरं यया शब्दशक्त्या बोध्यते सा लक्षणानाम्नीशक्तिः भवति। सा च शब्दे अर्पिता इति कारिकार्थः। ग्रन्थकारः अत्रप्रायः काव्यप्रकाशकारोक्तमतम् अनुसरन्निव प्रतीयते। मम्मटोक्तलक्षणावृत्तिस्वरूपपरिशीलनेन तदनु विश्वनाथोक्तलक्षणा-

---

1. सा.द. ल.,पृ.३१
2. सा.द. ल.,.,पृ.३५

लक्षणपरिशीलनेन ज्ञायते यत् मम्मटाचार्यस्य अभिमतमेव विश्वनाथाय अभीष्टमासीदितिकविराजो विश्वनाथोऽपि लक्षणावृत्तिं स्वीकर्तुं तन्निमित्तकोटौ तानेव हेतून् अकथयत्ते च क्रमशः १. मुख्यार्थबाधः २. रूढिप्रयोजनान्यतरत् इति। लक्षणन्तु **यया अन्योऽर्थः प्रतीयते सा लक्षणा** एतावदेव अवशिष्टपदानां तु अयं क्रमो भवति। **तद्युक्तः** इति पदं नार्थस्य विशेषणम्, न च लक्षणायाः हेतुघटकमिति तत्तु सामानाधिकरण्येन निरदिशि साहित्यदर्पण-कारेण। अर्पिता पदं तु शक्तेः विशेषणम्, मुख्यार्थबाधे, रूढिप्रयोजनाद्वासौ इति तु तस्या निमित्तकारके पदे स्तः।

उक्तकारिकायाः टीकाकारमतानुसारेण पर्यवसितोऽर्थः भवति। मुख्यार्थस्य अभिधेयार्थस्य बाधे, कीदृशे बाधे अनुपपत्तिग्रहणरूपे-वक्तृतात्पर्यविषयरूपे बाधे वा सति, रूढिहेतोः (अनादिवृद्धव्यवहारप्रसिद्धि-वशात्) प्रयोजनात्– उद्देश्यवशाद् वा अर्थात् रूढिप्रयोजनयोः द्वयोः कस्यचिदन्यतरस्य हेतोः सत्वे। यया शब्दशक्त्या तद्युक्तः मुख्यार्थसम्बन्ध-सहितः अन्यः मुख्यार्थतावच्छेदकातिरिक्त-धर्मावच्छिन्नोऽर्थः प्रतीयते बुध्यते असौ लक्षणा शक्तिः व्यपदिश्यते। तस्याः एका विशेषतापि उक्ता, सा अर्पिता शक्तिः। सा साक्षाद् अर्थनिष्ठा यतोहि मुख्यार्थव्यवधानमेव एतच्छक्तेः स्वीकाराय अपेक्षणीयम्। अतः मुख्यार्थव्यवधानसापेक्षा इयम् अर्थस्य शक्तिः। शब्दे च उपचारतः परम्परासम्बन्धेन आरोपणात् इयम् अर्पिता इति कथ्यते। मुख्यार्थव्यवहितोपस्थित्या लक्ष्यार्थविषयकत्वाद् अर्वाचीनैः विश्वनाथादिभिः शब्देषु कल्पिता इति तात्पर्यम्। उक्तलक्षणस्य सारः 'अभिधेयार्थान्वयानुपपत्तिग्रहत्वे सति रूढिप्रयोजनान्यतरप्रयोज्यमुख्यार्थसम्बन्धवत्तदतिरिक्तार्थ-प्रतिपादकशक्तित्वं लक्षणात्वम्'[1]इति।

उक्तलक्षणास्वरूपकारिकायां मुख्यार्थबाधः मुख्यार्थयोगः आद्ययोर्द्वयोः दण्डचक्रादिन्यायेन मिलितयोः कारणत्वम्। रूढिप्रयोजनयोस्तु तृणारणिमणिन्यायेन प्रत्येकमेव कारणत्वम्। मुख्यार्थबाधपदस्य प्रयोजनता

1. सा.द.ल..,पृ.३५

दर्श्यते **राजत्युमावल्लभः** इत्याद्युदाहरणे केवलव्यञ्जनावृत्तिबोध्ये गौरीवल्लभरूपान्यार्थे मुख्यार्थेन सह सादृश्यरूपसम्बन्धेन राज्ञः शङ्कर-सदृशासाधारणत्वप्रतिपादनरूपप्रयोजनवर्तनात् चेत्यतः तादृशोदाहरणे तत्प्रसक्तिनिवारणाय कारिकायां मुख्यार्थबाध इति पदमुपन्यस्तम्।

एवमेव 'तद्युक्तः' पदेन यथा 'वेदान् अध्यापयामास मूषिको बुद्धिमत्तरः' इत्यत्र मुख्यार्थान्वयानुपपत्तिग्रहणेन मूषिकस्य अलौकिकशक्ति-सम्पन्नत्वरूपप्रयोजनपरतया च लक्षणाशक्त्या मूषिकपदेन देवगुरु-बृहस्पत्यादिरूपस्यार्थप्रतीतावतिव्याप्तिं वारयितुं तत्पदं प्रायोजि। 'अन्योऽर्थः पदोपस्थापनेन पदाभिधानेन मुख्यार्थभिन्नोऽर्थः इत्यर्थोऽपि न समीचीनः'। यतो हि तादृशार्थगम्येन तु 'कदली-कदली' इत्यत्र द्वितीयकदलीपदेन जाड्यादि-गुणविशिष्टकदलीबोधेऽपि तत्र कदलीप्रतियोगिकभेदस्य अभावाद् अव्याप्तिः जायते अस्माद्धेतोः तद्वारणाय तत्र शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नार्थः मन्तव्यः। तथा सति अत्र शक्यतावच्छेदकधर्मः कदलीत्वं तदतिरिक्तधर्मो जाड्यम् तदवच्छिन्नार्थकबोधात् न अव्याप्तम् इति ग्रन्थकारस्य कारिकाशयः अङ्गीकार्यः। ग्रन्थकारः रूढिप्रयोजनयोः द्वयोः स्पष्टतां कुर्वन् एकैकम् उदाहरणं प्रस्तौति।

'कलिङ्गः साहसिकः' इत्यत्र कलिङ्गशब्दो देशविशेषवाचकः कलिङ्गः – (जगन्नाथपुरीतः पूर्वभागस्थः कृष्णानदीतीरात् उत्तरभागस्थः विख्यातो देशः) अधुना उत्कलदेशान्तर्गतः 'गञ्चाम्' इति नाम्ना प्रसिद्धः। 'कलिङ्गः साहासिकः' इत्युदाहरणे कलिङ्गशब्दस्य अभिधाशक्तिः देशविशेषरूपार्थे अस्ति। 'साहसिकः' इति पदस्य अभिधा दुष्करकार्य-कारिरूपार्थे। उक्तञ्च 'साहसं' तु दमे दुष्करकर्मणि इति अमरकोशात्। इति द्वयोः पदयोः परस्परं सम्बन्धविरहात् अन्वयानुपपत्तिरूपा बाधा वर्तते। अत्र कलिङ्गः इति शब्दस्य देशविशेषरूपार्थस्य स्वार्थस्य अचेतनतया साहसकित्वम् कथमिति तादृशार्थबाधसम्भवात्। कलिङ्गपदस्य साहसिकपदेन सह अन्वयानुपपत्तिरूपार्थस्य बाधानन्तरं लक्षणया कलिङ्गशब्दः स्वेन अभिधेयार्थेन सह संयोगसम्बन्धतः पुरुषादीन् कथयतीति ततःतादृशं स्थलं

रूढिवेद्यम्। प्रयोजनस्य उदाहरणं – 'गङ्गायां घोषः' इत्यादौ गङ्गापदस्य अभिधाजलप्रवाहरूपार्थेघोषपदस्य चआभीरपल्लीयादववसतिरूपविशेषार्थे। वक्तृतात्पर्यानुपत्तिवशात् अन्वयानुपत्तिवशात् वा गङ्गाघोषयोः आधाराधेय-सम्बन्धस्य अनुपपन्नतया गङ्गापदार्थस्यप्रवाहस्य बाधानन्तरं लक्षणावृत्त्या बाधितार्थस्य सामीप्यादिसम्बन्धवता तटादिरूपार्थेन सह अन्वयम् उपस्थायगङ्गातटे घोषः इति प्रतिपाद्यते। प्रयोजनं च शैत्यपावनत्वाद्यतिशयस्य ज्ञानं लक्षणाव्यतिरिक्तया व्यञ्जनाशक्त्या एव गम्यते। वृत्तौ ग्रन्थकारः वैयाकरणमीमांसकयोः मते 'स्वाभाविकेतरा' इति कथयति।। शब्दस्य स्वाभाविकः अभिधा-व्यापारः इति तत्सिद्धान्तानुरोधात्। तथा चाहुः – 'शब्देनोच्चार्यमाणेन सहजं यत् प्रतीयते। तस्य शब्दस्य तद्वस्तु ज्ञायतामर्थ-संज्ञया। तथा च स्वाभाविकेतरा शब्दस्य स्वाभाविकव्यापारादभिधा-व्यापारभिन्ना सा च ईश्वरानुद्भाविता'। न्यायमते अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिः। तथा च ईश्वरेण अनुभाविता अनुत्थापिताइति।

'रूढेः प्रयोजनाद्वा' इति कारिकोक्तहेतोः लक्षणाप्रवेशे काआवश्यकता ?इति प्रश्ने आह ग्रन्थकारः–रूढिप्रयोजनरूपहेतुं विनापि सम्बन्धिनो मुख्यार्थेन सह सम्बन्धवत्तया लक्षणे लक्षणया बोध्यते। तेन अतिप्रसङ्गस्य अतिव्याप्तिः भवति। तथा च 'रूढेः प्रयोजनाद्वा' इत्यस्य कारिकायाम्उपन्यासेन 'कमले चरणाघातं मुखं सुमुखि! तेऽकरोत्' इत्यत्र रूढिप्रयोजनयोः द्वयोः अभावेऽपि चरणाघातपदेन लक्षणावृत्त्या निर्जिततत्वबोधनतया अतिव्याप्तिप्रसङ्गः भवेत्। एवं रीत्यालक्षणया इदं लक्ष्यमेवन अवधेयम् इत्यतः एवात्र शक्तिहीनकविना लक्षणाप्रयोगादेव नेयार्थदोषताऽस्तीति दोषप्रकरणेव्याख्याता। ग्रन्थकारः तत्रैव प्राचां मम्मट्टादीनां रूढिविषयकमुदाहरणम् आक्षिपति।

मम्मटादयः 'कर्मणि कुशलः' इति रूढौ उदाहरन्ति। तेषामयमभिप्रायः-कुशान् लातीति कुशग्राहिरूपो व्युत्पत्तिलभ्यः मुख्योऽर्थःप्रकृतेऽसम्भवन् विवेचकत्वादिसाधर्म्यसम्बन्ध-सम्बन्धिनि दक्षरूपार्थे पर्यवस्यति। एवमुक्ते सति तदन्ये (इति कथनेन स्वीयासम्मतिं प्रकटयति) न मन्यन्ते। कोशादिग्रन्थानुरोधात् व्युत्पत्तिलभ्यकुशग्राहिरूपार्थस्य मुख्यार्थत्वात्। यदि स अर्थः न स्वीक्रियते

तर्हि 'गौः शेते' इत्यादिवाक्यान्यपि लक्षणाप्रसङ्गगतानि स्युः। तथाहि- "गमेर्डोः" इति औणादिकसूत्रेणगम्लृधातोः डोप्रत्ययेनगच्छतीत्यर्थे गौरिति शब्दो निष्पद्यते। तस्य शयनवेलायां गमनकर्तृत्वरूपमुख्यार्थबाधेलक्षणास्यात्। तन्न, तस्य कोशादिग्रन्थाम्नातत्वात् अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम् अन्यच्च प्रवृत्तिनिमित्तम् इति नियमात्शब्दस्य व्युत्पत्तिनिमित्तकः अर्थः गमनकर्तृत्वरूपः, वृत्तिनिमित्तकः च गोत्वरूपः इति। शब्दानां व्युत्पत्ति-निमित्तमेव प्रवृत्तिनिमित्तम् इति नास्ति नियमः। अतः प्रागालङ्कारिकैः स्वीकृतमुदाहरणं रूढेः प्रकरणे न सम्यग्भातीति विश्वनाथस्याशयः।

**श्रीकृष्णकविसम्मतलक्षणास्वरूपम्**

मन्दारमरन्दचम्पूकाव्यस्य लेखकः श्रीकृष्णो विद्यते। इदं काव्यं केवलं चम्पूकाव्यपरमस्ति इति न शङ्कनीयम्। रसच्छन्दोऽलङ्कार-गुण-शब्दार्थ-दोष-विषयाणां नाट्यतत्त्वानां प्रतिपाद्यत्वात् इदं काव्यशास्त्रे परिगण्यते। ग्रन्थोऽयं सङ्ग्रहात्मकशैल्यां विरचित इव भासते। काव्यकारेण प्राचां काव्यतत्त्वविदामेव यथोक्तलक्षणं स्वकारिकासु उपनिबद्धम्, क्वचिच्च स्वीयलक्षणमपि उपपादितम्। कविना ग्रन्थः एकादशसु बिन्दुषु विभक्तः। तत्रैव ग्रन्थकार एकादशे शेषनामाख्यबिन्दौलक्षणाप्रकरणे लक्षणाम्निरूपयामास-

तात्पर्यविषयीभूतार्थान्वयानुपपत्तितः।<br>
शक्यभिन्नार्थधीहेतुर्व्यापारो लक्षणेष्यते[1] ॥

इति लक्षयति। तात्पर्यविषयीभूतो योऽर्थस्तस्य शक्यार्थस्य अन्वयानुपपन्ने सति, शक्यार्थात् भिन्नार्थस्य प्रतिपत्तयेव्यापारः एवलक्षणावृत्तिः इत्याशयः।

उदाहरणम्– 'काकेभ्यो दधि रक्ष्यतामि'त्यत्र इति कस्यचन स्वामिनः इदं वाक्यं श्रुत्वा तदीयो भृत्यः स्वामिनोक्तादेशं परिपालयितुं दधिरक्षाकार्ये प्रवृत्तः। काकद्वारा रक्षणरूपकार्यमिति वाक्यार्थः काकपदस्य मुख्यार्थः अबाधितः अस्ति अन्वयस्य उपपन्नत्वात् तद्भावेऽपि दधिरक्षणकार्यं भवितुमर्हति। किन्तु वक्त्रा प्रयुक्तस्य वाक्यस्य आशयमधिगच्छन् रक्षिता

1. म.म.च., शे.बि.,पृ.१७८

काकपदस्यसर्वोऽपि दध्युच्छिष्टकारी इत्यर्थं गृह्यते। वक्तुः तात्पर्यविषयीभूतार्थस्य वाच्यार्थस्य काकमात्रपदस्य अनुपपन्नतया लक्षणावृत्त्या शक्यार्थात् भिन्नार्थः काकसहितदध्युपघातकमार्जारशुनकविशेषरूपार्थः बोध्यते। तत्र लक्षणाव्यापार एव लक्षणा भवति। अर्थो भवति दध्युपधातकेभ्यः सर्वेभ्यः प्राणिभ्यः शुनकादिभ्यो दधिरक्षणरूपकार्यं कार्यमिति। तत्र वक्तुः तात्पर्यमस्ति तथैव गङ्गायां घोषः इत्यत्र गङ्गापदार्थे जलप्रवाहे घोषस्य अनवस्थानात् वक्तुः तात्पर्यविषयीभूतार्थसिद्ध्यर्थं वाच्यार्थाद् भिन्नार्थं तटार्थं गृहीत्वा गङ्गायास्तटे घोष इति अर्थं स्वीकृत्य वक्तुः प्रयोजनतः शैत्यपावनत्वाद्यतिशयार्थः सिद्ध्यते। इत्थं ग्रन्थकारेण लक्षणा विवेचिता।

## २१. धर्मसूरिमते लक्षणाशक्तिः

जैनाचार्यः धर्मसूरिःकाव्यशास्त्रीयतत्त्वानि विवेचयितुं साहित्यरत्नाकर इत्येकं ग्रन्थं व्यरीरचत्। तत्र सः लक्षणावृत्तिनिरूपणात् प्राक्लक्षकशब्दं निरूपयति। यथा-

योऽर्थं लक्षणया शब्दो बोधयेल्लक्षको ह्यसौ।[1] इति। तृतीयकक्षागतेनलक्षणाव्यापारेण शब्दात् यस्यार्थस्य बोधो जायते तद्बोधकः शब्दः लक्षक इति। 'समुद्रे पुरी' इत्यादौ वाच्यार्थस्य अनुपपत्तिवशात् 'समुद्रतटे' इति लक्षणया योऽर्थः प्रत्याय्यते तत्प्रतिपादकशब्दो लक्षको भवति। तस्मादर्थस्यापि लक्षकघटितया लक्ष्यः इति। लक्षकलाक्षणिकौ उभावपि शब्दौ प्रत्ययभेदेऽपि (ण्वुल्, ठक्) समानार्थकौ स्तः। शब्दो हि अर्थस्य प्रतिपादकः परं शक्तिवैशिष्ट्यात् शब्दस्य तत्र शक्तिता। इतिलक्षणया लक्षकस्य लक्ष्यार्थः बोध्यते। अमुमेव विषयं वृत्तौ ग्रन्थकारः स्पष्टयति। 'लक्षणयाऽर्थप्रतिपादकः शब्दो लाक्षणिक' इति लक्षणार्थः काव्यशास्त्रजगति प्रायः लक्षणास्वरूपम् अवलोक्यते। समानपक्षधरो धर्मसूरिःलक्षणां निरूपयति –

---

1. सा.र., पृ. २०८

वाच्यार्थबाधे तद्योगे रूढितो वा प्रयोजनात्।
यथाऽन्यं बोधयेच्छब्दो व्यापृत्या साऽस्य लक्षणा[1]॥

इति। वाच्यार्थबाधे अभिधाशक्तिद्वारा जागरितमुख्यार्थस्य अन्वयानुपपत्तौ तद्योगे तन्मुख्यार्थाविनाभूतसम्बन्धे रूढिविशेषात् प्रयोजन-विशेषात् वा शब्दः यथा व्यापृत्या शक्त्या अन्वयसङ्गतये यम् अप्रधानीभूतम् अर्थं लक्षयति ज्ञापयति सा लक्षणा तृतीयकक्षारूढा शक्तिरिति कारिकार्थः। सा शब्दस्यारोपितशक्तिरिति। वस्तुतः तद्योगे तन्मुख्यार्थयोगे इति अर्थसमाश्रयेण व्यापारोऽयं तथाभूते शब्दे आरोप्यते इति न विरोधः। तस्मात् कारणात् लक्षणा इयमारोपितः शब्दव्यापार इति युक्तोऽस्य निष्कर्षः।

**अप्पय्यदीक्षितमते लक्षणाशक्तिः**

अप्पय्यदीक्षितस्य काव्यशास्त्रे त्रयो ग्रन्थाः प्राप्यन्ते। ते च वृत्तिवार्तिकम् चित्रमीमांसा कुवलयानन्दश्चेति। तत्र चित्रमीमांसा कुवलया-नन्दश्चद्वावपि ग्रन्थौ अलङ्कारपरकौ। वृत्तिवार्तिकं तु शब्दशक्तिनिरूपणपरम्। दीक्षितवर्यः परिच्छेदत्रयात्मके वृत्तिवार्तिकाख्ये ग्रन्थे द्वितीये परिच्छेदे लक्षणां विवेचयितुम् उपाक्राम्यत्। यथा –

'सा च मुख्यार्थसम्बन्धेन शब्दस्य प्रतिपादकत्वम्[2]' इति। बाधितार्थस्य मुख्यार्थस्य अन्यार्थेन सह सम्बन्धस्य प्रतिपादकः **शब्दः** तेन लाक्षणिकेन शब्देन सम्बन्धितार्थः भवतितत्प्रतिपादनेशब्दस्य प्रतिपादकत्वम् एव लक्षणा इत्याशयः। तन्निष्ठं यत्प्रतिपादकत्वमिति नोक्तं किमर्थम्? यतोहि शब्दस्य प्रतिपादकत्वम् तु अभिधाव्यञ्जनयोः स्थलेऽपि वर्तते। तत्र लक्षणापत्तिं निराकर्तुं 'मुख्यार्थसम्बन्ध' इति विशेषणपदं लक्षणे समावेशितम्। साक्षात्सङ्केतितार्थस्य अभिधायके शब्दे प्रतिपादकत्वात्। तत्प्रतिपादकत्वं शब्दसामान्ये वर्तते न तु विशिष्टे। अतः लक्षणायाः स्थलं निश्चेतुं ग्रन्थकारस्य आशयः मुख्यार्थस्य वाच्यार्थस्य सम्बन्धेन (सामीप्यादिसम्बन्धद्वारा)

---

1. सा.रा. पृ.२०९
2. वृ.वा.,पृ.

अन्यार्थस्य लक्ष्यार्थस्य शब्दप्रतिपादकत्वं सा लक्षणा। तत्सादृश्येन प्रतिपादकत्वरूपा गौण्यपि लक्षणाप्रभेदे एव तत्सदृशेऽपि तन्निरूपित-सादृश्याधिकरणत्वपरम्परासम्बन्धसत्वात्। नहि साक्षात्सम्बन्धे विशिष्ट-बुद्धियोग्यसम्बन्धे वा सत्येव लक्षणा इति नियमः। चक्षुरादेर्घटनेत्यादिषु संयुक्तसमवायादिवद्विशिष्टबुद्धियोगस्य परम्परासम्बन्धस्यापि प्रत्यासत्तित्वो-पपत्तेः व्यतिरेकलक्षणास्थले तन्निरूपितविरोधाधिकरणत्वादिपरम्परासम्बन्ध-मात्रेण तादृशेन लक्षणाप्रसक्तिः। एतेन सादृश्यं न सम्बन्ध इति गौणीलक्षणातो भिन्नो विशिष्टधीयोग्य एवसम्बन्ध उक्तः। संयोगे सति 'दण्डी देवदत्तः' एतावत् सादृश्ये 'सिंहवान् देवदत्तः' इति विशिष्टबुद्धेरदर्शनात् इति निरस्तम्। विशिष्टबुद्धिनियामकपरम्परा सम्बन्धमात्रस्य प्रत्यासत्तित्वोपपत्तेस्तावता लक्षणाप्रसक्तिः।

तस्मात् सादृश्यगर्भतदन्यसम्बन्धनिमित्ततया गौणी शुद्धा चेति लक्षणणाया एव उभौ भेदौ वर्तेते।

**पण्डितराजजगन्नाथमते लक्षणाशक्तिः**

अयं तैलङ्गजनपदस्यराजमहेन्द्रप्रान्ताभिजनः वाराणस्यां वसतिं चकार।

लक्ष्मीपेरुभट्टयोः दम्पत्योः पुत्र आसीत्। एषः सर्वशास्त्रविशारदात् सर्वविद्याधरात् स्वपितुः अखिलविद्यामधिगतः[1]। एष तात्कालिकदेहल्याः शाहजहांनरेशस्य पुत्रं दाराशिकोहं संस्कृतं पाठयितुं नियुक्त आसीत्। एष तत एव पण्डितराजः इत्युपाधिमलभत। असौ परमदार्शनिकः आलङ्कारिकः शास्त्रान्तरपारङ्गतश्चासीत्। एष बहून् प्रबन्धान् व्यरीरचत्। एष लब्धप्रतिष्ठः अगाधप्रातिभसम्पन्नः आसीत्। असौ समकालिकस्य अप्पय्यदीक्षितादेः ग्रन्थविरोधाय अनेकान् ग्रन्थान् लिलेख। तत्र अलङ्कारशास्त्रे अत्यन्तं सुप्रसिद्धं मणिरूपं रसगङ्गाधरनामानं ग्रन्थं विविधालङ्कारग्रन्थानां निकषायमाणं व्यरीरचत्। एतद्रचितस्य रसगङ्गाधरस्य अलङ्कारशास्त्रस्य

---

1. रस.,पृ.०३

काव्यशास्त्रीय- तत्त्वनिरूपणस्य न्यायशैली लसति। सा काव्यतत्त्वनिरूपणशैली अत्यन्तं प्रखरा प्रौढा च लक्ष्यते। जगन्नाथः अनेकेषाम् आलङ्कारिकाणां मम्मट-विश्वनाथ-अप्पय्यदीक्षितादीनां चप्रबन्धे यत्र तत्र खण्डनं व्यधात्। अथ चायं क्वचित् नूतनपरिपाटीमपि आनीतवान्। तेन रसः संलक्ष्यक्रमव्यङ्ग्यध्वनौ निवेशितः। काव्यपदप्रवृत्तिनिवृत्तिता च शब्दार्थुगलापेक्षया शब्दस्येव व्यासज्यवृत्त्या अङ्गीकृता। एवं रसगङ्गधरस्य ग्रन्थस्य काव्यशास्त्रदृष्ट्या अतीव महीयस्त्वं वरीवर्ति। रसगङ्गाधरस्योपरि नागेशभट्टग्रथिता गुरुमर्म-प्रकाशनाम्नी टीका अत्यन्तमुपादेया विद्यते। रसगङ्गाधरग्रन्थः अधुना अपूर्णः एव समुपलभ्यते। अद्यतने ग्रन्थे द्वे आनने स्तः। तत्र प्रथमानने ध्वनिं द्विधा विभज्य ततः अभिधामूलः लक्षणामूलः इति भेदः कृतः। तत्रापि अभिधामूलः त्रिविधः रस-वस्तु-अलङ्काराः इति, लक्षणामूलध्वनेः अर्थान्तरसङ्क्रमित-वाच्यः अत्यन्ततिरस्कृतवाच्यः इति भेदद्वयम् अकरोत्। ग्रन्थकारः द्वितीयानने लक्षणामूलध्वनिनिरूपणावसरे शब्दशक्तिं प्रपञ्चयति। तत्र प्रथमन्तावत् अभिधाशक्तिं लक्षयित्वा ततस्तस्या अवान्तरभेदान् निरूप्य वाचकशब्दं, तस्यार्थं, शास्त्रान्तरे सङ्केतितार्थम् अभिधाय लक्षणाशक्तिपदार्म् उपपादयति। अथ केयं लक्षणा, यन्मूलश्चरमं निरूपितो ध्वनिः। इति प्रतिज्ञावाक्यं कथयित्वा तल्लक्षणम् करोति-

'शक्यसम्बन्धो लक्षणा[1]' इति। अर्थात् शक्यार्थस्य सम्बन्धः लक्षणा इति।

सम्बन्धश्च द्विष्ठः तस्य कश्चन प्रतियोगी, कश्चिच्चानुयोगी। तत्र विशेषणपदार्थः प्रतियोगी, विशेष्यपदार्थः अनुयोगी। तस्मात् कारणात् शक्यार्थः वाच्यार्थापरपर्यायः प्रतियोगीलक्ष्यार्थश्च अनुयोगी। ततः शक्यार्थप्रतियोगिकः लक्ष्यार्थानुयोगिकः सम्बन्धविशेषो लक्षणा। एवंविधे वाक्ये सति लक्षणावृत्तिज्ञाने लक्ष्यार्थज्ञानम्, लक्ष्यार्थज्ञाने च लक्षणाज्ञानमपेक्ष्यते इत्यतः

1. रस., द्वि.आ.,पृ.१६२

अन्योन्याश्रयदोष उपपद्यते। अतो यत्किञ्चित् शक्यार्थप्रतियोगिको यत्किञ्चिदर्थानुयोगिकः सम्बन्धो लक्षणा इति फलितार्थः।

**जगन्नाथःलक्षणायाः बीजं निर्वक्ति-**

लक्षणया शक्त्या प्रतिपादितस्य अर्थस्यावबोधने अन्वयानुपपत्तिः तात्पर्यानुपत्तिः इति लक्षणायाः बीजतया मतद्वयं युक्त्या उपस्थापयन्ब्रवीति- "गङ्गायां घोषः" इत्यादौ लक्षणायां गङ्गापदार्थः जलप्रवाहविशेषः मुख्यार्थता गङ्गायां, तस्या अवच्छेदकं गङ्गात्वं तत्र तात्पर्यविषयः अन्वयः आधाराधेयभावः, घोषनिष्ठा आधेयता, अन्वयी तटः, अन्वयिता तटे, अन्वयितायाः अवच्छेदकम् तटत्वं स्यात् न गङ्गात्वम्। अतो गङ्गात्वे तात्पर्यविषयान्वयिताऽवच्छेदकताया अभावः अस्ति। अस्मात् लक्षणा विधीयते इति वक्तुं न शक्यम्। गङ्गात्वरूपेण लक्ष्यार्थे तीरे प्रतीतेः सत्वात्। तथा च अन्वयिताऽवच्छेदकस्य गङ्गात्वस्य तटे अभावो नास्ति। प्रत्युत तात्पर्यविषयभूतान्वये आधाराधेयभावे गङ्गात्वेन रूपेण गङ्गापदस्य मुख्यार्थः प्रवाहः प्रतियोगी न भवति, अपि तु गङ्गात्वरूपात् तटः प्रतियोगी अस्ति। अस्माद् वाच्यार्थे प्रतियोगिता नास्ति, एवं मुख्यार्थतावच्छेदके मुख्यार्थप्रतियोगिताया अभावः, रूढिप्रयोजनयोः अन्यतरत् च कारणम्। मुख्यार्थप्रतियोगिकताया विरहः इत्युक्ते 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकस्य अन्वयसत्वात् लक्षणाप्रवृत्त्यभावः। अपितु दध्युपघातकतया तत्र अन्वयः जायते। अतः तत्र लक्षणाया अवसरः। एवमेव 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्'[1] अत्रापि नक्षत्रम् इत्यस्य नक्षत्रत्वरूपेण अन्वयः नोद्भवति प्रत्युत रात्रित्वेन अन्वय उपपद्यते। मुख्यार्थान्वयानुपपत्तिः लक्षणाबीजत्वेन स्वीक्रियते चेत् 'काकेभ्यो दधि रक्ष्यताम्' 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इत्यादिवाक्येषु लक्षणा न स्यात्। काकदले दध्युच्छिष्टकारित्वात् काकादिसहितेभ्यो दध्नः रक्षणकार्ये इति वक्तृतात्पर्यात्। एवमेव द्वितीयोदाहरणे अन्वयानुपपत्तेः अविद्यमानात्। लक्षणाबीजत्वेन तात्पर्यानुपपत्तेः स्वीकारेन केवलं काकेभ्यो

1. तत्रैव द्वि.आ.,पृ.१६३

दधिरक्षणे न चकेवलनक्षत्रावभासितरात्रिं दृष्ट्वा इति कथयितुस्तात्पर्यम्, किन्तु दध्युच्छिष्टविधायिमात्रेभ्यः मार्जारादिभ्योऽपि दधिरक्षायाम्, एवमेव केवल-रात्रिसमये तात्पर्यात् तयोः अवबोधाभावात् लक्षणावृत्तिः अङ्गीक्रियते। 'दध्युपघातकजन्यनाशोत्पत्तिप्रतियोगिकत्वतत्कर्तृकव्यापारप्रयोज्याभाववद् दधि' इति बोधो जायते मेघाच्छन्ननक्षत्रविहीन-नक्षत्रसंयुक्तोभयकेवलरात्रि-दर्शन-कर्मकवाक्प्रसरणव्यापार इति बोध इति उक्त्वा ग्रन्थकर्त्रा उक्तलक्षणे सम्बन्धस्य स्थलभेदाः क्रियन्ते-'गङ्गायां घोषः' इत्यत्र गङ्गायाः घोषस्य चसम्बन्धः सामीप्यम्, 'मुखचन्द्रः' इत्यत्रमुखस्य चन्द्रस्य च सम्बन्धः सादृश्यम्, 'उपकृतं बहु तत्र किमुच्यते' इत्यादौ विपरीतलक्षणायाम् उपकारिणः अपकार्यस्य च सम्बन्धः विरोधः, 'आयुर्घृतम्' इत्यत्र आयुषः घृतस्य च सम्बन्धः कार्यकारणभावः इत्यादयः सम्बन्धा यथायोगम् अनेकविधा जायन्ते[1]। अनया रीत्या पण्डितराजोजगन्नाथो लक्षणावृत्तेः न्यायसिद्धान्तानुसारं स्वरूपं स्वप्रबन्धे रसगङ्गाधरनामाख्यस्य द्वितीये आनने प्रत्यपादयत्। तत्र लक्षणायाः बीजतया मतान्तरमपि तेन प्रस्तुतम् इति अस्माभिः अधिगतम्।

## १४. कर्णपूरमते लक्षणाशक्तिः

एषः गौडसम्प्रदायस्य प्रवर्तकस्य चैतन्यमहाप्रभोः प्रमुखशिष्येषु रूपगोस्वामिसनातनगोस्वामि-जीवगोस्वामिशिवानन्देषु शिवानन्दस्य पुत्रः परमानन्ददासः इति नामा कविकर्णपूरनाम्ना प्रथितः अभवत्। अयं गौडसम्प्रदायानुयायी आसीत्। एतस्य काव्यशास्त्रीयो ग्रन्थः अलङ्कार-कौस्तुभः वर्तते। अस्मिन् दशकिरणयुते ग्रन्थे द्वितीयकिरणे शब्दशक्तिर्विवेचिता। शक्यार्थस्य अन्यार्थेन सह सम्बन्धमात्रत्वमेव लक्षणामुद्घोषयन्तीति नैयायिकाः। मम्मटोत्तरवर्तिनः सर्वेऽपि आलङ्कारिका मम्मटस्य अभिप्रायं कवलीकृत्य स्वग्रन्थप्रणयनाय प्रवृत्ताः अभवन्। केचन च मम्मटजगन्नाथयोः लक्षणावृत्ति-विषयकमते सामञ्जस्यं मन्वते। परं कविकर्णपूरः मम्मटमतानुयायी लक्ष्यते। स

1. तत्रैव, पृ.१६४-१६५

अलङ्कारकौस्तुभे वृत्तित्रयं मन्वानः ग्रन्थस्य द्वितीये किरणे अभिधां निरूप्य लक्षणावृत्तिं प्रतिपादयति। तद्यथा–

मुख्यार्थबाधे शक्यस्य सम्बन्धे यान्यधीर्भवेत्।
रूढ्या प्रयोजनेनापिउक्ता सा द्विधा मता[1] ॥

इति। लक्षणेन वाच्यार्थबाधानन्तरं तस्य सम्बन्धे अन्यार्थस्य ज्ञानमेव लक्षणा इति कारिकायाः आशयः। कारिकापरिशीलनेन ज्ञायते यत् लक्षणास्वरूपम् 'अन्यधीः' इत्येवग्रन्थकर्त्रे अभिप्रेतम्। लक्षणे अव्याप्त्यति-व्याप्तिदोषम् अपाकर्तुं मुख्यार्थबाधे सम्बन्धे इति द्वयं तद्धेतुत्वेन अङ्गीकृतम्। अनयोः द्वयोः मुख्यार्थबाध-तत्सम्बन्धयोः उपपद्यमानयोः सतोरेव लक्षणायाः अवसरो भवतीति मे भाति। तत्र रूढिः प्रयोजनमिति द्वयोरपि पदयोः अत्र हेतुतया समावेशः नास्ति, अपि तु तयोः अत्र लक्षणाप्रकारतया उल्लेखात्। रूढिमुखात् प्रयोजनमुखात् लक्षणाया द्वैविध्यं ग्रन्थकारेण उक्तम्।

**विमर्शः** प्रायशः मम्मटविश्वनाथहेमचन्द्रादिभिः लक्षणलक्षणायां निर्दिष्टे त एव अंशाः अलङ्कारकौस्तुभे अनेन गृहीताः। पूर्वाचार्याणां मते रूढिप्रयोजनयोः अन्यतरस्य स्वीकृतिः तृतीयहेतुत्वेन इष्टा, न तु तद्विभागतया। किन्तु एतन्मते रूढिप्रयोजनयोः हेतुताम् मत्वा तद्द्वारा लक्षणाया भेदा विभक्ताः इति सूक्ष्मभेदः। किन्तु एतत्कृतलक्षणे पूर्वाचार्योक्तमुख्यार्थबाधादीनां त्रयाणां सन्निवेशः अस्तीति समानता। एतदुक्तलक्षणे तेषां तत्त्वानां महत्त्वम्-अन्यपदार्थविषयकबोधधीः, स्खलितार्थस्य लक्ष्यार्थेन सह बोधनरूपा धीः, तादृशधीजनकशक्यसम्बन्धो लक्षणेति पर्यवसितार्थः।

ग्रन्थकारो लक्षणमभिधाय तत्रागतान् आक्षेपान् समालोच्य लक्षणावृत्तेः आस्पदं निश्चिनोति-'गङ्गायां घोषः' इत्यत्र कश्चन विचारः गङ्गायाः जलप्रवाहार्थे बोधतया घोषान्वयाभावात् घोषशब्दस्य आभीर-पल्लीविशेषार्थतया ततः प्रतिवसति इति वचनात् गङ्गाशब्दो वा स्वसम्बन्धितटमपेक्षते। घोषशब्दोऽपि स्वसम्बन्धिनः प्रतिबिम्बम् अभिदधाति।

---

1. अ.कौ.,द्वि.कि.,का.२०, पृ.४२-४३

उभयत्र लक्षणाव्यवहारः सम्भाव्यते तत्र प्रयोजनमेव लक्षणास्पदम्। तस्य शैत्यपावनत्वादिकमेव प्रयोजनम्। यदि च गङ्गाशब्दः स्वीयप्रतिबिम्बं लक्षयति तदापि घोषस्य तत्तीरनिकटतातिशयप्रतिपादनेन तदेव तीरगतं शैत्यपावनत्वादिकम् अधिकञ्च गङ्गोदकस्य स्वच्छत्वं प्रतीयते। तेन अधिकप्रयोजनलाभे घोषशब्दे एव लाक्षणिकव्यवहारः इति केषाञ्चन मतम्। पुनश्च अगोविषयकशाब्दबोधानुपपत्तेः तत्र शक्तिज्ञानाभावेन पदजन्यपदार्थोपस्थितेरभावात् अयं दोषस्तु सामान्यलक्षणस्य प्रत्यासत्तित्वास्वीकारपक्षे एव बोध्यः। पुनः प्रश्नो भवति – जातौ शक्तिस्वीकारे व्यक्तिज्ञानराहित्येन कथं तत्तद्व्यक्तिविषयकव्यवहारः सिद्ध्येत् इत्यागता शङ्का समाधीयते-जात्याश्रितव्यक्तावेव व्यवहार इत्यनेन। जातौ एव शक्तिं स्वीकुर्वतां मते व्यक्तिभासनार्थः व्यक्तौ लक्षणया न अभ्युपगन्तव्यः व्यक्तिज्ञानं तु आक्षेपादेव। अविनाभावो व्याप्तिः तथा च व्यक्तिभानं विना जातिभानम् अनुपपन्नम् अतो यत्रयत्र जातिभानं तत्र तत्र व्यक्तिभानम् इति व्यक्तिज्ञानादेव शाब्दबोधे जातिभानमिति। गङ्गायां घोष इत्यादौ – गङ्गापदे लक्षणास्वीकारापेक्षया घोषपदे लक्षणास्वीकारेण गङ्गायां घोषः इत्यत्र अतिस्वच्छत्वप्रतीतिसत्वात्। अतः अधिकप्रयोजनलाभेन घोषपदस्यैव लक्षणोचिता इत्यन्येषां मतम्। इमं विचारमपि दूषयितुं ग्रन्थकारः युक्तीः उपस्थापयति। 'तम् आनय' इत्युक्ते सति तत्पदेन घोषपदार्थस्य प्रतिबिम्बस्य बोधस्वीकारे तस्यानयनस्यासम्भवात् गङ्गापदस्यैव तीरे लक्षणा वदनीया। घोषस्य तु आभीरपल्ल्यां शक्तिरेवातः तदानयनं सङ्गिरते इति निश्चिन्वन् गङ्गापदसमभिव्याहारं विना केवलं घोषस्य प्रतिवासः तमानयेत्युक्ते मुख्यार्थस्य बाधाभावे न लक्षणाया अवकाशः परन्तु गङ्गापदप्रयोगादेव मुख्यार्थबाधः अतश्च गङ्गापदे एव लक्षणेति उत्पद्यते। इयमेव जहत्स्वार्था कथ्यते। जहत्स्वार्था – जहत् त्यजन् स्वार्थः यस्यां सा। तादृशं गङ्गारूपार्थं विहाय गङ्गाशब्द एव लाक्षणिको न तु घोष इति। अनया रीत्या ग्रन्थकृता लक्षणा सविशदं निरूपिता।

**श्रीबालकृष्णभट्टमते लक्षणाशक्तिः**

अयमाचार्यः स्वीये अलङ्कारसारग्रन्थे लक्षणानिरूपणावसरे आह

यत् स्वस्य लाक्षणिकशब्दस्य शक्यार्थस्य सम्बन्ध एव लक्षणा। उक्तञ्च-लक्षणास्वशक्यसम्बन्धः[1] इति। इयंपरिभाषा ग्रन्थकारेण न्यायसम्मतशैल्या विहिता[2]।

**विश्वेश्वरपण्डितमते लक्षणाशक्तिः**

विश्वेश्वरनाम्ना अन्येऽपि आलङ्कारिका अभूवन्। एष विश्वेश्वर-पण्डितनाम्ना काव्यशास्त्रे अप्रथत। एतस्य काव्यशास्त्रे रसचन्द्रिकाख्यः एक एव प्रबन्धः उपलब्धो भवति। तत्र सः लक्षणायाः स्वरूपं निरधारयत्। शक्यार्थस्य अन्यार्थेन सार्द्धं सम्बन्ध एव लक्षणा इति। यथा-**शक्यसम्बन्धो लक्षणा**[3]।

**श्रीभूदेवशुक्लमते लक्षणाशक्तिः**

रसविलासनामके स्वग्रन्थे अयं लक्षणायाः सुस्पष्टं लक्षणम् अकरोत्-शक्यसम्बन्धेनाऽशक्यार्थप्रतिपादकत्वं शब्दनिष्ठं लक्षणा[4] अर्थात्मुख्यार्थस्य सम्बन्धात्लाक्षणिकशब्दगतं लक्ष्यार्थबोधकत्वं लक्षणेति उच्यते।

**विश्वनाथदेवमते लक्षणाशक्तिः**

विश्वनाथदेवः लक्षणाविषये कथयति यत् यत्र तात्पर्यानुपपत्तिहेतुकी अन्वयानुपपत्तिहेतुकी च मुख्यार्थबाधा भवति तत्र लक्षणावृत्त्या अर्थावबोधो जायते। यथा साहित्यसुधासिन्धौ उक्तम्-

यत्र मुख्यार्थबाधः स्यात्तात्पर्याविषयान्वये[5]।

**रघुनाथदासमते लक्षणाशक्तिः**

असौ उत्कलदेशे अजायत। एतल्लिखिता ग्रन्थाः चतुर्विंशतिः सन्ति। अनेन साहित्यभूषणम् इत्याख्यः ग्रन्थः काव्यशास्त्रे विरचितः। अयं ग्रन्थः दशसु परिच्छेदेषु विभागीकृतः उपलभ्यते। एष साहित्यभूषणेवाक्यादिनिरूपणाख्ये द्वितीयपरिच्छेदे अभिधानिरूपणानन्तरं लक्षणाम् प्रत्यपादयत्-

---

1. अलं.सा. द्वि.उ.,पृ.११
2. वृ.दी.,पृ.१०
3. चन्द्रिका., पृ.४२
4. विलास,.,पृ.८६
5. सा.सु.,२/१४

मुख्यार्थबाधे तद्योगे रूढितो वा प्रयोजनात्।
यद्व्यापृत्या रवोऽन्यार्थबोद्धा सा लक्षणार्पिता॥[1]

इति मुख्यार्थस्य अन्वयबाधतया तस्य सम्बन्धे रूढिप्रयोजनयोः कस्यचिदेकस्य सत्वे व्यापारविशेषेण शब्दः वाच्यार्थभिन्नार्थस्य बोधकः शब्दकल्पिता लक्षणा भवति इत्याशयः। एतस्य लक्षणस्योपरि साहित्य दर्पणकारस्य विश्वनाथस्य प्रभावो दृश्यते। एष साहित्यदर्पणकारोक्तमतमेव अनुवर्तमानः तान्येवोदाहरणानि लक्षणानिरूपणप्रसङ्गे स्वीचक्रे। नाधिक-वैशिष्ट्यात् तन्न प्रपञ्च्यते।

**हरिदासमते लक्षणाशक्तिः**

अष्टादशशतकस्य पूर्वार्द्धे[2] माथुरप्रसादमिश्रस्य पुत्रः हरिदासः जन्म अलभत। काव्यशास्त्रे अनेन काव्यालोक इत्याख्यो बन्धः सूत्रशैल्या गुम्फितः। अस्य ग्रन्थस्य इदं वैशिष्ट्यमस्ति यत् ग्रन्थकारेण पूर्वाचार्यलक्षितकाव्य-शास्त्रीयप्रमेयस्य स्वतर्कशैल्या खण्डनमण्डनपुरस्सरं पदार्थाः प्रतिपादिताः। अस्मिन्ग्रन्थे काव्यप्रकाशस्यच्छाया प्रतीयते यथा लेखकेनस्वकृतेः विभागः काव्यप्रकाशविभाग इवव्यधीयत। अत्र मम्मटविश्वनाथादीनां मतानि आलोडितानि।

ग्रन्थस्य विभागः सप्तसु प्रकाशेषु विहितो वर्तते। अयं शब्दशक्तिविचारं प्रथमप्रकाशे अकरोत्।

तत्रैवलक्षणावृत्तिं परिभाषयन् ‘लक्षणारोपिता क्रिया’[3] इत्याचक्षीय तां शब्दस्य आरोपितव्यापारम् अचकथत् मम्मटादिवत्।

**नरसिंहकविमते लक्षणाशक्तिः**

ग्रन्थकारेण नञ्जराजयशोभूषणग्रन्थे लक्षणा विचारिता। शक्यार्थस्य अनुपपन्नतया तत्सम्बद्धार्थस्य बोधः लक्षणाद्वारा कार्यते। तत्र एवंविधं तदीयं

1. सा.भू. द्वि.प., पृ.२८
2. History of Sanskrit poetics- index of authors & works.
3. का.लो.,प्र.प्र.,सू.११,पृ.११

स्वरूपं प्राप्यते। अत्रापि लक्षणा आरोपितः शब्दव्यापारः इति सञ्ज्ञितः। यथा-

शक्यार्थस्यानुपपत्त्या तत्सम्बन्धिनि आरोपितशब्दव्यापारो लक्षणा[1]।

**आशाधरभट्टमते लक्षणाशक्तिः**

भट्टाशाधरः परमकाव्यशास्त्रज्ञ उत्तरवर्तिषु आलङ्कारिकेषु वृत्तिपरकग्रन्थप्रणयनेन सप्तदशशताब्दे प्रसिद्धो जातः। एतस्य शब्दवृत्तिविवेचने द्वौ ग्रन्थौ दृश्येते। प्रथमः कोविदानन्दः, स केनचिद्विद्यावता कृतविमर्शात्मकाध्ययनरूपेण लभ्यते न तु मूलरूपेण इति। द्वितीयग्रन्थः त्रिवेणिका वर्तते। एतद्ग्रन्थनामकरणस्य प्रयोजनमस्तियत् गङ्गायमुनासरस्वतीनां सरितां यथा नदीतया लोके प्रसिद्धिः तथैव काव्यशास्त्रे अभिधालक्षणाव्यञ्जनानां वृत्तितया प्रसिद्धिः। एष ग्रन्थः शब्दशक्तिविवेचने प्रसिद्धो वर्ततेतराम्। अत्र ग्रन्थकारेण लक्षणावृत्तिविवेचनं वैशद्येन निरूपितमस्ति। आशाधरभट्टः लक्षणास्वरूपं त्रिवेणिकायाम् इत्थमभिधत्ते –

'अथ लक्षणा। शक्यसम्बन्धसहकारिणी वृत्तिर्लक्षणा। सा च शब्दव्यापारत्वाच्छब्दनिष्ठा। मुख्यार्थबाधे सति तत्सम्बन्धिनमर्थं विषयीकरोति। सम्बन्धश्च मुख्यार्थे प्राधान्येन वर्तमानोऽपि लक्ष्यार्थमाश्रयति। शब्दसम्बन्धः यद्यपि शब्देऽपि वर्तते तथापि लक्षणायामप्रयोजकः।[2] इति। उक्तस्याशयो भवति शक्यार्थसम्बद्धार्थप्रतीतिकारिणी लक्षणा इति लक्षयति। लक्षणानिमित्ताय द्वौ शक्यार्थसम्बद्धः मुख्यार्थबाधश्च हेतुतया स्वीकृतौ। शक्यार्थबाधे इत्यत्र शक्यशब्दः तात्पर्यस्यापि उपलक्षणं भाति। काकेभ्यो दधि रक्ष्यताम् इत्याद्युदाहरणे शक्यार्थस्य बाधाभावेऽपि तात्पर्यानुपपत्तौ सत्यां लक्षणाप्रसङ्गात् लक्षणा भवति। फलितार्थः शक्यार्थबाधशक्यार्थसम्बन्धिशक्येतरार्थविषया पदवृत्तिः लक्षणा। ग्रन्थकारस्य मतम्- यद्यपि शक्यसम्बन्धः शब्देऽपि तिष्ठति, सः लक्षणायाः प्रयोजको हेतुः न। तथापि सम्बन्धस्य

---

1. नञ्जरा.,पृ.१४-१५
2. त्रिवे.,पृ.३२

अवस्थितिः प्रधानरूपेण शक्यार्थे तथापि सः सम्बन्धः लक्ष्यार्थम् आलम्बते एवं त्रिवेणिकायां निर्दिष्टम्[1]।

पुनश्च कोविदानन्देऽपि भक्तिविमर्शाख्ये द्वितीयेऽध्याये द्वात्रिंशति कारिकासु लक्षणास्वरूपं तद्भेदोपभेदान् अभिनवानि उदाहरणानि चोपबबन्ध। तत्र लक्षणायाः विषये इमे कारिके पठिते तेन–

शक्यार्थबाधे सङ्कोचः प्रसारः प्लुतिरेव च।
सङ्केतस्य स्मृता वृत्तिर्लक्षणा योगसम्भवे॥
त्रैविध्यमेतच्छक्तेर्वा लक्षणावृत्तिरिष्यते।
वृत्तिः सङ्केतयोः केचिन्मन्यन्त उभयोरपि[2] ॥

इति अभिधानिरूपणात्परं लक्षणाशक्तिः निरूपिता। शक्यार्थस्य बाधे शक्यार्थेन सह लक्ष्यार्थस्य योगे सति, सङ्केतस्य सङ्कोचः प्रसारः प्लुतिः च भवति तत्र सङ्केतसङ्कोचादिरेव वृत्तिः ज्ञायते। सङ्केतितस्यसङ्कोचादि-परिणामेनतद्विभागा विहिताः।

आशाधरभट्टः नैयायिकोक्तलक्षणास्वरूपं नाङ्गीकरोति। यथा नैयायिकमते शक्यसम्बन्ध एवलक्षणा कथिता। परं स सम्बन्धः शब्दवृत्तिः न भवति यतोहि वृत्तिः क्रियारूपा सम्बन्धश्च तदितरः। सः सम्बन्धः लक्षणायां सहकारी इत्यालङ्कारिकाणां नयः। लक्षणायाः सम्बन्धस्यच आश्रयः अपि भिन्नः। स हि शक्यलक्ष्ययोः मध्यवर्त्ती। शक्यार्थबाधशक्यसम्बन्धहेतुकी लक्षणा तु शब्दगता इति कृत्वा तन्मतं प्रत्याचष्टे असौ। एतदनुसारं लक्षणा मुख्यरूपेण पदनिष्ठा भवति, किन्तु तद्द्वारा अर्थनिष्ठा अपि भवति। एकमुदाहरणं प्रदर्श्य तस्याः शब्द-अर्थवृत्तितां प्रतिपादयति। यथा दीपस्य प्रभा प्राधान्येन दीपे तिष्ठति। तद्द्वारा तस्य प्रकाश्येषु घटपटादिपदार्थेषुदृश्यते। तथा गङ्गायाम् घोषः इत्यत्र गङ्गाशब्देन मुख्यार्थः स्रोतस्तेन तटः लक्ष्यते। अतः अर्थव्यापारा लक्षणा। तर्हि कथं शब्दनिष्ठा? इति चेत् समाधीयते। वाच्यधर्मः वाचकशब्दे

1. तत्रैव,पृ.२२
2. कोवि, का. २

आरोप्यते अस्माच्छब्दोऽपि लाक्षणिकः। ततः लक्षणा पदनिष्ठा इत्येव बालबोधिनीकारोऽपि समर्थयते।

**३.लक्षणावृत्तिविषये मतभेदविमर्शः**

**लक्षणाविषयकमतानि**

१. रुय्यकमतानुसारं शक्यार्थसम्बन्धितार्थस्य लक्ष्यार्थस्य प्रकाशिका लक्षणा

२. हेमचन्द्रानुरोधे अर्थाधीनः शब्दः तदधीनः अर्थः इति न्यायात्वृत्ति-विभागः कृतः। शब्दोऽपि लाक्षणिकः अर्थोऽपि लाक्षणिकः शक्तिरपि लाक्षणिक इतित्रयाणां कृते एक एव व्यवहारः। लक्ष्यार्थः लक्षणाधीनः भवतीति मतेन लक्ष्यार्थः सूचितः। मुख्यार्थेन सह सम्बद्धः अर्थः लक्षितस्सन्लक्ष्यार्थः भवति तदाश्रयिणी च लक्षणा।

३. केशवमिश्रस्य मतेशक्यम्बन्धरूपा लक्षणा।

४. जयदेवमता लक्षणा तु रूढिप्रयोजनान्यतरहेतुका मुख्यार्थस्या-विवक्षायां तत्सम्बद्धार्थोपस्थापिकेति।

५. विद्याधरस्तु मुख्यार्थादिहेतुत्रितये अन्यार्थप्रतिपादिकां लक्षणाम् अमन्यत।

६. विद्यानाथमते वाच्यार्थानुपपपत्त्या तत्सम्बन्ध्यर्थे आरोपितशब्दव्यापार एव लक्षणा भवति।

७. विश्वनाथमते मुख्यार्थबाधरूढिप्रयोजनान्यतरनिमित्तस्य मुख्यार्थ-युक्तार्थस्य प्रतिपादिकात्वेन लक्षणा स्वीकृता।

८. मन्दारमरन्दचम्पूकारस्य कृष्णकवेः मते लक्षणा वक्तृतात्पर्यविषयी-भूतार्थस्यान्वयानुपपत्तिहेतुके शक्यभिन्नार्थज्ञाने व्यापारः लक्षणा इष्टा।

९. धर्मसूरिमते मुख्यार्थादित्रयहेतुपूर्वकम् अन्यार्थबोधने शब्दस्य व्यापारः एव लक्षणा।

१०.अप्पय्यदीक्षितपक्षे मुख्यार्थस्य अन्यार्थयोगे शब्दस्य या प्रतिपादकता व्यापारता वा इत्यर्थे लक्षणा अभ्युपेता।

११. पण्डितराजेन शक्यार्थस्य सम्बन्धः एव लक्षणतया स्वीकृतः।

१२. कर्णपूरमते अपि लक्षणा पूर्वाचार्यवत् मुख्यार्थादिहेतुपूर्वकान्यार्थधी-बोधिका स्वीकृता।

१३. बालकृष्णभट्टानुसारं लाक्षणिकशब्देन वाच्यार्थस्य लक्ष्यार्थेन सम्बन्धः एव लक्षणा मता।

१४. विश्वेश्वरपण्डितः शक्यसम्बन्धमेव लक्षणां मन्यते।

१५. श्रीभूदेवशुक्लमते शक्यसम्बन्धहेतुना शक्यभिन्नार्थप्रतिपादकता शब्दगता तल्लक्षणा अङ्गीकृता।

१६. विश्वनाथदेवमते सहजभावेन अन्वयानुपपत्तितात्पर्यानुपपत्तिहेतुके मुख्यार्थबाधे सति अर्थावबोधिका शक्तिः इत्यर्थे लक्षणा समर्थिता।

१७. रघुनाथदासमतेऽपिलक्षणा मुख्यार्थबाधतद्योगरूढिप्रयोजनवशात् येन व्यापारेण शब्दः अर्थस्य बोद्धा भवति, ततः व्यापाररूपा अर्पिता शक्तिः वर्तते।

१८. हरिदासमते लक्षणा एका आरोपिता क्रिया वर्तते।

१९. नरसिंहमते शक्यार्थस्य अनुपपत्त्या तत्सम्बन्धिरूपार्थे आरोपित-शब्दव्यापारः लक्षणा मता।

२०. आशाधरभट्टमते शक्यार्थबाधपूर्वकशक्यसम्बन्धसहकारिणी लक्षणा कथिता।

**उपर्युक्तलक्षणाविषयकमतेषु भेदविमर्शः**

आरुय्यकाद् आशाधरभट्टोक्तलक्षणावृत्तिविवेचने तिस्रः वार्त्ताः प्रमुखा भवन्ति।

प्रथमम्- केषाञ्चन लक्षणालक्षणं न्यायरीत्या, कतिपयानां मीमांसाशास्त्ररीत्या, केषां च व्याकरणरीत्या, केषाञ्चिच्च अलङ्कारशास्त्रसमयानुरोधात् वर्तते। तत्र रुय्यकादीनां लक्षणास्वरूपे मीमांसाशास्त्रच्छायादृश्यते जगन्नाथकेशव-मिश्रबालकृष्णविश्वेश्वरपण्डितानां लक्षणापरिभाषायां न्यायशास्त्रस्य आभा दरीदृश्यते। अप्पय्यदीक्षितनरसिंहहरिप्रसादभूदेवशुक्लादिलक्षणापरिभाषा व्याकरणशास्त्रसम्मता लक्ष्यते। शेषालङ्कारिकाणां विश्वनाथभट्टाशाधरादीनां

लक्षणास्वरूपम् अलङ्कारशास्त्रदृशा (मम्मटसदृशं) वर्तते। अर्वाचीनालङ्कारिकेषु रुय्यकहेमचन्द्रकेशवमिश्रजयदेव-विद्याधरविद्यानाथदर्पणकार-विश्वनाथकृष्णकविधर्मसूरि - अप्पय्यदीक्षितजगन्नाथकर्णपूर - बालकृष्णभट्ट-विश्वेश्वरपण्डितभूदेवशुक्ल-विश्वनाथदेव-रघुनाथदासहरिदासनरसिंह- आशाधर-भट्टादीनां लक्षणाविवेचने परस्परं मदभेदः अस्ति। तत्स्वरूपनिर्धारणेऽपितेषां वैभिन्न्यं परिलक्ष्यते। यथा कस्यचिन्मते सम्बन्धमात्रस्य लक्षणा कस्यचिन्मते अन्यार्थस्य बोधिकात्वेन, कस्यचित्तु अन्यार्थबोधनक्षमस्य शब्दस्यव्यापार-मात्रस्य लक्षणा, कस्यचिन्मते तु अन्यार्थप्रतिपत्तिहेतुशब्दव्यापारमात्रस्य, अन्वयानुपपत्तिनिमित्तकस्य अन्यार्थस्य बोधनव्यापारस्यैव लक्षणा इति। वस्तुतस्तु लक्षणया वाच्यार्थातिरिक्तार्थस्य शक्यव्यङ्ग्यरहितस्य बोधः एव कार्यते तावदेव लक्षणायाः कार्यम्। परन्तु लक्षणास्वरूपविधानेन साकमेव तस्याः प्रवृत्तिस्थलं विधातव्यमासीत्। एतस्यां दिशि अर्वाचीनानां विश्वनाथ-प्रभृतीनाम् अवधानम् अभवत्। ततः लक्षणायाः अङ्गीकाराय तन्निमित्तकोटौ हेतवः अवश्यं वक्तव्या इत्यतः तैः लक्षणाकारिकायामेव हेतुत्वमुपस्थापितम्। हेतुविषये अपि तेषां वैलक्षण्यं प्रतिभासते। सामान्यतः लक्षणायाः त्रयो हेतवः प्रसिद्धास्सन्ति। यथा- शक्यार्थबाधः तद्योगः रूढिप्रयोजनान्यतरद् इति।

१. हेमचन्द्रजयदेवविश्वनाथानां त्रयाणां मते लक्षणायाः हेतुरूपेण मुख्यार्थबाधः प्रयोजनञ्चेति द्वयं स्वीकृतम्। विश्वनाथमते तद्योगः इति तुअभ्युपगम्यते परं हेतुत्वेन न गण्यते।
२. पूर्वाचार्यमम्मटादेरिव विद्याधरधर्मसूरिकर्णपूररघुनाथदासादीनां मतेऽपि मुख्यार्थबाधतद्योगरूढिप्रयोजनान्यतराणां त्रयाणां दण्डचक्रची-बरन्यायेन समुदितरूपेण हेतुता अस्ति न तु पार्थक्येन।
३. विद्यानाथकृष्णकविनरसिंहमते तु मुख्यार्थबाध एवलक्षणानिमित्ततया स्वीकृतः।
४. अप्पय्यदीक्षितभूदेवशुक्लविश्वनाथदेवानां विद्यानाथ-कृष्णकवि-नरसिंहैः सह लक्षणायाः एकहेतुत्वविचाराभ्युपगमने साम्यमस्ति। किन्तुवैषम्यम् अस्मिन्नंशे विद्यते यत् विद्यनाथादिस्तु मुख्यार्थबाधं हेतुं

मन्यते, अप्पय्यप्रभृतिस्तु मुख्यार्थसम्बन्धमेव लक्षणाहेतुतया व्यवहरति।

५. जगन्नाथबालकृष्णविश्वेश्वरहरिप्रसादप्रभृतीनां लक्षणाहेतुविषये स्पष्टतया अभिधानं नैवोपलभ्यते। तस्मादिदं न शङ्कनीयं यत् हेतुं विनापि लक्षणाशक्तिस्वीकारः भवितुमर्हति अन्यथा 'हेत्वभावान्न लक्षणा' इति न्यायाल्लक्षणाया अवसर एव न स्यात्। मुख्यार्थस्य बाधविषये तु नास्ति कस्यचिदपि विमतिः, किन्तु हेतुतया विप्रतिपत्तिः भवितुमर्हति। अतः तदुक्तलक्षणापरिभाषायाः सङ्गतिः भावनीया।

६. विश्वनाथहेमचन्द्रादिना सह आशाधरभट्टस्य हेतुद्वयस्वीकारे मतैक्य-मस्ति। मतभेदस्तु अंशेऽस्मिन् वर्तते यत्विश्वनाथादेः मते हेतुत्वेन मुख्यार्थबाधरूढिप्रयोजनान्यतरत्वस्य अङ्गीकारः, आशाधरमते तु मुख्यार्थबाधतद्योगयोः अनयोः हेतुतया अभ्युपगतिः इत्ययं भेद उभयेषाम्। आशाधरभट्टः प्रयोजनमुखेन तद्भेदान् अकरोत्। हेतुतया प्रयोजनं न मनुते। विश्वनाथादीनां मतेऽपि सम्बन्धः हेतुत्वापेक्षया लक्ष्यार्थविशेषणपरतया गृहीतः।

अर्वाचीनकृतलक्षणास्वरूपे मुख्यार्थबाधविषये सहजतया विचारः कृतो वर्तते। मुख्यार्थस्यबाधे उभयविधा अपि अनुपपत्तिः स्वीकृता अन्वयानुपपत्तिः तात्पर्यानुपपत्तिः चेति। किन्तु मन्दारमरन्दचम्पूकारः कृष्णकविः तात्पर्यानु-पपत्तिकं मुख्यार्थबाधं कारिकायाम् अवदत्[1]।

विश्वनाथदेवमते तु अन्वयतात्पर्यानुपपत्तिद्वयमपि लक्षणाहेतुतया स्वीकृतम्। जगन्नाथः रसगङ्गाधरे उभयविधयोः अपि अनुपपत्त्योः विषये मतान्तरं निरस्ययुक्त्या तदान्तरिकं महत्त्वमपि न्यरूपयत्। अतस्तन्मतेऽपि द्वयोरपि स्वीकृतिः। एवम् प्राचीनानाम् अर्वाचीनानांमध्ये एकदेशे सूक्ष्मभेदः अस्ति। मुख्यतस्तु प्राचीननैयायिकानां मते तात्पर्यानुपपत्तिः नव्यानां मते च अन्वयानुपपत्तिः स्वीकृता। आलङ्कारिकाणां मते सामान्यतः द्वयोः अपि

1. म.म.च., शे.बि.,पृ.१७८

विचारः कृतः।

प्राक्तनानां मम्मटादीनाम् अर्वाक्तनानां विश्वनाथस्यकेषुचिद् स्थानेषु मतभेदाः सन्ति।

मम्मटमतानुसारं कर्मणि कुशलः इत्यत्र दक्षरूपार्थः लक्षणावृत्त्या बोध्यते। तन्मतानुसारन्तु तत्र प्रवृत्तिलभ्यर्थमादाय अभिधयैव प्रकृतार्थसिद्धिः। तथाहिकोशादिग्रन्थदृशा कुशलशब्दः निपुणार्थे उपात्तस्तस्मात् तादृशस्स्थलेषु वृथैव लक्षणास्वीकारः। तत्र कुशलपदस्य व्युत्पत्तिलभ्यार्थं स्वीकृत्य बलात् तत्र हठधर्मितया लक्षणाप्रवर्तना उपकल्पिता इति मम्मटादीनां विषये इदमेव विश्वनाथतात्पर्यं लक्ष्यते अन्यथा गौः इत्यस्मिन्पदेऽपि गच्छतीति व्युत्पत्ति-लभ्यम् अर्थमादाय शयनकालीनगवि गोव्यवहाराभावात् तत्रापि लक्षणाङ्गी-कारो न। अन्यद्धि व्युत्पत्तिनिमित्तम् अन्यच्च प्रवृत्तिनिमित्तम् इति अभिधाय प्राचीनमतम् प्रत्याचक्षीय स्वीयं वैमत्यं च प्रकटयन्त्याधुनिकाः। एवंविधः उभयत्र मतभेदः प्रतिभाति। प्राचीनालक्षणां साक्षात्सम्बन्धेन अर्थनिष्ठां परम्परासम्बन्धेन च शब्दे कल्पयन्ति। अर्वाचीना विश्वनाथादयोऽपि ताम् ईश्वरानुद्भावितां कथयित्वा शब्दस्य आरोपितव्यापारं प्रस्तुवन्ति। प्राचीनानां मते मुख्यार्थबाधतद्योगरूढिप्रयोजनान्यतरस्य त्रितयस्य समुदितरूपेण यौगपद्येन वा दण्डचक्रचीबरन्यायेन सापेक्षितकारणता वर्तते। अर्वाचीनैकदेशिनां विश्वनाथ-हेमचन्द्रादीनां मतेमुख्यार्थबाधरूढिप्रयोजनान्यतरत्वस्य द्वितियस्य हेतोः एव कारणता तद्युक्त एव लक्ष्यार्थः लक्षणया बोध्यते इत्यर्वाचीनपक्षः यच्च प्राचीनानां मते हेतुत्वेनैव अभ्यसितम्।

प्राचीनानाम् मम्मटादीनाम् अर्वाचीनैकदेशिभिः विद्याधरकर्णपूरधर्म-सूरिरघुनाथदासैस्सह लक्षणाहेतुस्वरूपादिविषयस्वीकारे साम्यमस्ति।

रुय्यकादेः लक्षणास्वरूपं कुमारिलभट्टोक्तलक्षणास्वरूपमिवकारि-काशः साम्यमावहति। अभिधेयाविनाभूतार्थप्रतीतिमात्रं लक्षणाम् आख्यान्ति मीमांसकाः कुमारिलाः। रुय्यकमते तादृश्याः प्रतीतेः स्पर्शमात्रं लक्षणा। किन्तु मम्मटाचार्यस्य लक्षणामतं मुकुलभट्टमतादेव सामञ्जस्यमाप्नोति। मौकुलिक-मतं तु कुमारिलमताद् आगतम् अयं क्रमः। मम्मटोत्तरवर्तिषु मम्मटीयं मतं

प्राचुर्येण गतम् इदमपि वक्तुं शक्यते। अतः मम्मटोक्तलक्षणाकारिकायां विविधशास्त्रकारोक्तमतमपि प्रतिभासते। अतः काव्यप्रकाशकारोक्तलक्षणांशेन यल्लक्ष्यते यत्प्रतिपाद्यते सा लक्षणा, प्रतिपत्तिः लक्षणा इति शास्त्रान्तरस्य विषयः। तस्मात् रुय्यकमम्मटभट्टयोः कारिकोक्तवचनेन साम्यमस्ति। मम्मटाचार्याद् आशाधरभट्टस्य अत्रैव मतभेदः वर्तते यत् लक्षणा मुख्यरूपेण पदनिष्ठा भवति, किन्तु तद्द्वारा अर्थनिष्ठा अपि भवति। यथा दीपस्य प्रभा प्राधान्येन दीपगता सती तद्द्वारा तस्य प्रकाश्यघटपटादिगता भवति। तद्वत् लक्षणापि साक्षात् पदनिष्ठा पश्चात् अर्थनिष्ठा इत्याशयः। मम्मटमते तु मुख्यार्थव्यवधानापेक्षिततया व्यवहितार्थस्यैव लक्ष्यार्थेन सम्बन्धात् इयमर्थनिष्ठा पश्चात् शब्दकल्पिता भवति। यत्र प्राचीना गौणीं लक्षणान्तर्गतां स्वीकृत्य तद्भेदतया एव गणयन्ति।

अर्वाचीनाः रुय्यकहेमचन्द्रादयः तां लक्षणातः विभज्य पृथग्वृत्तिपदेन अङ्गीकुर्वन्ति। इति गौणेः वृत्तिताविषयक भेदः उभयेषां प्राप्यते।

### ४.लक्षणावृत्त्यर्थकपदानाम् अर्थविचारः।

मुख्यार्थबाधनिमित्तकस्य अन्यार्थप्रतिपत्तिशब्दव्यापारस्य लक्षणा इति उपर्युक्तवचनैः स्पष्टम्। इयं लक्षणाशक्तिः अलङ्कारशास्त्रादतिरिक्तशास्त्रान्तरेष्वपि तत्तच्छास्त्रकारैः शब्दान्तरेण व्यवहृता। लक्षणाशक्तिप्रयोगाय सर्वेषु शास्त्रेषु कतिपयाः शब्दाः प्राप्ताः भवन्ति। यथा- गौणीभक्त्युपचारगुणवृत्त्यप्रसिद्धाजघन्या-अमुख्याजहल्लक्षणाः इत्येते शब्दाः लक्षणावृत्तिप्रयोगार्थे प्रयुक्ताः सन्ति।

**गौणी**-'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायैर्गौणी'[1] इति मीमांसाशास्त्रे लक्षणारूपार्थे गौणी शब्दः प्राप्तः।

मीमांसाशास्त्रे कुमारिलभट्टेन लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता[2]। लक्ष्यमाणगुणवशाद् अर्थान्तरप्रतिपत्त्यर्थे गौणीशब्दः प्रयुक्तः। साहित्यशास्त्रेऽपि

1. पू.मी.सू.१.४.२२,पृ.३१३
2. का.प्र.,विश्वेश्वरी मीमांसकमतखण्डनम् द्वि.उ.,पृ.६५

सादृश्यसम्बन्धतया अर्थान्तरबोधे इयं स्वीकृता मुकुलभट्टमम्मटादीनां[1] मते सा लक्षणायाः एकभेदतया परिगणिता। रुय्यकहेमचन्द्रादिमते[2] सा लक्षणातः पृथग्वृत्तितया अङ्गीकृता।

**भक्तिः**- एतरेयब्राह्मणादिग्रन्थे प्रयुक्तः भक्तिशब्दः लक्षणावृत्तिपरतया नास्ति[3]। निरुक्तग्रन्थटीकाकारः दुर्गाचार्यः 'तासामेव तिसृणां भक्तिसाहचर्यम्'[4] इत्युक्त्वा साहचर्यार्थे भक्तिशब्दं प्रयुयुजे।

अलङ्कारशास्त्रे अभिनवगुप्तपादाचार्यः ध्वन्यालोकस्य लोचनटीकायां ध्वनिविरोधिभाक्तवादं व्याख्याय भक्तिशब्दस्य अनेकविधां व्युत्पत्तिं कृत्वा लक्षणागुणवृत्तिगौण्यादीन् अर्थान् स्वीचक्रे। तत्र सकलशास्त्रसम्मतार्थः विहितः समुपलक्ष्यते।

१. भज्यते सेव्यते पदार्थेन प्रसिद्धतया उत्प्रेक्ष्यते इति भक्तिः अभिधेयेन सामीप्यादिः ततः आगतः भाक्तः लाक्षणिकोऽर्थः।
२. प्रयोजनपरकव्युत्पत्त्या भक्तिः प्रतिपाद्ये सामीप्यतैक्ष्ण्यादौ श्रद्धातिशयः।
३. मुख्यार्थबाधपरकव्युत्पत्त्या मुख्यार्थस्य भङ्गो भक्तिः।
४. गौणीवृत्तिविषयकव्युत्पत्त्या गुणसमुदायवृत्तेः शब्दस्यार्थभागः तैक्ष्ण्यादिर्भक्तिः[5]।

**उपचारः**-गौतमसूत्रे उपचारशब्दः दशस्वर्थेषु उपात्तः । यथा-

१. साहचर्यतात्स्थ्यतादर्थ्यतात्कर्म्यमानसामीप्यगुणकारणाधिपतयः अर्थाः[6]।
२. अलङ्कारशास्त्रे अभिधावृत्तिकारमतेवस्त्वन्तरे वस्त्वन्तरम्

1. का.प्र.पृ.६२
2. हे.का., सा.मी.द्वि.प्र.२/२
3. ऐ.ब्रा.पृ.८९
4. दुर्ग. पृ.३५८
5. ध्व.लो.,पृ.३०-३१
6. न्या.सू. १.२.६८

उपचर्यते[1] इत्युक्त्वा अपरवस्तुनः अपरवस्तुन्यारोपार्थे पठितः।

३. विश्वनाथः साहित्यदर्पणे द्वितीयपरिच्छेदे 'उपचारो हि नाम अत्यन्तं विशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्' अतिसादृश्येन विधर्मणोः द्व्योः पदार्थयोः अभेदप्रतीत्यर्थे उपचारशब्दं पपाठ[2]।

४. लोचनकारः मुख्यार्थबाधः निमित्तं प्रयोजनमिति त्रयः सद्भाव उपचारबीजम् इति लक्षणार्थे उपचारशब्दं मनुते[3]।

**गुणवृत्तिः**

उद्भटः शब्दानामभिधानम् अभिधाव्यापारोमुख्यो गुणवृत्तिश्च इत्युक्त्वा लक्षणावृत्तेः स्थाने तं शब्दं प्रायुङ्क्त[4]। लोचने गुणेभ्यः आगतागौणी गुणसमुदायवृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिः भक्तिः ततः आगतो गौणोऽर्थो भाक्तः। गुणद्वारेण वर्तनं गुणवृत्तिः, गुणाः सामीप्यादयो धर्मास्तैक्ष्ण्यादयश्च तैरुपायैर्वृत्तिरर्थान्तरे यस्य तैरुपायैर्वृत्तिर्वा शब्दस्य यत्र स गुणवृत्तिः शब्दोऽर्थो वा[5]।

**अप्रसिद्धा**

व्याकरणशास्त्रे शक्तेः द्वौ भेदौ प्रसिद्धा अप्रसिद्धा चेति स्वीकृतौ। तत्र अमन्दबुद्धिसंवेद्यविषया अप्रसिद्धा उक्ता[6]। सैव काव्यशास्त्रे लक्षणा अभिधीयते।

---

1. अभिधा.पृ.४८
2. सा.द.,पृ
3. ध्व.लो..,पृ३१
4. भा.विव.,शब्दाश्छन्दोऽभिधानार्थाः इति प्रकरणे
5. लो.टी.बालप्रियादिव्याञ्जनासहिता पृ.३१
6. परम्,लक्षणा निरूपणम् पृ. ६०.ध्वन्या पृ.३४

**अमुख्या**

लक्षणाशक्त्यर्थे शास्त्रे अमुख्याशब्दः प्रयुक्तः। ध्वन्यालोककारः ध्वनिविरोधिनः आचार्यस्य भाक्तवादस्य मतमुपास्थापयन् 'अमुख्यावृत्त्या काव्येषु व्यवहारं दर्शयता' इत्यादिना तत्र भाक्तवादिमते महाकाव्येषु अमुख्यावृत्तेः प्रयोगाः प्राप्ता भवन्ति एवम् अमुख्यावृत्तिः शब्दोऽपि तद्व्यवहारकरणाय प्रवृत्त आसीत्।

**जघन्या**

मीमांसाशास्त्रे लक्षणाशक्तिव्यपदेशाय जघन्याशब्दोऽपि श्रुतिपथमागतः। यथा शाबरभाष्येकः पुनर्मुख्यः को वा गौण इत्युच्यते। यः शब्दादेवावगम्यते, स प्रथमोऽर्थो मुख्यः, मुखमिव भवतीति मुख्य इत्युच्यते। यस्तु खलु प्रतीतादर्थात्केनचित्सम्बन्धेन गम्यते, स पश्चाद्भावाज्जघनमिव भवति जघन्यः। गुणसम्बन्धाच्च गौण इति। [1]साहित्यमीमांसाकारः आचार्यरुय्यकः तस्य शब्दस्य प्रयोगाय कारणं वदति- मुख्या इव लक्षणा गौणी च एवं स्वात्मनि क्स्यचित् निरपेक्षभावेन आत्मतन्त्रा नास्ति। अतः पराश्रितशक्तिः अल्पप्राणा मन्यते। अतः इयं वृत्तिः जघन्याख्या कथिता[2]।

**लक्षणा**

न्यायशास्त्रे शक्यसम्बन्धार्थे लक्षणाशक्तिं स्वीकृत्य तत्र लक्षणाशब्दतया व्यपदेशः अक्रियत[3]। काव्यशास्त्रे अपि लक्षणाशक्तये लक्षणाशब्दः प्रयुक्तः[4]।

**जहल्लक्षणा**

वेदान्तशास्त्रे तत्त्वमसीति आदर्शवाक्यये जीवब्रह्मसाक्षात्कारपरकतात्पर्यसमन्वयाय वेदान्तसारे जहल्लक्षणा भागलक्षणापरपर्याया इति

---

1. (मी.सू.,३/२/१, पर शाबरभाष्य, मी.द.,(४), पृ.१२३)
3. 61. सा.मी.
3. मुक्ता, शब्दप्रमाण, पृ.४८
4. का .प्र.,पृ.पृ.५४

प्रयुक्ता। सा च काव्यशास्त्रे लक्षणाशक्तिभेदतया लक्षणलक्षणानाम्ना व्यपदिष्टा[1]।

विशिष्य क्वचित् उपर्युक्तपदस्य लक्षणावृत्त्यर्थे पर्यायत्वेन प्रयोगः, क्वचिच्च तद्भिन्नतया तस्याः एकदेशे प्रयोगः। लोचनटीकाकारमते भक्तिशब्दाद् आलङ्कारिकाणां लक्षणा गृहीता। या चा शुद्धागौणीरूपभेदा अस्ति। मीमांसकमते गौणी एका पृथक्शक्तिः. या च लक्षणाभिन्ना। मीमांसकमतनयेन गौण्यपि भक्तिपदेन ग्राह्या काव्यशास्त्रे। लोचनकारोक्तः उपचारशब्दः लक्षणाशक्त्यर्थे प्रयुक्तः। विश्वनाथोक्तः उपचारशब्दस्तु गौणीशक्त्यर्थे प्रयुक्तः इति तत्तद्ग्रन्थपरिशीलनेन स्फुट्यते।

वेदान्तसारे तत्त्वमसि वाक्ये या जहदजहल्लक्षणा भागलक्षणा मता, सा काव्यशास्त्रे शुद्धालक्षणात्वेन उपादानलक्षणात्वेन भेदाकोटौ स्वीकृतम्।

इत्थं गभीरम् अर्वाचीनकाव्यशास्त्रदृष्ट्या लक्षणाशक्तिविचारविषयः व्यधीयत।

रुय्यकाचार्यादिकाव्यशास्त्रीयविपश्चिद्भिरुपस्थापितवृत्तिविषयकमतान्यपि सन्दर्श्य सविशदं यथाविधि व्यमृश्यत।

---

1. वे.सा., ''तत्त्वमसि'' वाक्यविवरणे, पृ.४०

## पञ्चमाध्यायः

# लक्षणाभेदविमर्शः

**लक्षणाभेदे बीजम्**

संस्कृतकाव्यशास्त्रे वृत्तिविचारः यः निरूपितः, स व्याकरणादिशास्त्राद् आगतः। लक्षणायाः शक्तिस्वातन्त्र्यं तु काव्यशास्त्रकारिभिरानीतम्। पुनश्च वाक्यविचारपरत्वेन मीमांसाशास्त्रस्यापि वृत्तिविवेचनं प्रसिद्धं प्राचीनं च वर्तते। व्याकरणशास्त्रे लक्षणाभेदविषये किमपि स्फुटप्रमाणं न प्राप्यते। तथापि महाभाष्ये पुंयोगादाख्यायाम् इति सूत्रव्याख्याने द्वयोः परस्परभिन्नयोः पदार्थयोः अतस्मिन् तद् इतिबुद्ध्या तत्र प्रकारचतुष्टयम् भाष्यकारेण अदर्शि। तात्स्थ्यम्-ताद्धर्म्यम्-तत्सामीप्यम्-तत्साहचर्यम् इत्यनेन तत्र भेदः आरोपितः। अतः अयं लक्षणाभेदविभाजने मूलं चिन्तनम् इति वक्तुं शक्यते। मीमांसासूत्रेऽपि तत्सिद्धिजातिसारूप्यमि इत्यत्रापि लक्षणाभेदविषयः नोक्तः। तथापि ग्रन्थ-पर्यालोचनेन पूर्वमीमांसादर्शने लक्षणाभेदानां चर्चा कृता वर्तते। जैमिनिसूत्रे अमुख्यावृत्तेः द्वे रूपे दृश्येते गौणी लक्षणा चेति यथा – 'अहीनो वा प्रकरणाद् गौणः[1]'। कुमारिलभट्टेनापि तन्त्रवार्तिके प्रयोजनवती निरूढा इत्याकारेण लक्षणाभेदः दर्शितः। यथा–

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः[2]॥ इति

न्यायसूत्रे च महर्षिणा गौतमेन छलप्रकारनिरूपणावसरे उपचारच्छलस्य प्रसङ्गे तस्य दशविधप्रकारान् सहचरणस्थानतादर्थ्यादीन् निरूपयता लक्षणायाः भेदविषयको मार्ग उदघाटि। एवं व्याकरणादिशास्त्रेषु अङ्कुरितं लक्षणाभेदचिन्तनम् उत्तरकाले काव्यशास्त्रे पल्लवितं लक्ष्यते।

---

1. मी.सू. ३.३.१५
2. तं.वा. ३/१/१२

काव्यशास्त्रे लक्षणाभेदविषयः प्रथमं केन निरूपितः चर्चितश्च इति किञ्चिद्विचारणीयम्। यद्यपि प्रथमं स्पष्टरूपेण मुकुलभट्टप्रणीताभिधावृत्ति-मातृकायां लक्षणाविषयकः विभागः उपलभ्यते। तथापि लक्षणाया भेदचिन्तने निदानं किमिति स्पष्टं ज्ञातुं प्राचीनानाम् आनन्दवर्धनमुकुलभट्टाभिनवगुप्त-महिमभट्टभोजराजमम्मटभट्टानां मम्मटोत्तराणां रुय्यकवाग्भटविश्वनाथ-विश्वेश्वरपण्डितपर्यन्तानाम् अर्वाचीनानाञ्च आलङ्कारिकाणां ग्रन्थेषु प्रतिपादितानां लक्षणाभेदसम्बन्धिविचाराणां विमर्शात्मकमध्ययनम् अत्र साम्प्रतं भवति।

**प्राचीनालङ्कारिकसम्मतलक्षणाभेदाः**

**आचार्यभामहमते लक्षणाभेदः**

भामहाचार्यनिरूपितरूपकाद्यलङ्कारनिरूपणे लक्षणावृत्त्यङ्कुरस्तु लक्ष्यते परं लक्षणाप्रभेदविषयस्तु नैवोपलभ्यते।

**दण्डिमते लक्षणाभेदः**

दण्ड्याचार्यप्रतिपादितसमाधिगुणावसरे लक्षणार्थे गुणवृत्तिशब्द-प्रयोगस्तु प्राप्यते परं लक्षणाभेदविषयः नैव निरूपित इत्येव ज्ञायते।

**आनन्दवर्धनमते लक्षणाभेदः**

मुकुलभट्टात् पूर्ववर्ती आनन्दवर्धनाचार्यः ध्वन्यालोके ध्वनिस्थापना-वसरे कथमपि लक्षणां व्यवेचयत्। एषः स्पष्टतया कुत्रापि लक्षणाप्रभेदान्न अजीगणत्। किन्तु एतद्ग्रन्थे ध्वनिप्रसङ्गतः लक्षणाया विविधप्रकारा नूनं दृष्टिगता भवन्ति। ध्वन्यालोके रूढिलक्षणानिरूपणावसरे लावण्यादिशब्दा उल्लिखिताः। यथा –

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः[1]॥ इति।

अस्य फलस्य प्रयोजनस्य वा उद्देश्यतया लक्षणा युज्यते तदीया प्रतीतिः व्यञ्जनयैव दर्शिता अस्ति। यथा –

1. ध्वन्या.प्र. उ., पृ.७१

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः [1]॥

अनेन इदम् अवसीयते यत् आनन्दवर्धनाचार्यस्य मते निरूढा प्रयोजनवतीति लक्षणायाः द्वौ भेदौ वर्तेते।

ध्वन्यलोके अविवक्षितवाच्यध्वनेः लक्षणामूलध्वन्यपरपर्यायस्य भेदौ अर्थान्तरसङ्क्रमितवाच्यः अत्यन्ततिरस्कृतवाच्यश्चेति भवति। तत्रादौ मुख्यार्थः स्वप्रतीतिपरित्यागं विनैव अर्थान्तरस्य प्रतीतिं कारयति। द्वितीयस्मिन् भेदे लक्षणीयम् अर्थान्तरे परिणमते। तच्च अर्थान्तरं लक्ष्यार्थ इति कथ्यते। यथा – गङ्गायां घोष इत्यत्र जलप्रवाहरूपो योऽर्थः अत्यन्तं तिरस्कृतो भूत्वा लक्ष्यार्थे परिणमते। तदुक्तं मूले – 'यद्गुणवृत्तौ यदार्थोऽर्थान्तरमुपलक्षयति तदोपलक्षणी-यार्थात्मना परिणत एवाऽसौ सम्पद्यते। यथा गङ्गायां घोष इत्यादौ '[2]इति।

**मुकुलभट्टमते लक्षणाभेदाः**

मुकुलभट्टः काव्यशास्त्रे इदम्प्रथमतया स्फुटं लक्षणाभेदविचारम् अभिधावृत्तिमातृकायां प्रास्तावीत्। अतः शब्दशक्तिविवेचनप्रसङ्गेऽपि अयं विशिष्यते। तेनैव अभिधायाः ये दश प्रकारा उक्तास्तत्र आद्या जात्यादिचतुर्भेदा मुख्याः, लक्षणायाः षट्प्रकाराः इत्याहत्य तस्याः दशधात्वं सम्भवति। अग्रे लक्षणायाः षड्भेदा निरूपिताः।

शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता।
उपादानाल्लक्षणाच्च शुद्धा सा द्विविधोदिता ॥
आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः।
प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः[3]॥

एतद्वचनेन इदं स्पष्टं भवति। प्रथमतः लक्षणायाः द्वौ भेदौ। शुद्धा उपचारमिश्रा चेति। तदनन्तरं तत्र शुद्धाभेदस्य उपादानलक्षणा लक्षणलक्षणा इति

---

1. ध्वन्या प्र.उ.,पृ.७६
2. ध्वन्या.तृ.उ.,पृ.३१७
3. अभिधा,पृ.२९-४०

पुनः भेदद्वयं भवति। ततः द्वितीयस्य उपचारमिश्राभेदस्य शुद्धोपचारः गौणोपचारः इति कृत्वा तयोः द्वयोः प्रत्येकं भेदस्य सारोपा साध्यवसाना इति भेदः कृतः। इत्थं शुद्धालक्षणायाः भेदद्वयं तथा उपचारमिश्रायाः चतुर्भेदाः भूत्वा लक्षणा षड्विधत्वं लभते। यथोक्तम् वृत्तौ– 'एतेन चतुर्विधोपचारेण सह पूर्वोक्तौ द्वौ लक्षणाभेदौ सङ्कलय्य षट्प्रकारा लक्षणा वक्तव्येति'[1]इति।

### १.शुद्धालक्षणा

शुद्धालक्षणोदाहरणे मुकुलभट्टः 'गङ्गायां घोषः' इति वाक्यं प्रस्तौति। गङ्गापदार्थस्य जलप्रवाहरूपार्थस्य घोषं प्रति अधिकरणताया असम्भवात् तदधिकरणसिद्ध्यर्थं तत्समीपस्थं तटरूपार्थं लक्षणा बोधयति।

### २.उपचारमिश्रा लक्षणा

को नाम उपचारः? इत्यत्र आदौ उपचारपदार्थं व्याख्याति-वस्त्वन्तरे वस्त्वन्तरम् उपचर्यते इति उपचारः। यथा गौर्वाहीकः[2] इत्यत्र "एकस्य वस्तुनः अपरस्मिन् वस्तुनि आरोपणम् उपचरणमेव उपचारः कथ्यते। एतस्याः उदाहरणं– 'गौर्वाहीकः' इत्यत्र गोशब्दस्य मुख्यार्थः गोत्वाश्रयः वाहीक-पदस्यार्थो शिष्टाचाराद्बहिर्गतः एतादृशः पञ्चनददेशस्थः व्यक्तिविशेषः इति। गोव्यक्तेः वाहीकव्यक्तेश्च अभेदः अनुपपन्नः। उभयोरपि पदार्थयोः वक्तृतात्पर्यरूपम् अभेदसम्बन्धं योजयितुं तस्याः गोव्यक्तेः एकदेशस्य सामान्यगुणा अन्वेष्टव्याः ये च उभयत्र स्युः। गोगतजाड्यमान्द्यादिगुणानां वाहीकगतजाड्यमान्द्यादिगुणेषु आरोपः उपचारः। गोगतगुणसदृशवाही कनिष्ठगुणप्रतीत्या अयं वाहीकः इति सादृश्यसम्बन्धेन लक्षणया वेद्यमानः तद्युक्तः वाहीक उपचरितः अस्ति। तस्मात् कारणात् अत्र उपचारमिश्रा लक्षणा। यथा वृत्तिकारेण उक्तम् -अत्र हि गोशब्दो वाहीकशब्देनानुपपद्यमान-समानाधिकरणाद् बाधितमुख्यार्थः सन् गोगता ये जाड्यमान्द्यादयो गुणाः

1. तत्रैव, पृ.४६
2. अ.वृ.मा.पृ.११

तत्सदृशवाहीकगतजाड्यमान्द्यादिगुणलक्षणाद्वारेण गोगतजाड्यमान्द्यादिगुण-सदृशजाड्य-मान्द्यादिगुणोपेतो वाहीक उपचरितः। तेनेयमुपचारमिश्रा लक्षणा[1]।

## १.१ शुद्धा -उपादानलक्षणा

अयं भेदः शुद्धायाः अन्यतरो वर्तते। यत्र स्वार्थसिद्ध्यर्थं अन्योऽर्थः आक्षिप्तो भवति तत्रोपादानलक्षणा। यथोक्तम् –

स्वसिद्ध्यर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत्[2]।

उपादानभेदस्य मुकुलभट्टेन द्विविधमुदाहरणं दर्शितम् – 'गौरनुबन्ध्यः' 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति प्रथमोदाहरणे यज्ञादौ गो आलम्भनम् अनुबन्धनं वा कर्तव्यमित्यर्थे केनचित् प्रयुक्तं वाक्यम्। तत्र गौः इत्यस्य मुख्यार्थः गोत्वजातिः, गोत्वम् आश्रयभूतव्यक्तिं विना आनेतुं न शक्यम्। अतः तदीयव्यक्तिरूपार्थस्य आक्षेपः क्रियते। द्वितीयमुदाहरणम्-'पीनो देवदत्तो दिवा न भुङ्क्ते' अत्र देवदत्तस्य स्थूलत्वं प्रतिपाद्यमस्ति। यच्च दैनिकभोजनाभाव-कारणात् अनुपपन्नमस्ति। अतः पीनत्वरूपस्वार्थसिद्ध्यर्थं कारणभूतं रात्रिभोजनमाक्षिप्यते। अत्रैकः प्रश्नोऽदेति यत् स्थूलत्वं रसायनाद्युपयो-गान्निष्पन्नमिति एव स्वीक्रियेत? तन्मतानुसारं वाक्यमिदम् उपादानलक्षणा-प्रसङ्गे उदाहरणतया वर्णनस्य इदमेव प्रयोजनं भाति यत् रसायनाद्युपयोगस्य प्रमाणान्तरेण अभावत्वमस्ति। एतदतिरिक्तं पीनत्वं रसायनादि-उपयोगस्य बाधकमपि अस्ति। यतोहि तत्प्रतिपादनं दिने भोजनाभावेन सह जातम्। इदं तात्पर्यं स्वीकार्यं यत् वक्तुरन्तर्मनसि रसायनाद्युपयोगात् स्थूलत्वस्य निष्पन्नता चेत्तदा सः दैनिकभोजनाभावस्य उल्लेखं न कुर्यात्। अतः रात्रिकालिक-भोजनस्य उल्लेखः कृतो न वर्तते।

उपर्युक्तोदाहरणे 'रात्रौ भुङ्क्ते' इति शब्दाक्षेपे श्रुतार्थापत्तिः रात्रिभोजनकारणस्य वा आक्षेपः। अत्र स्वार्थस्य (देवदत्तस्य स्थूलत्वरूपार्थस्य) सिद्धिहेतवे अर्थान्तरस्य आक्षेप एव उपादानं भवति। यथोऽक्तं वृत्तौ–'अत्र च

1. अभिधा,. पृ..११
2. अ.वृ.मा.,पृ.१३

रात्रौ भुङ्क्ते इति एतच्छब्दाक्षेपपूर्वकतया प्रमाणस्य परिपूरणात् श्रुतार्थापत्तित्वं भवतु अथवा कारणस्यैव रात्रिभोजनस्याक्षेप इति सर्वथा स्वसिद्ध्यर्थ-त्वेनार्थान्तरस्याक्षेपपूर्वकतयान्तर्भावनादुपादानत्वमुपपद्यते[1] इति। मुकुलभट्टः सर्वशास्त्रेषु व्याकरणमीमांसादिषु पारङ्गतः आसीत्। किन्तु मीमांसादर्शने एतस्य महान्विचारोदधिः दृश्यते। अतः एषः काव्यशास्त्रीयतत्त्वानि विवेचयितुम् उदाहरणानि मीमांसाशास्त्रादेव जहार। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति उदाहरणं मीमांसाशास्त्रे बहुधा आलोच्यते। यथा मीमांसका अर्थापत्तिं व्यतिरिक्तप्रमाणतया मन्वते। उक्तञ्च –

प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत्।
अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता[2] ॥

इति। उपर्युक्तोदाहरणे मीमांसकानां मते अर्थापत्तिप्रमाणत्वेन देवदत्तस्य पीनत्वं सिद्ध्यति। इदमेव उदाहरणं मुकुलभट्टः उपादानलक्षणावसरे चिनोति। यतो हि तन्मते अत्र उपादानलक्षणायाः लक्षणं सङ्गच्छते।

अर्थापत्तिप्रमाणं नाम – यत्र अनुपपद्यमानार्थं दृष्ट्वा तस्य उपपादकस्यार्थस्य कल्पनाकरणमेव अर्थापत्तिः कथ्यते। अनुपपद्यमानार्थस्य ज्ञानं द्विधा भवति – दृष्ट्वा श्रुत्वा चेति। यथा शबरस्वामिनोक्तं – अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोन्यथा नोपपद्यत इत्यर्थकल्पना [3]। अतः मीमांसकानुसारेण 'पीनोदेवदत्तो दिवा न भुङ्क्ते' इत्युदाहरणम् उभयविधार्थापत्तिपरकं भवितुमर्हतीति तदभिप्रायः।

**१.२शुद्धा-लक्षणलक्षणा**

प्रभेदोऽयं शुद्धालक्षणायाः द्वितीयो वर्तते। यत्र अन्यार्थस्य सिद्ध्यर्थं स्वस्य अर्थस्य परित्यागो भवति तत्र लक्षणलक्षणा। यथा-'गङ्गायां घोषः'। अत्र गङ्गाशब्दः अन्यार्थस्य तटरूपार्थस्य सिद्ध्यर्थं भगीरथखातावच्छिन्न-जलप्रवाहरूपमुख्यार्थं परित्यजति अतः अत्र लक्षणलक्षणा वर्तते।

1. तत्रैव,पृ -१३
2. श्लो.वा., पृ.३२०
3. शा.भा. १/१/५

## २. उपचारमिश्रलक्षणा

अस्य भेदस्य चतुर्भेदता शुद्धागौणरूपमुखेन उपचारं मत्वा तयोः शुद्धोपचारगौणोपचारयोः सारोपा साध्यवसाना इति रीत्या प्रतिपादिता। तस्मात् उपचारमिश्रा चतुरवयवा तिष्ठति। ग्रन्थकारः तयोः द्विविधोपचारयोः भेदकं धर्मं कथयति -शुद्धोपचारस्य व्यवहारस्तत्र भवति यत्र मूलभूतोपमानोपमेयभावो न भवति। शुद्धोपचारे कार्यकारणभावादिसम्बन्धेन लक्षणा भवति। तत्र उपमानोपमेयभावाभावात् अन्यो हि भावो भवति।

### २.१ शुद्धोपचारः

शुद्धोपचारस्य उदाहरणमस्ति – 'आयुर्घृतम्' इति। अत्र घृतम् आयुषः कारणं घृतस्य च आयुः कार्यमिति। घृतनिष्ठकारणतानिरूपिता या आयुर्निष्ठकार्यता तद्वत् आयुः, यद्वा आयुर्निष्ठकार्यतानिरूपितघृतनिष्ठा या कारणता तद्वत् घृतम् इति उभयथान्वयः सम्भवति। तत्र द्वयोः परस्परं कार्यकारणसम्बन्धः अस्ति। अतः घृते आयुषः उपचारात् अयं शुद्धोपचारः भवति।

### २.२. गौणोपचारः

तद्भिन्नतया गौणोपचारः यत्र उपमानोपमेयभावाधारेण उपमानगत-गुणैस्तुल्यगुणसम्बन्धात् लक्षणा भवति तादृशे स्थले गुणाधारितः उपचारः भवति। अतस्तत्र गौणोपचारः इत्यभिहितं ग्रन्थकारेण। उदाहरणार्थम्– 'गौर्वाहीकः' अत्र गोगतजाड्यमान्द्यादिसदृशजाड्यमान्द्यादेः सम्बन्धाधारेण वाहीके गोशब्दः पठितः। गोनिष्ठगुणानां वाहीकस्य गुणेषूपचारो भवति[1]। केचिच्च उपचारे शब्दमात्रस्य उपचारं मन्वते। किन्तु मुकुलभट्टमतानुसारं शब्दोपचारः अर्थोपचारादृते भवितुं नैव शक्यः। अतस्तेन शब्देन उभयोरुपचारो ग्राह्यः।

---

1. अभिधा पृ.१६

उपर्युक्तविवेचनेन स्पष्टं भवति यत् मुकुलभट्टमते उपचारस्य अर्थः 'आरोपः' इति। इदमेव कारणं यत् एषः सादृश्येतरसम्बन्धेऽपि उपचारं मत्वा तस्य शुद्धगौणरूपेण भेदौ चकार।

अयं उपचारः अध्यारोपाध्यवसानत्वात् द्विविधो भवति।

**अध्यारोपः**

अध्यारोपपदार्थं ग्रन्थकारः वृत्तौ कथयति-यत्राध्यारोप्यारोपविषययोर्भेदमनपह्नूय वस्त्वन्तरे वस्त्वन्तरमुपचर्यते तत्रानपह्नुतस्वरूप एव वस्त्वन्तरे वस्त्वन्तरस्याधिकस्यारोप्यमाणत्वादध्यारोपः इति[1]। यदा आरोप्यमाण-आरोपाश्रययोः भेदम् अनपह्नूय एकवस्तुनि अपरवस्तुनः आरोपो भवति तत्र अध्यारोपभेदो भवति। एकवस्तुस्थः अपरस्मिन्नधिकगुणशालिवस्तुनि आरोपस्तेन अयं भेदः अध्यारोपः (अधि=अधिकारोपः)। इति कथ्यते। यत्र अध्यारोपः उपमानोपमेयभावाद् व्यतिरिक्तभावेन भवति। तत्र शुद्धाध्यारोपः। यत्र च उपमानोपमेयभावमुखेनैव अध्यारोपः तत्र गौणाध्यारोपः कथ्यते इति भेदः कृतः। शुद्धोपचारस्य 'आयुर्घृतम्' गौणोपचारस्य 'गौर्वाहीकः' उदाहरणं भवति। आयुर्घृतम् इत्यत्र आयुः आरोप्यमाणम् घृतम् आरोपाश्रयम् चेति। आयूरूपकार्यस्य घृतरूपकारणे उपचारः वर्तते। द्वयोः उपमानोपमेयभावातिरिक्तस्य कार्यकारणभावस्य सत्वात् तत्र शुद्धोपचाराध्यारोपः। गौर्वाहीकः इत्यत्र गौः उपमानम्, वाहीकः उपमेयः एवमेव गौः आरोप्यमाणा वाहीकः आरोपाश्रयः। गोगतगुणसदृशगुणस्य वाहीके आरोपात् अयं गौणोपाचाराध्यारोपः भवति।

**अध्यवसानम्**

यत्र तूपचर्यमाणविषयस्योपचर्यमाणेऽन्तर्लीनतया विवक्षितत्वात् स्वरूपस्य अपह्नुतेः आच्छादनं क्रियते तत्र तद् अध्यवसाम्।[2] तच्च शुद्धगौणभेदाभ्यां द्विविधं भवति।

---

1. तत्रैव, पृ.१८
2. अ.भिधा. पृ.१०

**शुद्धोपचारमूलकाध्यवसानस्य** उदाहरणम् ‘पञ्चालाः’ इत्यत्र पञ्चालशब्दः अभिधाशक्त्या पञ्चालजातेः बोधकः। लक्षणाशक्त्या अपत्यार्थस्य (पञ्चालनामकक्षत्रियस्य पुत्रविशषस्य) बोधकः अस्ति। लक्षितलक्षणया तद्देशविशेषस्य बोधकः अस्ति। अपत्यार्थस्य ज्ञानं लक्षणा द्वारा भवति पञ्चालनामकक्षत्रियपुत्रबहुत्वम् तस्यार्थः। किन्तु पञ्चालाः इति कथनात् निवासाधिकरणजनपादार्थे [1] पाणिनीयसूत्रशासनेन जनपदार्थस्य बोधपरतया अपत्यरूपलक्ष्यार्थे पुनः लक्षणाशक्त्या तन्निवासाधिकरणदेशरूपार्थस्य लक्ष्यार्थस्य प्रतीतिः भवति। प्रस्तुतोदाहरणे अपत्यरूपार्थः विषयी अस्ति यः जनपदरूपविषयं निगीर्णवान्। अत्र विषयविषयिणोः भेदपरतया प्रतिपत्तिः न जायते। एतादृशस्थले लक्षणा रूढिवशात् अभवत्। रूढेः एव कारणेन लक्षणा समाप्ता इति प्रतीयमाना भवति। अमुना प्रकारेण अत्र शुद्धोपचार-मूलकाध्यवसानोऽस्ति। **गौणोपचारमूलकाध्यवसानस्य** उदाहरणं भवति। ‘राजा’ राजशब्दः अभिधया क्षत्रियमात्रपरकः किन्तु यदि क्षत्रियगत-देशपरिपालनादिगुणस्य कस्मिंश्चित् शूद्रेऽपि अवस्थिततया गुणतुल्यवशात् लक्षणया सोऽपि ‘राजा’ कथ्यते। इति लोके लाक्षणिकः प्रयोगो वर्तते। गुणसादृश्यसत्वात् गौणोपचारोऽस्ति। क्षत्रियगतजनपदपरिपालनगुणसदृश-जनपदपरिपालनगुणयोगलक्षणपूर्वकतया गौणवृत्या युज्यते[2]’ इति अत्र शूद्रराजे क्षत्रियत्वारोपो विद्यते। एतत्स्थलेऽपि रूढिकारणात् एव गौणता भ्रंश्यमाना इति प्रतीयते। इत्युक्ते आपाततः अप्रतीयमाना विचारविमर्शात्पश्चात् जायमाना अस्ति। एतदुदाहरणे ‘क्षत्रियराजेन शूद्रत्वेन प्रजापालकत्वम्’ निगीर्य अध्यवसानं कारितम्। अतः इहापि अध्यवसानं वर्तते। उक्तरीत्या उपचारं चतुर्धा विभज्य शुद्धायाः उपादान-लक्षणलक्षणां च परिगणय्य साकल्येन मुकुल-भट्टाचार्यः लक्षणायाः षट् प्रकारान् अमन्यत। पूर्वोक्तोदाहरणे पञ्चालाः इत्यत्र जनपदरूपः अर्थः मुकुलभट्टेन लक्षितलक्षणागम्यः स्वीकृतः।

---

1. पा.अ.४/१/१६८
2. तत्रैव, पृ.१०

**लक्षितलक्षणा**- १ **शाबरभाष्येऽपि** लक्षितलक्षणायाः आभा प्राप्यते 'सैषा लक्षितलक्षणा स्यात्[1]' इत्युक्तम्।

**कुमारिलभट्टोऽपि** टुप्टीकायाम् एतत्सन्दर्भे तां सम्बन्धरूपाम् अवादीत् यथा – 'लक्षितलक्षणायां गृह्यमाणायां फलकल्पना च भवति'। तदा लक्षितलक्षणया धर्माणां सम्बन्धः। तस्माल्लक्षणां श्रुतिर्ब्रवीति लक्षितलक्षणापेक्षया। एतेन तत्र सम्बन्धविशेषः लक्षितलक्षणा इति कथितम्[2]।

२.**न्यायदर्शने**- प्राक्तननैयायिकास्तु तां द्वितीयां वृत्तिं कथयन्ति, किन्तु अर्वाक्तननैयायिकाः, न्यायसिद्धान्तमुक्तावल्यां शक्यार्थस्य परम्परासम्बन्धरूपां लक्षणां लक्षितलक्षणां सङ्केतयन्ति। यथा – 'द्विरेफमानय' इत्यादौ उदाहरणे द्विरेफपदस्य शक्यार्थः रेफद्वयं, तस्य सम्बन्धिरूपभ्रमरशब्दः लक्ष्यार्थः, पुनः तत्सम्बन्धिरूपलक्ष्यार्थः पुष्पपाता भ्रमरविशेषः[3]। एवं लक्षितलक्षणा व्याख्याता। ३. वेदान्तदर्शने वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रः लक्षितलक्षणां सोदाहरणं न्यरूपयत्। तत्र सर्वप्रथमं लक्षणायाः केवलं लक्षणा लक्षितलक्षणेति उभयविधः निरूपितः[4]। यत्र शक्यार्थेन सह परम्परासम्बन्धेन अर्थान्तर-प्रतीतिर्भवति, सा लक्षितलक्षणा कथ्यते। यथा – 'द्विरेफः' इत्यत्र रेफद्वयवान् इत्यर्थे अभिधा, भ्रमरविशेषार्थे लक्षणा, तस्मात् परम्परासम्बन्धेन मधुकरे पुनर्लक्षणा भवति। इयमेव लाक्षितलक्षणा भवति। ग्रन्थकारः इमामेव गौणीवृत्तिं जगाद। यथा – सिंहो माणवकः इत्यत्र सिंहशब्दाभिधेयार्थः पशुविशेषः तद्गतशौर्यक्रौर्यगुणादिसम्बन्धात् माणवकस्य प्रतीतिः भवति[5]। ४. व्याकरण-शास्त्रेऽपि नागेशभट्टः परमलघुमञ्जूषायां लक्षितलक्षणोदाहरणे द्विरेफः इत्युदाहरणं प्रास्तौत्। ध्वन्यालोकलोचनबालप्रियाटीकायां लक्षितक्षणायाः टीकाकारेण सर्वग्राह्यमुदाहरणं कथितम् –

---

1. (मी.सू. ९/१/३,शा.भा.,टु.टी मी., द. ५. पृ.६७
2. मी.सू. ९/१/३/ शा.भा. टु.टी.मी.द. (६) पृ – ६९
3. (न्या.सि.मु.श.घ. पृ- ५७-५२)
4. वे.प., १२१
5. परम्..पृ.५३५

आ हन्त किमिदं तन्वि! नेत्रयोः श्रावणस्तव।
शरत्कपोले ग्रीष्मोऽङ्गे शिशिरो मुखपङ्कजे ॥[1]

अत्र तन्व्याः नेत्रयोः श्रावणमासकथनमिति बाधितमुख्यार्थः। ततः लक्षणाद्वारा एतस्यार्थः वर्षा, किन्तु नेत्रस्थवर्षायाः असम्भवात् तस्य वर्षारूपे बाधितार्थे सति पुनः लक्षणया अश्रुरूपार्थस्य बोधः कार्यते। इयं लक्षणैव लक्षितलक्षणा ज्ञेया।

इत्थं शब्दशक्तिप्रकरणे विभिन्नविपश्चिद्भिः लक्षितलक्षणापि मुख्यतया प्रतिपादिता। प्रायशः ग्रन्थेषु इयं लक्षणाभेदरूपान्तर्गता भिन्नभेदतया न गणिता। परन्तु मुकुलभट्टेन प्रयुक्तलक्षितलक्षणाप्रयोगेण इदमेव निश्चीयते यत् एषा लक्षणाभेदः न। तन्मते तु लक्षितलक्षणा द्विपदगामिनी पञ्चालाः इत्यादिस्थलेषु प्रयुज्यते। उपर्युक्तविवरेण स्फुटं यत् द्विरेफशब्दः लक्षितलक्षणायाः प्रसिद्ध-तमोदाहरणम् अस्ति। ग्रन्थकारेणापि तदेवोदाहरणं ग्रन्थेऽपि स्वीकृतम्। किन्तु तत्र वृद्धव्यवहारानुगता रूढिलक्षणा मता इति।

उपर्युक्तविषयावबोधनाय चित्रमधो लिखितरूपेण प्रस्तुतमस्ति-

| |
|---|
| **लक्षणा षड्विधा** |
| शुद्धा(२)उपचारमिश्रा(४) लक्षितलक्षणा |
| उपादानलक्षणालक्षणलक्षणा शुद्धोपचारः गौणोपचारः उदा-द्विरेफः |
| १.गौरनुबन्ध्यः, उदा- गङ्गायाङ्घोषः. |
| २.पीनो देवदत्तः दिवा न भुङ्क्ते अध्यारोपः अध्यवसानः अध्यारोपः अध्यवसानः |
| उदा-आयुर्घृतम् उदा-पाञ्चालः, उदा- गौर्वाहीकःउदा-राजा |

**अभिनवगुप्तमते लक्षणाभेदः**

अभिनवगुप्तः मुकुलभट्टादुत्तरवर्ती मम्मटभट्टात्पूर्ववर्तीति काव्य-समालोचकैः उच्यते। लक्षणाभेदनिरूपणम् ऐदम्प्राथम्येन मुकुलभट्टेन कृतम्।

1. ध्व.लो.,१/७

किन्तु इतोऽपि भेदानां स्पष्टीकरणं तन्निरूपणं च काव्यप्रकाशकारेण व्यधीयत। ध्वन्यालोके ध्वनिविरोधिनाम् भट्टनायकप्रभृतीनाम् आचार्याणां मतं निरस्य ध्वनिस्थापानावसरात् पूर्वं भाक्तवादमतस्य निरूपणावसरे भक्तेः अनेकविधां व्युत्पत्तिं विधाय तदर्थः उक्तः। तदा स लक्षणाभेदविषयिणीम् एकां कारिकाम् अलिखत्। परमार्थतस्तु वृत्तिविषयस्योपरि स्वकीयं मौलिकं ग्रन्थम् अभिनवगुप्तः न लिलेख। किन्तु लोचनटीकायामेव प्रसङ्गवशात् वृत्तिविषयः तेन अवश्यमेव उत्थापितः। लक्षणावृत्तिरेव भक्त्युपचारगौणादिपदेन उपपादिता चर्चिता च। या लक्षणाभेदपरका कारिका लोचने प्राप्यते सा अभिनवगुप्तस्य कारिका न। यतो हि ततः पूर्ववर्तिनः मुकुलादयः तां मीमांसाशास्त्रज्ञस्य भर्तृमित्रस्य कारिकाम् आमन्यन्त। भर्तृमित्रस्य एकोऽपि ग्रन्थः काव्यशास्त्रे न लब्धः। परं सा कारिका अभिनवगुप्तग्रन्थपठिता नेति विवादस्तु भवितुमर्हः। परम् अभिनवगुप्तेनापि सा कारिका उक्ता। तस्मात् तत्समये अभिधेयस्य सामीप्यादिसम्बन्धविशेषैः लक्षणायाः पञ्चभेदा मताः इति वक्तुं शक्यते।

अभिधेयेन सामीप्यात्सारूप्यात्समवायतः।
वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता[1]॥

यत्र अभिधावृत्तिबोधितस्य अर्थस्य सामीप्येन सारूप्येण समवायेन वैपरीत्येन क्रियायोगेन सह सम्बन्धो भवति सा लक्षणा पञ्चप्रकारा भवति। सम्बन्धाधारेण अयं भेदप्रकारः कृतोऽस्ति।

१. सामीप्यलक्षणोदाहरणम्-'गङ्गायां घोषः' सामीप्यसम्बन्धेन गङ्गा-शब्दः सम्बन्धिनं तीररूपार्थं लक्षणया अवगमयति।

२. सारूप्यलक्षणोदाहरणम्–

भ्रमर भ्रमता दिगन्तराणि क्वचिदासादितमीक्षितं श्रुतं वा।
वद सत्यमपास्य पक्षपातं यदि जातीकुसुमानुकारिपुष्पम् ॥

अत्र हि भ्रमरपुष्पादिशब्दः सम्बोधनरूपार्थे अन्यथानुपपत्त्या बाधितमुख्यार्थः सन् अभिधेयस्य सादृश्यात् तद्गतगुणसदृशगुणप्रयुक्तमर्थान्तरं

---

1. ध्व.लो.टी.,पृ.३१

लक्षणया बोधयति। अतः अत्र सारूप्य (सादृश्य) लक्षणा कथनीया।

उदाहरणम्–'गौर्वाहीकः' इत्यत्र गोगतजाड्यमान्द्यादिगुणैः सह वाहीकगतजडतामन्दतादिगुणानां सादृश्यसम्बन्धात् एषा सारूप्यलक्षणा। सारूप्यम् इत्यस्यार्थः समानरूपता इति।

३. समवायलक्षणोदाहरणम्– 'छत्रिणो यान्ति' इत्यादौ वहुवचन-प्रयोगान्मुख्यशब्दार्थबाधः। न चैकस्मिन् छत्रिणि बहुवचनस्य प्रयोगः उपपद्यते। अतः अत्र गमनक्रियायां छत्रिणा सह योऽसौ छत्रशून्यानां समवायः (साहचर्यम्) तद्वशात् छत्रिशब्देन छत्रशून्या अपि लक्षणया प्रत्यायन्ते। तस्मादियं समवायलक्षणा।
४. विपरीतलक्षणोदाहरणम्- 'भद्रमुखाः' इत्यत्र भद्रमुखशब्दस्य अभद्रमुखे प्रयोगात् स्वार्थबाधः। अतोऽसौ वाच्यभूतभद्रमुखत्व-विपरीतत्वादभद्रमुखत्वं विपरीतनिबन्धनतया लक्षणया प्रत्याययति।
५. क्रियायोगलक्षणोदाहरणम् – 'पृथुरसि गणैः कीर्त्या रामो नलः' इत्यत्र हि अशत्रुघ्ने शत्रुघ्नशब्दप्रयोगान्मुख्यशब्दार्थबाधः। शत्रुघ्नशब्दश्च अशत्रुघ्ने शत्रुहननक्रियाकर्तृत्वयोगाल्लक्षणया तादृशः प्रयोगः कृत इति।

अनया पद्धत्या लोचनटीकायां पठितायाः कारिकायाः माध्यमेन इदं सिद्ध्यति यद् अभिनवगुप्तपादाचार्यमते लक्षणायाः पञ्चभेदा आसन् इति ज्ञातम्।

**लक्षणा पञ्चधा**

१. सामीप्यसम्बन्धा उदा.-गङ्गायांघोषः
२. सारूप्यसम्बन्धा उदा.- भ्रमर भ्रमता दिगन्तराणि क्वचिदासादितमीक्षितं श्रुतं। वद सत्यमपास्य पक्षपातं यदि जातीकुसुमानुकारिपुष्पम् ॥'
३. समवायसम्बन्धा उदा.- 'छत्रिणो यान्ति'
४. विपरीतसम्बन्धा उदा.-'भद्रमुखाः'
५. क्रियायोगसम्बन्धा उदा – 'पृथुरसि गणैः कीर्त्या रामो नलः'

**महिमभट्टमते लक्षणाभेदाः**

महिमभट्टः व्यक्तिविवेकाख्यं ग्रन्थं ध्वनिप्रत्याचक्षणाय अरचयत्। एषः न्यायशास्त्राचार्यः किञ्चित् न्यायशास्त्रशैल्या स्वाभिनवयुक्तिभिः ध्वनि-सिद्धान्तम् अखण्डयत्। एतन्मतेऽपि तिस्रः शक्तयः सन्ति। शब्दगता अभिधा, अर्थगता लक्षणा, अनुमानसाध्या व्यञ्जनेति।

अन्त्योऽनुमेयो भक्त्या तु तस्य व्यङ्ग्यत्वमुच्यते।
भक्तेः प्रयोजनांशो यश्चमत्कारित्वलक्षणः[1]॥

व्यञ्जनाया स्थाने अनुमानं, व्यङ्ग्यस्य स्थाने अनुमेयं, तस्य अनुमेयस्य प्रतीतिः लक्षणया भवति। यतोहि लक्षणायाः प्रयोजनांशः चमत्कारमात्रम्। लक्षणा एव लिङ्गपदेन कथ्यते। लक्षणा अनुमेययोः लिङ्गलिङ्गिभावः साध्यसाधनभावः वा सम्बन्धः स्वीक्रियते। एषः अभिनव-गुप्तोक्तान् भेदान् एव लक्षणाभेदतया अगृह्णात्। एतन्मतानुसारं 'गङ्गायां घोषः' इत्यत्र गङ्गादिषु पदेषु घोषादिपदस्य अधिकरणता बाधिता। ततः गङ्गापदार्थः केनचित् सम्बन्धेन स्वसम्बन्धिततया तटादिपदार्थान्तरम् अनुमापयति इत्याशयः। केवलम् एकं सादृश्यमेव तत्त्वारोपाय हेतुः न भवति। अपि तु सम्बन्धसमवायादिरपि तत्र कारणं भवति। अतः गङ्गादेः सम्बन्धद्वारा आरोपिततटादिः अर्थः अनुमेयः भवति। लक्षणायाः प्रयोजनं तटादौ आरोप्यमाणगङ्गावस्तुनि शीतलतापवित्रतादि न तु सामीप्यसादृश्यादि। लक्षणायाः पञ्चधात्वं समर्थयन् प्राचां कारिकां निर्दिशति-

अभिधेयेन सम्बन्धात् सादृश्यात् समवायतः।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता[2] ॥

**लक्षणा पञ्चधा**

अभिधेयस्य अर्थान्तरेण सह सम्बन्धविशेषाधारेण लक्षणाप्रकाराः

१. सामीप्यसम्बन्धः

---

1. व्यक्ति, प्र.वि., पृ.८६
2. तत्रैव, पृ.८९

२. सादृश्यसम्बन्धः
३. समवायसम्बन्धः
४. वैपरीत्यसम्बन्धः
५. क्रियायोगसम्बन्धः

इति। अभिधेयस्य सम्बन्धविशेषमुखात् इमे लक्षणायाः प्रकाराः सम्भवन्ति।

एवं शैत्यादितत्त्वारोपात् आरोप्यमाणस्य संयोगादिसम्बन्धस्य अनेकप्रकारतया इमे भेदाः भवन्ति। ततः महिमभट्टः लक्षणां पञ्चविधां स्वीचकार।

**भोजराजमते लक्षणाभेदः**

श्रृङ्गारप्रकाशे सप्तमप्रकाशे भोजराजः शब्दार्थनिरूपणावसरे शब्दार्थयोः अभिधाविवक्षातात्पर्यादिमुखेन द्वादशसम्बधमाह। तत्र शब्दार्थाभिधायिनी शक्तिः अभिधेति। अभिधेयबोधने शब्दः वृत्तित्रयेण प्रवृत्तो भवति। ताः मुख्यागौणीलक्षणा भवन्ति। एतेन लक्षणाव्यतिरिक्ता गौणी वृत्तिः कथिता। गुणसादृश्यादागता गौणी, तस्या धर्मगुणाकृतिक्रियास्वरूपजातयः प्रवृत्तिनिमित्तभेदात् षट् प्रकारा स्वीकृताः।

गौणी-

१ धर्मनिमित्ता २ गुणनिमित्ता ३ आकृतिनिमित्ता ४ क्रियानिमित्ता ५ स्वरूपनिमित्ता ६ जातिनिमिता इत्येवं गौण्याः षड्भेदान् सङ्कीर्त्य भोजराजः लक्षणायाः प्रथमतः लक्षणा लक्षितलक्षणा इति भेदद्वयम् अकरोत्। का नाम लक्षणा इत्युक्ते सति तामाह-'तयोर्यस्यामुपात्तशब्दस्यार्थस्य क्रियासिद्धौ साधनत्वायोगात् स्वार्थोऽविनाभूतमर्थान्तरं व्यवहितमेव लक्षयति सा लक्षणा' इति। शक्यार्थेन शक्यार्थान्तरप्रतीतिरेव लक्षणा इत्याशयः। लक्षितलक्षणा नाम – तद्व्यतिरिक्ता वक्ष्यमाणानेकरूपा। तत्र लक्षणा सामीप्यसाहचर्यसहचरितहेतुतादर्थ्यपरिमाणभेदात् षट्प्रकारा भवति।

**विमर्शः**

अन्याचार्येभ्यः प्राचीनार्वाचीनेभ्यः भोजराजस्य अयमेव भेदः लक्ष्यते यत्

गौणीलक्षणां वृत्तितया परिकल्प्य तद्भेदाः षण्मताः इति। मम्मटमुकुलभट्टादयः इमां लक्षणायामेवान्तर्भावयन्ति। रुय्यकहेमचन्द्रादयः गौणार्थं परिभाष्य तां लक्षणाभिन्नां वृत्तिं स्वीकुर्वन्ति।। भोजमते तु गौणीलक्षणे द्वेऽपि अभिधा-व्यापाररूपे एव मते। एतत्प्रसङ्गे तु एतस्य मुकुलभट्टमहिमभट्टाभ्यां सह समानता वर्तते। ताभ्यां लक्षणा पृथग्वृत्त्यङ्गीकारापेक्षया अभिधायामेव गतार्थीकृता। किन्तु महिमभट्टमतात् मुकुलभट्टीयमतम् एतदर्थं भिद्यते यत् सः लक्षणामङ्गीकृत्य तत्प्रकारान् पर्यभाषत। आचार्यभोजः लक्षणायाः साकल्येन सामीप्यादिषड्भेदैः द्वादशविधतां स्वीकरोति। मुकुलभट्टाभिनवगुप्तादयः लक्षणायाः सम्बन्धत्वेन इमान् भेदां स्वीचक्रुः। भोजराजः लक्षितलक्षणायाः षट् प्रकारान् आह – रूढलक्षणा प्रतीकलक्षणा विवक्षितलक्षणा विरुद्ध-लक्षणातदन्यलक्षणा प्रकीर्णलक्षणा चेति। एषः वैपरीत्यलक्षणां लक्षित-लक्षणाकोटौ निदधाति। पूर्वाचार्यैः लक्षणाहेतुभूता रूढिः भेदतया लक्षितलक्षणायामेव स्वीकृता। भेजराजस्य लक्षणास्वरूपतद्भेदनिरूपणम् अभिनवशैल्या ग्रथितमस्ति। लक्षणानिरूपणं सौलभ्येनाधिगमयितुं चित्रकदम्बकमधः प्रस्तुतमस्ति।

शब्दर्थौ साहित्यं द्वादशविधम् अभिधा.......

अभिधा

मुख्या-गौणी-लक्षणा

लक्षणा षड्विधा- गौणी षड्विधा- लक्षितलक्षणा षड्विधा

१ सामीप्यलक्षणा उदा-गङ्गायां घोषः। १ धर्मनिमित्ता १.रूढालक्षणा उदा-दुरोदरत्वं द्विरेफत्वं चकुररो,

२ साहचर्यलक्षणा उदा-कुन्ताःप्रविशन्ति। २ गुणनिमित्ता २.प्रतीकलक्षणा उदा-भीमो भीमपराक्रमः

३ सहचरितलक्षणा उदा-धर्मः। ३ आकृतिनिमित्ता ३.विवक्षितलक्षणा उदा-विष्टिर्भद्रा,

४ हेतुलक्षणा उदा-आयुर्घृतम्, त्वं जीवितं त्वमसि मे। ४ क्रियानिमित्ता ४.विरुद्धलक्षणा उदा-

| |
|---|
| ५ तादर्थ्यलक्षणा उदा-दण्डः,। ५ स्वरूपनिमित्ता ५.तदन्यलक्षणा उदा-अम्लानमानाय.... <br> ६ परिमाणलक्षणा उदा-प्रस्थः ६ जातिनिमित्ता ६.प्रकीर्णलक्षणा उदा. सुपर्णपुष्पां पृथिवीम्..... |

एवं गौण्याः षड्भेदैः लक्षितलक्षणायाः षड्भेदैश्च द्वादशभेदाः सम्भवन्ति, अन्यैः षड्भेदैस्सह साकल्येन अष्टादशविधत्वं सम्भवति लक्षणायाः।

**मम्मटाचार्यमते लक्षणाभेदः**

मम्मट्टाचार्यस्य काव्यप्रकाशे शब्दव्यापारविचाराख्ये ग्रन्थे च लक्षणाशक्तिनिरूपणात्परं लक्षणायाः भेदविषये प्रपञ्चेन चर्चा प्राप्यते। तत्र मीमांसकमतानुयायिनः मुकुलभट्टस्य प्रसङ्गोऽपि उपनिबद्धः वर्तते। मम्मटाचार्योऽपि साक्षात् मुकुलभट्टोक्तलक्षणाभेदविवेचनेन प्रभावितः दृश्यते। किन्तु बहुषु स्थलेषु तन्मतं नाद्रियत इति तदनुग्रन्थपरिशीलनेन अधिगम्यते। ततः लक्षणाभेदविषयकचर्चां प्राप्य काव्यप्रकाशे स्वच्छन्दतया परिष्कृतरूपेण लक्षणाभेदविषयं न्यरूपयत् मम्मटभट्टः। तस्मात्तदीयः ग्रन्थः काव्यशास्त्रे प्रसिद्धोऽभवत्। तत्र प्रथमन्तावत् लक्षणानिरूपणात् परम् उपादानलक्षणा लक्षणलक्षणा इति भेदौ दर्शितौ।

**उपादानलक्षणा**

यत्र शब्दः स्वान्वयसिद्ध्यर्थं अन्यार्थमाक्षिप्य स्वयं तिष्ठति सा उपदानलक्षणा कथ्यते[1]।

उदाहरणम्- 'कुन्ताः प्रविशन्ति' इत्यत्र कुन्तानाम् अचेतनतया प्रवेशक्रिया अनुपपन्ना इति कुन्तशब्दस्य मुख्यार्थबाधः। ततः कुन्तशब्दः लक्षणया स्वस्य प्रवेशक्रियायामन्वयसिद्धये तद्धारिपुरुषम् आक्षिप्य कुन्तधारिपुरुषरूपेण तिष्ठति। पराक्षेपग्रहणात् इयम् उपादानरूपा भवति।

---

1. स्वसिद्धये पराक्षेपः इति उपादानम्, का.प्र., पृ.२/१४

**लक्षणलक्षणा**

उपर्युक्तलक्षणविपर्ययेण, यत्र एकः शब्दः प्रयुक्तस्य द्वितीयशब्दस्य अन्वयसिद्धये स्वार्थं समर्प्य अन्यार्थं बोधयति सा लक्षणलक्षणा[1]। उदाहरणम्-'गङ्गायां घोषः' इत्यत्र गङ्गा शब्दः प्रयुक्तस्य घोषपदस्य आधेयत्वरूपेण अन्वयस्योपपादनाय स्वं जलप्रवाहम् अर्थं परित्यज्य सामीप्यसम्बन्धेन लक्षणया तटरूपम् अन्यार्थं ज्ञापयति, स्वार्थत्यागात् अन्यार्थबोधकत्वेन इयं लक्षणलक्षणा कथ्यते। ततः सारोपा साध्यवसना इति भेदौ दर्शितौ

**सारोपा**

यत्र उपमानोपमेये आरोप्यमाणारोपविषयौ वा शब्दतः अभिहितौ भवतः सा सारोपानामा लक्षणाभेदो भवति[2]।

**साध्यवसाना**

यत्र उपमानोपमेययोः आरोप्यमाणारोपविषययोः वा उपमानेन उपमेयस्य निगिरणम् आच्छादनं वा क्रियते सा साध्यवसाना[3] भवति। सारोपासाध्यवसाने शुद्धगौण्योः भेदत्वेन स्वीकरोति मम्मटाचार्यः। यदा सारोपासाध्यवसाने सादृश्यसम्बन्धेन भवतस्तदा गौणी। यदा च सादृश्यभिन्नसम्बन्धेन कार्यकारणादिरूपेण भवतस्तदा शुद्धा।

सादृश्यसारोपा-गौर्वाहीकः अत्र उपमानभूतस्य गोः उपमेयभूतस्य वाहीकस्य शब्दतः कथनात् सारोपा, सादृश्यसम्बन्धेन गोनिष्ठजाड्य-मान्द्यादिगुणानां वाहीके जाड्यमान्द्यादिगुणसादृश्याद् गोपदव्यवहारः कृतः। तस्मात् सादृश्यसारोपा।

**सादृश्यसाध्यवसाना**-गौरयम्। अत्र विषयिणः गोमात्रस्य शब्दोपातत्वात् साध्यवसाना। वाहीके गोगतगुणसादृश्याद् वाहीक इति शब्दस्य प्रयोगाभावेऽपि गवैव तद्व्यवहारः कृतः इति सादृश्यसाध्यवसाना लक्षणा।

---

1. परार्थं स्वसमर्पणम्, का.प्र., पृ.२/१४
2. का.प्र, पृ.२/१६
3. का.प्र, पृ.२/१६

**सादृश्येतरसारोपा**-आयुर्घृतम् अत्र आयुर्घृतयोः आरोप्यमाणारोपविषययोः द्वयोः शब्दशः कथनात् सारोपा। आयुर्निष्ठकारणतानिरूपितघृतनिष्ठा या कार्यता इत्यतः सादृश्येतरेण कार्यकारणादिसम्बन्धेनेयं शुद्धासरोपा।

**सादृश्येतरसाध्यवसाना**-आयुरेवेदम्। अत्र आरोप्यमाणेन आयुष्कार्येण आरोपविषयस्य घृतकारणस्य निगीर्णत्वात् सादृश्येतरसाध्यवसाना भवति। काव्यप्रकाशकारः गौणीसाध्यवसानासम्बन्धीनि त्रीणिमतान्युपस्थापयति। गौणीसाध्यवसानायाः उदाहरणम्गौरयम् अत्रगोशब्देन वाहीकपदार्थस्य निगीर्णत्वात् गोपदेन तस्य पदार्थस्य प्रतिपत्तिः कथमिति विषये बहूनां काव्यशास्त्रविदां कथनमार्गः भिद्यते। ततस्तेषां समेषां मतानि त्रेधाकृत्य ग्रन्थकर्ता काव्यप्रकाशे उपनिबबन्ध।

**प्रथमम्**-अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति इति केचित्।

**द्वितीयम्**- स्वार्थसहचारिगुणाभेदेन परार्थागता गुणा एव लक्ष्यन्ते न परार्थोऽभिधीयते इत्यन्ये।

**तृतीयम्**-साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे[1]।

**प्रथममतानुसारं** गौरयम् इत्यत्र गोशब्दस्य स्वार्थस्य सहचारिजडतामन्दतादयः गुणाः लक्षणाशक्त्या ज्ञायमानाः सन्तः अपि अभिधाशक्त्या गोशब्देन वाहीकरूपार्थस्य बोधने प्रवृत्तिहेतवो जायन्ते इति।

**द्वितीयमतानुसारम्** गोपदार्थस्य सहचारिजाड्यमान्द्यादिगुणानाम् अभिन्न-रूपेण वाहीकनिष्ठान् जाड्यमान्द्यादिगुणान् एव लक्षणा कथयति। किन्तु ते गुणा अभिधया वाहीकार्थस्य बोधने प्रवृत्तिहेतवो न भवन्ति इति।

**तृतीयमतानुसारं** गोवाहीकयोः वर्तमानानां समानगुणानाम् आश्रयतया वाहीकार्थः लक्षणया उपस्थापितो भवति इति केषाञ्चन मीमांसकानां मतम्।

अत्र त्रयाणामपि मतानामुपस्थापने मम्मटाचार्यस्य अनादरः नास्ति, न च किमपि मतं काव्यप्रकाशकारसम्मतं वर्तते। टीकाकाराः तृतीयमतं

---

1. का.प्र.,पृ.६५

मीमांसकानां मुकुलभट्टादीनां मत्वा बहुत्र मुकुलभट्टानुकरणात् मम्मट्टीयं मन्यन्ते।

कुमारिलोक्तकारिकाम् उदाहृत्य तत्र पठितस्य अविनाभूतपदस्य सम्बन्धमात्रतां व्याख्याति। सम्बन्धमात्रास्वीकारे नान्तरीयकत्वस्य व्याप्ति-रूपार्थस्य वा स्वीकारेण मञ्चाः क्रोशन्ति इत्यादिस्थलेषु मञ्चपदस्य मञ्चस्थपुरुषे लक्षणा न भविष्यति। ततः व्याप्त्यर्थे सति अनुमानेन लक्ष्यार्थस्य सिद्धतया लक्षणाप्रसङ्गः न जागरिष्यति। अतः केवलं सम्बन्धमात्रार्थ एव स्वीकार्यः न तु व्याप्त्यर्थः इति मम्मटो निर्दिशति।

गौणीलक्षणायां ताद्रूप्यप्रतीतिः सर्वथाभेदावगमश्च शुद्धायां च कार्यकारित्वादि प्रयोजनं भवति।

कार्यकारणभावमतिरिच्यापि क्वचित् तादर्थ्यादिभिः सम्बन्धैः उपचारः 'अन्यवस्तुनि अन्यवस्तुवाचकशब्दप्रयोगः' इतीमानि शुद्धायाः स्थलानि भवन्ति। यथा-

१. तादर्थ्यसम्बन्धेन यथा- इन्द्रार्था स्थूणा 'इन्द्रः'।

२. स्वस्वामिभावसम्बन्धेन यथा- राजकीय पुरुषो 'राजा'।

३. अवयवावयविभावसम्बन्धेन यथा- अग्रहस्तः इत्यत्र अग्रमात्रे अवयवे 'हस्तः'।

४. तात्कर्म्यसम्बन्धेन यथा- अतक्षा 'तक्षा'इतिव्यवहारोभवति।

ये उक्तभेदाः दर्शिताः, तस्मात् साकल्येन लक्षणा षड्विधा भवति। तत्र व्यङ्ग्यरहिता रूढिमती व्यङ्ग्यसहिता प्रयोजनवती। व्यङ्ग्यं गूढागूढतया द्विविधं भवति। तस्मात् व्यङ्ग्यमुखेन लक्षणा त्रिविधा भवति। अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति। इत्थं मम्मटाचार्यकृतकाव्यप्रकाशग्रन्थ-परिशीलनेन लक्षणाविभागः प्राप्यते।

सर्वाधिगमनाय लक्षणाभेदनिरूपणं चित्र्यते

| |
|---|
| लक्षणा षड्विधा-<br>शुद्धा (४)गौणी (२)<br>उपादानलक्षणालक्षणलक्षणासारोपासाध्यवसानासारोपासाध्यवसाना<br>उदा.-कुन्ताःप्रविशन्ति, उदा.गङ्गायाङ्घोषः उदा.आयर्घृतम् उदा.आयरेवेदम्<br>उदा.गौर्वाहीकः उदा.गौरयम् |

३.अर्वाचीनालङ्कारिकाणां मम्मटभट्टोत्तरवर्तिनां रुय्यकात्प्रभृतिआशाधर-भट्टपर्यन्तानां लक्षणाभेदाः।

**राजानकरुय्यकमते लक्षणाभेदाः**

आचार्यरुय्यकः साहित्यमीमांसाग्रन्थे वृत्तेः त्रीन् प्रकारान् अभिधालक्षणागौणीः अभ्युपगम्य लक्षणायाः व्यतिरिक्तरूपेण गौणीवृत्तिं स्वीकरोति। लक्षणाभेदनिरूपणे एष स्वकीयया अभिनवविचारसरण्या केवलं पदप्रयोगाभावाद् वृत्तित्रयस्यापि वाक्यकाले एव प्रतिपत्तिं मनुते।। अनेन लक्षणागौण्योः वृत्त्योः प्रयोजकहेतू स्वीकृतौ। उक्तञ्च –

पदान्तरान्वयवशात् तदर्थानुपपत्तितः।
वृत्तिजघन्ये उन्नेये तत्र तत्रोपयोगतः[1] ॥

लक्षणायाः गौण्याश्च स्वीकरणाय अन्येन पदेन सहान्वयः (लक्षकस्य लक्ष्येण सम्बन्धः) मुख्यार्थस्य अनुपपत्तिरिति हेतुद्वारा लक्षणायाः विभागः दर्शितः इति मे भाति। अथ च लक्षणाभेदविषये ग्रन्थकारः प्राग्वर्तिनोः आचार्ययोः जैमिनिगौतमयोः मतमुज्जहार–

यथा – जैमिनीयम्

तत्सिद्धिजातिसारूप्यप्रशंसालिङ्गभूमयः।
वृत्तिः परत्र शब्दस्य प्रवृत्तिर्जैमिनीरिता ॥

गौतममतम्

वृत्तिर्याप्यक्षपादोक्ता साहचर्यादिहेतुका।
वृत्त्योर्जघन्ययोरन्तर्द्रष्टव्या सकलापि सा[1] ॥

1. सा.मी.,पृ.३

जैमिनिना मीमांसासूत्रे तत्सिद्ध्यादिभिः पञ्चभिः प्रकारैः एकैकमुदाहरणं दर्शयित्वा लक्षणाभेदा उक्ताः। गौतममहर्षिणा न्यायसूत्रे सहचरणस्थानतादर्थ्यवृत्तमानादिभिः उपचारप्रकारैःलक्षणाभेदाव्याख्याताः।

'अग्निर्वै ब्राह्मणः' 'आदित्यो यूपः' 'यष्टिकान् भोजय' मञ्चाः क्रोशन्तीत्यदीनि उदाहरणानि साहित्यमीमांसाकारः गौणीलक्षणयोः गतार्थयति। समासतः ग्रन्थकारेण ऋषिद्वयप्रतिपादितलक्षणासम्बन्धान् उदाहृत्य तद्गौणलक्षणयोरन्तर्भावयता पृथक्तया स्वमतम् अनुक्त्वैव तन्मतमेव समर्थितम्। अतः एतस्य आयासः लक्षणानिरूपणे आसीत् न तु तद्भेदपरिगणने। विशिष्य एषः लक्ष्यार्थस्य अन्वयसिद्ध्यर्थं लक्षणां गौणीं च वृत्तितया अभ्युपेति।

**हेमचन्द्रमते लक्षणाभेदः**

काव्यानुशासनस्य रचयिता हेमचन्द्रो यद्यपि स्वग्रन्थस्य रचनायां काव्यप्रकाशम् आधारतया आश्रयत्। किन्तु अयं ग्रन्थे कुत्रापि लक्षणाविभागविषयमेव नोपास्थापयत्। असौ शब्दस्य चातुर्विध्यं विधाय गौणीं लक्षणातः पृथग् अङ्ग्यकरोत्। लक्षणायाः भेदम् अप्रकाशयन् हेमचन्द्रः गौणार्थलक्ष्यार्थयोः कुक्षौ क्रमशः 'गौर्वाहीकः' 'गौरयम्' 'आयुर्घृतम्' 'आयुरेवेदम्' इत्युदाहरणानि प्रदर्श्य प्रत्येकमर्थं व्याख्यात्। अन्यच्च 'समारोपितः' 'अध्यवसितः' इत्याद्यः शब्दा अपि एतदीयग्रन्थेषु समुपलभ्यन्ते। यथा निर्दिष्टं ग्रन्थे– सत्यारोप्यारोपविषययोर्भेदेनाभेदेन च समारोपितोऽतथाभूतोऽपि तथात्वेनाध्यवसितः [2]इति।

**केशवमिश्रमते लक्षणाभेदः**

एषः न्यायवैशेषिकसम्प्रदायानुयायी न्यायशैल्यैव अलङ्कारशेखरे लक्षणां विवेचयामास। तत्रस्पष्टतया तस्याः भेदविषये मौनमाचरत्। सम्बन्धस्य यदि प्रकारान् परिशीलयामः सादृश्यं सादृश्येतरत् इति तस्मात् गौणी शुद्धा इत्यभियुक्तैः उक्तम् । अतो न्यूनतः शुद्धागौण्योः प्रकारयोः तु अभ्युपगतिरिति लक्ष्यते।

---

1. सा.मी. पृ.४-५
2. हे.का.,पृ.२

**जयदेवमते लक्षणाभेदः**[1]- अयं चन्द्रालोके नवममयूखे लक्षणाप्रभेदान् प्रत्यपीपदत्। यथा लक्षणाभेदनिरूपणे मुकुलभट्टमम्मटविश्वानाथादीनां प्रथितिः तथा एतस्य नास्ति। परम् एतत्प्रणीतग्रन्थः अत्यन्तं प्रसिद्धिमुपगतो वर्तते। एषः विविधधर्माधारेण लक्षणायाः प्रभेदान् उपभेदांश्च गभीरया वाचा न्यरूपयत्। लक्षणावृत्तेः लक्षणकारिकायां पूर्वार्वाची च रूढितः प्रयोजनाच्च इत्याख्याय प्रथमतः रूढिमार्गेण ततो प्रयोजनमार्गेण सम्बन्धमार्गेण प्राचीनोक्तमार्गेण लक्ष्यलक्षकमार्गेण हेतुमार्गेण अलङ्कारादिमार्गेण इत्यनया रीत्या अनेन साकल्येन लक्षणायाः उपचत्वारिंशद् भेदोपभेदा प्रतिपादिता।

१. रूढिमुखेन (६)

प्रथमं जयदेवः स्वगतभेदमादाय लक्षणीयार्थबोधकशब्दस्य उपाधिना लक्षणायाः अनुपादानम् उपादानमिति भेदौ स्वीकरोति। अनुपादानस्योदाहरणम् –'चन्द्रो हसति' उपादानस्योदाहरणम्- 'मुखञ्चन्द्रः'। तयोः पुनः सिद्धसाध्यसाध्याङ्गभेदात् प्रत्येकं त्रयो भेदा भवन्ति। क्रमशः उदाहरणम्- अनुपादानसिद्धस्य उदाहरणम्- 'चन्द्रो हसति', अनुपादानसाध्यस्य उदाहरणम्- 'मद् उपदेशकः', अनुपादानसाध्याङ्गस्य उदाहरणम्- 'कलिङ्गा धावन्ति' उपदानसिद्धस्य उदाहरणम्- 'गौर्वाहीकः', उपादानसाध्यस्य उदाहरणम्- 'सूक्तममृतम्', उपादानसाध्याङ्गस्य उदाहरणम्- 'पुरुषाः कलिङ्गा धावन्ति' इति।

२. प्रयोजनदृशा भेदाः- (४)

प्रयोजनमपि स्फुटास्फुटभेदात् (गूढागूढमिति) द्विविधं भवति। तयोरपि तटस्थगतम् अर्थगतम् इति भेदद्वयं भवति। तयोः अर्थगतप्रयोजनस्य लक्ष्यलक्षकनिष्ठपरतया भेदद्वयं भवति। तस्मात् गूढार्थगतलक्षकनिष्ठं गूढार्थगतलक्ष्यनिष्ठम् अगूढार्थगतलक्षकनिष्ठम् अगूढार्थगतलक्ष्यनिष्ठम् इति प्रयोजनं चतुर्विधं जायते। किन्तु ग्रन्थकारः गूढागूढम् इत्युपाधिं विहाय सामान्यतः लक्षक-लक्ष्यभेदात् उभावेव भेदौ स्वीकृत्य गूढ-अगूढतटस्थं

1. चन्द्रा, मयू.-९, पृ.२४२-२५७

भेदद्वयम् इति कृत्वा चतुरो भेदान् चिनोति। स्फुटतटस्थस्य उदा०- दीपं वर्धय, अस्फुटतटस्थस्य उदा०-पटोऽयं दग्धः, लक्ष्यस्थस्य उदा०- अमृतं सूक्तम्, लक्षकस्थस्य उदा०- इन्दुरेवैष तद्वक्त्रम् इति प्रयोजनदृशा लक्षणा चतुर्विधा भवति।

३.सम्बन्धाधारेण लक्षणाभेदाः (५)

आभिमुख्यसम्बन्धात् उदा०- अङ्गुल्यग्रे करिवरशतम्
सन्निधानसम्बन्धात् उदा०- गङ्गायां घोषः
आकारप्रतीतिसम्बन्धात् उदा०- पर्वताग्रे चन्द्रः
कार्यकारणसम्बन्धात् उदा०- आयुर्घृतम्
वाच्यवाचकसम्बन्धात् उदा०-द्विरेफः
आदिपदेन सम्बन्धान्तरं ग्राह्यमस्ति।

४.प्रागुक्तसादृश्यादिसम्बन्धमुखेन लक्षणाभेदाः (४)

सादृश्यसम्बन्धात् 'मुखं चन्द्रः', समवायसम्बन्धात् 'छत्रिणो यान्ति', 'वैपरीत्यसम्बन्धात्' 'भद्रमुखम्', 'क्रियायोगसम्बन्धात् तादृशयुद्धकारितया अनर्जुनेऽपि 'अर्जुनशब्दः'।

५.प्राचीनोक्तमार्गेण भेदाः(६)

सादृश्यसम्बन्धात् गौणी, सादृश्येतरसम्बन्धात् शुद्धागौण्योः अपि सारोपा साध्यवसाना इति प्रत्येकं भेदद्वयं भवति। शुद्धायाः पुनः उपादान-अर्पणम् इति उभौ भेदौ भवतः। तस्मात् साकल्येन लक्षणा षड्विधा भवति।

गौणी- सारोपायाः उदा-इन्दुर्मुखम्, साध्यवसानायाः उदा-इन्दुरेव। शुद्धा- सारोपायाः उदा-आयुर्घृतम्, साध्यवसानायाः उदा-इदमायुरेव, उपादान-उदा-कुन्ताःप्रविशन्ति, अर्पणस्य-उदा-गङ्गायां घोषः।

६.विशिष्टलक्ष्यलक्षकसम्बन्धेन विभागः(२)

लक्षणा–लक्ष्यविशिष्टायाः उदा- सरसकाव्यममृतम्, लक्षकविशिष्टायाः उदा-विद्या स्थिरतरं धनम्।

७.हेतुधर्मदृशा विभागः (२)

१ सहेतुलक्षणायाः उदा- सौन्दर्येण कन्दर्पः,

२.असहेतुलक्षणायाः उदा-मूर्तिमती रतिः।

८.अलङ्कारादेः बीजरूपतया लक्षणाविभागः(६)

१. शब्दमात्रात् उदा-द्विरेफः २.पदार्थमात्रात् उदा-मुखं चन्द्रः ३. वाक्यार्थमात्रात् उदा-यद्दातुः सौम्यता सेयं मुखेन्दोरकलङ्कता ४.सङ्ख्यामात्रात् उदा- यावन्तो वयमाहवप्रणयिनस्तावन्त एवार्जुनाः ५.कारकमात्रात् उदा-अग्निः पचति ६. लिङ्गमात्रात् उदा-इयं हस्ती इत्यत्र हस्तिन्यां हस्तिप्रयोगः।

१.रूढिमूलकाः भेदाः (६)

१ अनुपादानस्योदाहरणम्–'चन्द्रो हसति' (३) २ उपादानस्योदाहरणम्-'मुखञ्चन्द्रः' (३)

सिद्धम् साध्यम् साध्याङ्गम् सिद्धम् साध्यम् साध्याङ्गम्

उदा-'चन्द्रो हसति' उदा- 'मद् उपदेशकः' उदा-कलिङ्गा धावन्ति' उदा-'गौर्वाहीकः' उदा- 'सूक्तममृतम्' उदा-'पुरुषाः कलिङ्गा धावन्ति'

२.प्रयोजनमूलकभेदाः (४)

१ स्फुटतटस्थस्य उदा०- दीपं वर्धय,

२ अस्फुटतटस्थस्य उदा०-पटोऽयं दग्धः,

३ लक्ष्यस्थस्य उदा०- अमृतं सूक्तम्,

४ लक्षकस्थस्य उदा०- इन्दुरेवैष तद्वक्त्रम्

३.सम्बन्धमूलकभेदाः (५)

१ आभिमुख्यसम्बन्धात् उदा०- अङ्गुल्यग्रे करिवरशतम्

२ सन्निधानसम्बन्धात् उदा०- गङ्गायां घोषः

३ आकारप्रतीतिसम्बन्धात् उदा०- पर्वताग्रे चन्द्रः

४ कार्यकारणसम्बन्धात् उदा०- आयुर्घृतम्

५ वाच्यवाचकसम्बन्धात् उदा०-द्विरेफः

४.प्रागुक्तसादृश्यादिसम्बन्धमूलकभेदाः (४)

१ सादृश्यसम्बन्धात् 'मुखं चन्द्रः',

२ समवायसम्बन्धात् 'छत्रिणो यान्ति',
३ वैपरीत्यसम्बन्धात् 'भद्रमुखम्',
४ क्रियायोगसम्बन्धात् तादृशयुद्धकारितया अनर्जुनेऽपि 'अर्जुनशब्दः'।
५.प्राचीनोक्तमार्गेण भेदाः (६)
१ गौणी- सारोपायाः उदा-इन्दुर्मुखम्,
२ गौणीसाध्यवसानायाः उदा-इन्दुरेव।
३ शुद्धा- सारोपायाः उदा-आयुर्घृतम्,
४ शुद्धासाध्यवसानायाः उदा-इदमायुरेव,
५ उपादान-उदा-कुन्ताःप्रविशन्ति,
६ अर्पणस्य-उदा-गङ्गायां घोषः।
६.विशिष्टलक्ष्यलक्षकसम्बन्धमूलकभेदाः (२)
१ लक्ष्यविशिष्टा उदा- सरसकाव्यममृतम, २ लक्षकविशिष्टा-उदा-विद्या स्थिरतरं धनम्।
७.हेतुधर्ममूलकभेदाः (२)
१ सहेतुलक्षणा उदा- सौन्दर्येण कन्दर्पः,
२.असहेतुलक्षणा उदा-मूर्तिमती रतिः
८. अलङ्कारादेः बीजमूलकभेदाः (६)
१. शब्दमात्रात् उदा-द्विरेफः।
२.पदार्थमात्रात् उदा-मुखं चन्द्रः।
३. वाक्यार्थमात्रात् उदा-यद्वातुः सौम्यता सेयं मुखेन्दोरकलङ्कता।
४.सङ्ख्यामात्रात् उदा- यावन्तो वयमाहवप्रणयिनस्तावन्त एवार्जुनाः
५.कारकमात्रात् उदा-अग्निः पचति।
६. लिङ्गमात्रात् उदा-इयं हस्ती इत्यत्र हस्तिन्यां हस्तिप्रयोगः।

**विद्याधरमते लक्षणाभेदाः**

असौ मम्मटोत्तरवर्त्तिषु आलङ्कारिकेषु पठितः काव्यप्रकाशग्रन्थात् प्रभावितः बहुत्र मम्मटमतमेव समर्थयमानः प्रतिभाति। एष एकावलीनामके

ग्रन्थे द्वितीयोन्मेषे लक्षणाप्रभेदनिरूपणं मम्मटानुसारेण उपापादयत्। एषः लक्षणायाः शुद्धभेदान् सप्त, साकल्येन च पञ्चत्रिंशतं भेदान् आमनति। मम्मटोक्तान् लक्षणाषड्भेदान् स्वीकृत्य तत्र उपादानलक्षणलक्षणयोः सम्मिश्रितं जहदजहत्स्वार्थानामकं तृतीयं भेदं स्वीकरोति। प्रथमतः एष लक्षणायाः त्रीन् भेदान् जहत्स्वार्था,अजहत्स्वार्था, जहदजहत्स्वार्था इति कथयति। तत्र जहल्लक्षणां निरूपयति।

शब्दोऽर्पयति परार्थं यद्यात्मानं तदाजहत्स्वार्था[1]। यत्र शब्दः (गङ्गादिः) परार्थं तटार्देघोषाद्यधिकरणसिद्ध्यर्थम् आत्मानं (जलप्रवाह-रूपस्वार्थं) त्यजति सा जहत्स्वार्था लक्षणा भवति। जहत्स्वार्था –जहत् त्यजन् स्वः वाच्यार्थः यत्र सा जहत्स्वार्था इति।

उदाहरणम्–

त्वत्खड्गधारापयसि प्रवीराः पतन्ति ये संयति संमुखीनाः।
वसन्ति ते वीर नृसिंहदेव दुरासदायां सुरदीर्घिकायाम् ॥

एतस्मिन् काव्यवाक्ये सुरदीर्घिकाशब्दस्य वाच्यार्थे स्रोतसि रिपुनगराधिकरणता न सम्भवति। अतः सुरदीर्घिकाशब्दः बाधितं स्रोतोरूपं स्वीयार्थं तदधिकरणतासिद्ध्यर्थम् अतिशयं शैत्यपावनत्वादिं द्योतयितुं तटाय समर्पयति तेनेयं जहत्स्वार्था आख्यायते। इयमेव अप्रस्तुतप्रशंसादेरलङ्कारस्य बीजम्। इयमेव लक्षणलक्षणानाम्ना मम्मटादिभिः व्यपदिष्टा। अस्यामेव अन्तर्भूतायाः विपरीतलक्षणायाः उदाहरणं प्रस्तूयते।

सा विपरीता यस्यां लक्षयति पदं स्ववाच्यविपरीतम्[2]।

इयमेव जहत्स्वार्था स्वार्थत्यागेन तद्विरुद्धमप्यर्थं लक्षयति। सा विपरीतलक्षणा अन्यैः कथ्यते। यथा-'किमिव नापकृतमनेन'इति। अत्र उपकर्तरि व्याजस्तुत्या प्रत्युक्तः अपकृतशब्दः अपकाररूपे मुख्यार्थे बाधितस्तमर्थं त्यक्त्वा तद्विपरीतमुपकारमेव अर्थं लक्षयति। एषा लक्षणा व्याजस्तुतेः बीजम्।

1. एका, पृ.६३
2. तत्रैव, पृ.६५

अजहत्स्वार्थां परिभाषते।

सिद्धिं निजक्रियायाः कर्तुं यस्यां परस्य शब्देन।
आक्षेपः क्रियतेऽसावजहत्स्वार्था समाख्याता ॥
स्वार्थसिद्ध्यर्थाक्षेपविषया अजहत्स्वार्थेति।

तस्योदाहरणम् –

काव्यलङ्कारमीमांसातर्कव्याकरणागमाः।
प्रविशन्ति तवास्थानीं नरसिंहनरेश्वरः[1] ॥

अत्र स्वार्थमत्यजन् काव्यादयः स्वप्रवेशरूपक्रियासिद्धये तत्सम्बन्धिनो विदुषो लक्षयन्ति। प्रयोजनञ्च माहात्म्यप्रकाशनम्। इयमेव समासोक्त्यादेर्बीजम्। एषैव उपदानलक्षणेति प्राग्भिराचार्यैः गीयते।

अथ च आचार्यः जहदजहत्स्वार्थां सोदाहरणं लक्षयति –

अंशेनैकेन पुनर्जहाति न जहाति चान्येन।
शब्दः स्वार्थं यदि जहदजहत्स्वार्था समाख्याता ॥

यत्रैकांशस्य त्यागात् अपरांशस्य ग्रहणमिति तत्र जहदजहत्स्वार्था लक्षणा भवति।

उदाहरणम्-

यत्कर्णतालप्रभवैः समीरैः प्रतापदीपाः शमिता रिपूणाम्।
सोऽयं तव न्यक्कृतदिक्करीन्द्रः लीलायितो वीर करेणुराजः ॥

अस्मिन् पद्यवाक्ये यद्देशकालविशिष्टत्वं वारणेन्द्रस्य पूर्वमासीत् तद्देशकालविशिष्टत्वं सम्प्रति नास्तीति सोऽयमित्यत्र। तत्तांशे स्वार्थत्यागः इदन्तांशे स्वार्थत्यागविरहः तस्मादियं जहदजहत्स्वार्था भवति। पूर्वोक्तां त्रिविधां लक्षणां निरूप्य स तस्याः सारोपा साध्यवसाना चेति द्वौ भेदौ व्याख्याति। तत्र सारोपा

विषयी विषयश्चैव सारोपा स्यात्तदा द्विविधा [2]।

---

1. एका., पृ.६५
2. तत्रैव, पृ. ६८

यत्र विषयिविषयौ शब्देनोल्लिखितौ उक्तौ भवतस्तत्र सारोपेति। इयं सारोपा सादृश्यसादृश्येतरसम्बन्धाभ्यां गौणीशुद्धारूपा भवति। यथा –

वीरश्रीस्वरसामिसाररजनीनिर्माणकर्मान्तिक-
च्छायाकन्दलितान्धकारकलिकातापिच्छिताशाञ्चलः।
जीयादुत्कलभूमिपाल भवतः खड्गो रणप्राङ्गणे
शत्रुक्षोणिभृताममर्त्यनगरीयात्रासु कार्तान्तिकः[1] ॥

अत्र रिपुविषयसुरपुरप्रस्थानोपदेशकारित्वादयो मौहूर्त्तिकगुणा लक्षणया बोध्यमाना अपि प्रवृत्तिनिमित्ततां प्राप्नुवन्ति। ताद्रूप्यप्रतीतिकरणमेव प्रयोजनम् इति गौणीसारोपा। इदानीं ग्रन्थकारः शुद्धासारोपां लक्षयति। शुद्धा नाम सादृश्येतरकार्यकारणत्वादिसम्बन्धान्तरकारिणी वा यथा – त्रिलोकी कल्याणं जयति तव दोरुत्कल्पते ॥[2]

अत्र कल्याणनिमित्तत्वात् कल्याणं ताद्रूप्यप्रतीतिरेव प्रयोजनम्। इयमेव रूपकालङ्कारस्य बीजम्। उपचारश्च कार्यकारणभावादिनिमित्ततया पञ्चधा भवति। एवं गौणीशुद्धाभेदां सारोपां निरूप्य साध्यवसानालक्षणां वदति। विषयिनिगीर्णे विषये साध्यवसाना द्विधा ख्याता[3]।

विषयिद्वारा विषयाच्छादनमेव साध्यवसाना कथ्यते। सा गौणी-शुद्धाभ्यां द्विधा भवति।

गौणीसाध्यवसाना – 'अयं पारिजातः' इत्यत्र वितरणचरणत्वादयः पारिजातस्य गुणा वीरनरसिंहे लक्ष्यमाणा अपि प्रवृत्तिनिमित्ततां भजन्ति। प्रयोजनं तदीयं सर्वथैवाभिन्नत्वप्रतीतिः। शुद्धासाध्यवसाना- 'अयमानन्दः' इत्यत्र आनन्दहेतुत्वात् आनन्दः। इयमेव अतिशयोक्तेर्बीजम्। अनेन प्रकारेण लक्षणायाः जहदादि रूपत्रयं पुनः सारोपासाध्यवसानयोः गौणीशुद्धाभ्यां चत्वारि रूपाणि समाहृत्य साकल्येन लक्षणा सप्तविधा भवति। पूर्वोक्ता

---

1. तत्रैव, पृ.६९
2. तत्रैव, पृ.७०
3. तत्रैव, पृ.७१

सप्तविधा लक्षणा सङ्करालङ्कारस्य त्रिरूपान्विततया संसृष्टेः एकरूप-निबन्धनतया अष्टाविंशतिभेदयुक्ता इमे सङ्कीर्णभेदा शुद्धभेदैः अस्पृष्टास्सन्ति। सप्त शुद्धभेदान् अष्टाविंशतिभेदैः सङ्कलय्य लक्षणा पञ्चत्रिंशत्भेदोपपन्ना जायते।

**मतभेदविमर्शः**

विद्याधरस्य इमे लक्षणाप्रभेदा मम्मटोक्तलक्षणाभेदैस्सह साम्यं भजन्ते। मम्मटेन लक्षणा षड्विधा प्रोक्ता एतेन फलतः सैव सप्तविधा ईरिता। मम्मटेन प्रथमं लक्षणायाः उपदानलक्षणालक्षणेति भेदद्वयं प्रोक्तम्। विद्याधरेण तावेव भेदौ जहत्स्वार्था अजहत्स्वार्था इति केवलमभिधानान्तरेण उक्तौ। पुनश्च द्वयोः भेदयोः साङ्कर्यं स्वीकृत्य जहदजत्स्वार्था इत्यपि तृतीयप्रभेदः भणितः। एवम् उभयोः मतभेदः वर्तते। ग्रन्थकारेण यः लक्षणायाः जहदजहत्स्वार्थेति तृतीयभेदः उक्तः स एव वेदान्तदर्शनप्रतिपादितभागलक्षणा वर्तते। यतो हि वेदान्तिनः तत्त्वमसीति वाक्ये तात्पर्यं स्थापयितुं यां लक्षणां स्वीकुर्वन्ति सैव जहदजहत्वार्था भागलक्षणा इति व्यपदिश्यते। ग्रन्थकारः अलङ्कारधिया सङ्करमुखेन संसृष्टिमुखेन लक्षणावान्तरप्रभेदान् पर्यगणयत् इति अभिनवा अस्य दृष्टिः। अस्मात् लक्षणप्रभेदविवेचने सूक्ष्मविचारः एतेन विहितः यच्च अन्येभ्यः एनं विशिनष्टि। ये पञ्चत्रिंशत्भेदा लक्षणाया अभिहिताः ते पारमार्थिका न सन्ति शुद्धभेदा तु सप्त एव। अन्यच्च ग्रन्थकारः प्रकाश-कारोक्तमतमनुशील्य लक्षणाप्रभेदप्रकरणं कथयितुं प्रावर्तत।

उपर्युक्तभेदा अधोलिखिताः सन्ति –

**लक्षणा (३५ भेदा)**
**१. जहत्स्वार्था**–'खड्गधारा पयसि प्रवीराः.' **२.अजहत्स्वार्था** 'काव्यालङ्कारमीमांसा..' **३.जहदजहत्स्वार्था** 'यत्कर्णतालप्रभवैः समीरैः'
'.विपरीतलक्षणा-'किमिव नापकृतमनेन...'
**४ गौणीसारोपा** 'वीरश्रीस्वरसामिसाररजनी..' **५. शुद्धासारोपा** 'त्रिलोकी कल्याणं जयति तव दोरुकल्पते'
**६. गौणीसाध्यवसाना** 'अयं पारिजातः' **७. शुद्धासाध्यवसाना** 'अयमानन्दः'
एवंविधायाः सप्तभेदाया लक्षणायाः सङ्करस्य भेदत्रयाश्रिता एकविंशतिभेदा भवति लक्षणा, पुनः संसृष्टेः सप्तभेदाः त्याहत्य अष्टाविंशतिभेदा जायते, सप्तशुद्धभेदान् गणयित्वा इयं पञ्चत्रिंशद्भेदोपपन्ना जायते।

**नरेन्द्रप्रभसूरिमते लक्षणाभेदः**

अनेन अलङ्कारमहोदधौ लक्षणाभेदा निरूपिताः। ते साक्षात् काव्यप्रकाशोक्तभेदा इव प्रतिभासन्ते। यान्युदाहरणानि तत्र लब्धानि तान्येव एतेन उदाहरणशः योजितानि। अयं प्रथमतः सारोपासाध्यवसानारूपात् लक्षणां द्वेधाकरोति। उक्तञ्च–

सारोपा लक्षणाऽऽरोपविषयारोप्यभेदभृत्।
आरोप्यापहृतेऽन्यस्मिन् सैव साध्यवसानिका[1] ॥

इत्युक्त्वा सारोपासाध्यवसानप्रकारा अपि लक्षणा सादृश्यात् सादृश्येतराच्च क्रमशः गौणीरूपा शुद्धारूपा च भवति। उक्तं हि –

द्विप्रकाराऽपि सादृश्यात् या सा गौणीति गीयते।
प्रत्यासत्तेस्तु याऽन्यस्याः सा शुद्धेति प्रकीर्तिता ॥

इति पुनश्च शुद्धायाः उपादान-लक्षणलक्षिता इति उभौ भेदौ कृतौ। इत्येवम् एतन्मतेऽपि गौण्याः द्वौ भेदौ शुद्धायाश्च चत्वारो भेदाः इति साकल्येन

1. अ.महो.,पृ.३४

लक्षणा षड्भेदवती जायते। एतत्कृतलक्षणाप्रभेदनिरूपणम् मम्मटसिद्धान्तसदृशं लक्ष्यते। तस्मात् अधिकव्याख्या नानुपयोगिनी इति धिया उदाहरणान्यपि न विश्लिष्यन्ते। एषोऽपि 'गौरनुबन्ध्यः' इत्यत्र उपादानलक्षणाप्रसङ्गं निराकृत्यं मुकुलभट्टोपस्थापितताटस्थ्यसिद्धान्तमपि निरास्यत्। ग्रन्थकारोक्तलक्षणाभेदाः सोदाहरणमधः चित्रीक्रियन्ते।

| |
|---|
| लक्षणा (षड्विधा) |
| सारोपा साध्यवसाना |
| सादृश्य सादृश्येतरा सादृश्य सादृश्येतरा |
| उपादानलक्षणा लक्षणलक्षणा उपादानलक्षणा लक्षणलक्षणा |

**विद्यानाथमते लक्षणाभेदः**

विद्यानाथः प्रतापरुद्रयशोभूषणे ग्रन्थे समासशैल्या शब्दवृत्तिविवेचनम् अकरोत्। एषः लक्षणायाश्चातुर्विध्यम् अभ्युपेति। गौणीञ्च लक्षणा-प्रभेदेऽन्तर्भावयन् सादृश्यनिबन्धनात् सम्बन्धनिबन्धनाच्च लक्षणां द्विधा विभजते। तत्र सम्बन्धनिबन्धनायाः एव जहल्लक्षणा अजहल्लक्षणा चेति उभौ प्रकारौ भवतः। अजहल्लक्षणाम् उदाहरणेन स्पष्टयति –

जेतुः काकतिभूभर्तुराकर्ण्य पटहध्वनिम्।
सामन्तनगराण्युच्चैराक्रोशन्ति समन्ततः[1] ॥

अत्र सामन्तनगरोच्चकोशध्वनिरिति वाच्यार्थः, तस्याचेतनत्वात् क्रोशध्व-निरूपार्थः अन्वयः अनुपपन्नः क्रोशध्वनिरूपं वाच्यार्थं सम्बन्धुं नगरस्था जना लक्षणया बोध्यन्ते इति अजहल्लक्षणा सिद्ध्यति। ततः सोदाहरणं जहल्लक्षणां विशदयति –

पत्युः काकतिनाथस्य पादपीठीमनारतम्।
स्फुरद्रत्नप्रभाजालैरलङ्कुर्वन्ति मौलयः ॥[2]

1. प्रताप. पृ.२८
2. तत्रैव, पृ.२.९

अत्र अलङ्कारसिद्ध्यर्थं मौलिभिस्तदाश्रयभूता राजानः लक्ष्यन्ते। एवं जहल्लक्षणाम् अजहल्लक्षणां निरूप्य सम्बन्धनिबन्धनगर्भितलक्षणायाः जहदजल्लक्षणेति भेदद्वयं च निरूप्य सादृश्यनिबन्धनानुप्राणितलक्षणायाः सारोपा सादृश्यवसाना चेति भेदद्वयं तेन प्रतिपाद्यते। तत्र सारोपा –

मन्थानाचलमूलमेचकशिलासङ्घट्टनश्यात्मिका
कारं यत्तुहिनद्युतौ स्फुरति तत्सारङ्गमाचक्षते।
मन्ये नन्विह वीररुद्रनृपतेः कीर्तिश्रिया निर्जितः
तन्मुद्राङ्कवराहमिन्दुरुरसा बिभ्रत्समुज्जृम्भते ॥

अस्मिन् श्लोकवाक्ये चन्द्रकलङ्करूपकुरङ्गे वराहत्वमारोप्यते। विषयविषयिणोः अभिहितयोः अभेदप्रतिपत्तिरेव आरोपः। साध्यवसानाया उदाहरणम्-

काकतीयकुलाम्भोधेः प्रभवत्येष चन्द्रमाः।
कृतः कुवलयोल्लासो येनोदयमुपेयुषा ॥

इत्यत्र पद्यवाक्ये विषयिणा चन्द्रमसा प्रतापरुद्रस्य विषयभूतस्य निगीर्णात् साध्यवसानालक्षणा अस्ति। ग्रन्थकारेण काकतीयकुलाम्भोधेः इत्यत्र आरोपः यत्र मम्मटादिभिः आलङ्कारिकैः शुद्धायाः भेदतया उपादान-लक्षणलक्षणा व्याख्यायते तदेव शुद्धां सम्बन्धनिबन्धनां कथयति। तस्या एव भेदान् जहल्लक्षणादिनाम्ना व्यवहरति। एषः शुद्धां गौणीं द्वयमपि विशिष्य तत्तन्नाम्ना न व्यपदिशति। एतन्मते लक्षणा चतुर्विधा अभिमता अस्ति।

| |
|---|
| लक्षणा चतुर्विधा |
| सादृश्यनिबन्धनात् सम्बन्धनिबन्धात् |
| १.सारोपा २.साध्यवसाना ३.जहल्लक्षणा ४.अजहल्लक्षणा |
| उदा- मन्थानाचलमूलमेचक...... उदा-काकतीयकुलाम्भोधेः..... |
| उदा- जेतुः काकतिभूभर्तु........ उदा-पत्युः काकति..... |

**विश्वनाथमते लक्षणाभेदः**

साहित्यदर्पणकारस्य विश्वनाथस्य लक्षणाविभागः काव्यशास्त्रे एकं महत्वपूर्णस्थानं धत्ते। ग्रन्थकारमते लक्षणायाः अशीतिर्भेदा अभ्युपगताः। रूढिं प्रयोजनं चेत्यनयोः विभाजकं धर्ममङ्गीकृत्य आदौ रूढिप्रयोजनरूपेण लक्षणायाः भेदौ अवदत्। पुनः रूढिप्रयोजनमूलकलक्षणायाः उपादान-लक्षणालक्षणरूपाद् विभागं स्वीकृत्य चतुर्विधा लक्षणा विभक्ता। एवंविधा चतुर्विधा लक्षणा सारोपासाध्यवसानाभ्याम् अष्टभेदयुक्ता भवति। उक्ता लक्षणा सादृश्येतरसम्बन्धात् शुद्धा सादृश्यसम्बन्धात् गौणी इत्येवं प्रकारेण षोडशभेदोपपन्ना गणिता। उपर्युक्तषोडशविधायां लक्षणायाम् अष्टविधा प्रयोजनवतीलक्षणा प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया च षोडशभेदान् प्राप्नोति। एवंभूता प्रयोजनवती धर्मिगतत्वेन धर्मगतत्वेन च द्वात्रिंशद्भेदोपपन्ना जायते। एवं रीत्या प्रयोजनवतीलक्षणायाः द्वात्रिंशद्भेदान् रूढिमूलकलक्षणायाः अष्टभेदान् आकलय्य साकल्येन चत्वारिंशत्प्रकारा लक्षणा भवति। एवंविधा लक्षणा पदवाक्यनिष्ठतया (रूढिमूलकलक्षणायाः अष्टौ पदनिष्ठभेदाः, अष्टौ वाक्यनिष्ठभेदाः चेति मत्वा, सा षोडशविधा। एवमेव प्रयोजनवत्याः द्वात्रिंशद्भेदाः रूढेश्च अष्टौ भेदान् आकलय्य चत्वारिंशद्भेदा भवन्ति। ततः पदगततयावाक्यगततया चेति प्रत्येकं द्वैविध्यात् लक्षणा अशीतिर्विधा जायते। एवं रीत्या ग्रन्थकारः लक्षणाप्रकारान् गणयामास। दर्पणकारः प्रथमं लक्षणायाः विभाजकहेतुतया रूढिप्रयोजनाभ्यां लक्षणां विभाजयति। लक्षणा द्विधा रूढिवती प्रयोजनवती चेति।

यथा-रूढिप्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता[1]।

रूढ्युदाहरणम् –कलिङ्गः साहसिकः, प्रयोजनस्योदाहरणम्-गङ्गायां घोषः इतिप्रबन्धस्य चतुर्थेऽध्याये निरूपितम्।

रूढिप्रयोजनवत्योः उपादानलक्षणलक्षणा इति द्वौ प्रकारौ। तद्यथा –

मुख्यार्थस्येतराक्षेपो वाक्यार्थोऽन्वयसिद्धये।

---

1. सा.द., १-२

स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥
अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा [1]॥

यत्र वाक्यार्थे मुख्यार्थस्य अन्वयसिद्धये अन्यार्थस्य उपादानं ग्रहणं क्रियते तत्र उपादानलक्षणा। तद्विपर्ययात् च वाक्ये अन्यार्थस्य (मुख्यार्थ-भिन्नस्य) सिद्ध्यर्थम् स्वार्थस्य स्वसमर्पणं क्रियते। तत्र लक्षणलक्षणा इति व्यपदेशः।

रूढ्युपादानलक्षणायाः उदाहरणम् –'श्वेतो धावति' प्रयोजनो-पादानलक्षणायाः उदाहरणम् – 'कुन्ताः प्रविशन्ति' इति। उभयस्मिन् उदाहरणे श्वेतकुन्तयोः पदयोः क्रमशः धावनप्रवेशक्रिययोः कर्तृतया अन्वयस्य असत्त्वात् तयोः धावनप्रवेशक्रिययोः अन्वयमुपस्थापयितुं 'श्वेतः' इत्यस्य श्वेतगुणविशिष्टे अश्वे 'कुन्ताः' इत्यस्य कुन्तधारिपुरुषसमुदाये लक्षणा भवति। 'श्वेतो धावति' श्वेतगुणरूपार्थेन श्वेतगुणविशिष्टम् इत्यस्य उपादानात् अत्र उपादानलक्षणा, 'प्रयोजनविरहात् रूढिः'। 'कुन्ताः प्रविशन्ती' इत्यत्र कुन्तपदेन कुन्तधारिणः उपादानात् एषा उपादानलक्षणा। व्यञ्जनया कुन्तातिगहनत्वरूपे प्रयोजनबोधे सति एषा प्रयोजनवत्युपादानलक्षणा भवति।

रूढिलक्षणलक्षणा– 'कलिङ्गः साहसिकः' प्रयोजनलक्षणलक्षणा– ''गङ्गायां घोषः'' इत्यत्र कलिङ्गगङ्गाशब्दौ देशविशेषजलप्रवाहरूपं मुख्यार्थं परित्यज्य सामीप्यसंयोगसम्बन्धेन पुरुषतीररूपं लक्ष्यार्थं लक्षणया कथयतः। ततः पुरुषतटयोः वाक्यार्थे अन्वयसिद्ध्यर्थं कलिङ्गगङ्गाशब्दयोः स्वार्थस्य अर्पणात् एषा लक्षणलक्षणा। प्रथमे प्रयोजनाभावात् रूढिः द्वितीये शैत्यपावनत्वातिशयरूपं च प्रयोजनं वर्तते।

प्रयोजनलक्षणलक्षणाया द्वितीयमुदाहरणम् –

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्[1] ॥

---

1. सा.द. द्वि.प.,पृ.४५

अत्र कस्यचित् सख्युः स्वमित्रकृतापकारातिशयमनुभूय तस्मिन् अपकार्यकारितां व्याजोक्त्या प्रकाशयतः तं प्रति उक्तिरिति प्रसङ्गः। अत्र तेन अपकारातिशयार्थे उपकृतादीनि पदानि प्रयुज्य सखा भृशं धिक्कृतः। अत्र वाक्यार्थे अपकाराद्यतिशयार्थस्य अन्वयसिद्धये उपकृतादयः शब्दाः स्वान् उपकारातिशयार्थान् तद्विपरीताद्यर्थज्ञानाय अर्पयन्ति। स विरोधार्थः वैपरीत्य-सम्बन्धेन लक्षणया सूच्यते। अपकाराधिक्यमिति प्रयोजनं तु व्यञ्जनागम्यमेव। अतः अत्र प्रयोजनलक्षणलक्षणा भवति। इयमेव अन्येषां शास्त्रकाराणां मते जहत्स्वार्था इति नाम्नाप्यभिधीयते। दर्पणकारेण इदमुदाहरणं निरूप्य भर्तृमित्राभिनवगुप्तोक्तलक्षणाभेदमतं समर्थितम्। तन्मतमपि एतेन समर्थ्यते इति मे भाति। यतो हि अभिधेयस्य सामीप्यादिपञ्चसम्बन्धेषु वैपरीत्यसम्बन्धः व्याख्यातः। अत्रापि वैपरीत्यसम्बन्धवशात् इयं लक्षणा आम्नाता।

एवं रूढिमूलकप्रयोजनमूलकयोः लक्षणयोः उपादानलक्षणलक्षणे सोदाहरणं प्रदर्श्य पुनः सारोपासाध्यवसानामुखेन भेदाः कृताः। इदानीं सा आरोपाध्यवसानाभ्याम् अष्टधा भवति।

सारोपायाः साध्यवसानायाः स्वरूपमित्थम्।  
विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।  
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका[2]॥

यत्र विषयिविषययोः उपमानोपमेययोः आरोप्यमाणारोप्ययोः वा शब्देन अभिधानं भवति सा सारोपा। यत्र च उभयोः मध्ये विषयिद्वारा विषय आच्छादितः क्रियते विषयस्य अनभिधानम् केवलस्य विषयिणः कथनं भवति सा साध्यवसाना। इयमेव सारोपा रूपकालङ्कारस्य बीजमस्ति। एषा विषयिद्वारा विषयस्य निगिरणेन सह तादात्म्यप्रतीतिं कारयति।
यथोक्तं दर्पणे दर्पणकारेण –

---

1. तत्रैव,पृ.४१
2. तत्रैव, पृ.४२

विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत्सरोपा। इयमेव रूपकाङ्कारस्य बीजम्[1]

रुढ्युपादानलक्षणासारोपा –

'अश्वः श्वेतो धावति' इत्यत्र हि श्वेतगुणवान् अश्वरूपः विषयः स्वविषयिद्वारा अनाच्छादितः। स्वसमवेतगुणतादात्म्यात् स्वपदेन आरोपिताश्वः, तत्र समवायसम्बन्धेन विद्यमानगुणः श्वेतः, तस्य तादात्म्येन ज्ञातः अस्ति। श्वेतशब्दस्य श्वेतगुणविशिष्टे प्रसिद्धित्वात् रूढिः वर्तते। श्वेतशब्दः स्ववाच्यार्थेन सह अश्वरूपिणं लक्ष्यार्थमपि प्रतिपादयति। अतः अत्र उपादानलक्षणा वर्तते। श्वेतेन विषयिणा अश्वविषयस्य अनिगीर्णतया श्वेतस्य तादात्म्यप्रतीतिरेव आरोपः वर्तते।

प्रयोजन-उपादानलक्षणासारोपा- 'एते कुन्ताः प्रविशन्ति' इत्यत्र सर्वनाम्ना एतत्पदेन कुन्तधारिपुरुषाणां निर्देशेन कुन्तैः सह पुरुषाणां तादात्म्यमिति प्रतीत्या सारोपा, लक्ष्यार्थेन सह कुन्तप्रतीतित्वात् उपादानलक्षणा भवति। प्रयोजनं च कुन्ताधिक्यम्। रूढिलक्षणलक्षणासारोपा – यथा 'कलिङ्गः पुरुषो युध्यते' अत्रोदाहरणे कलिङ्गपदम् मुख्यार्थं देशविशेषं समर्प्य कलिङ्गदेशवासिनं पुरुषमुपलक्षयति। पुरुषपदेन सार्धं तादात्म्यप्रतीत्या सारोपा भवति। कलिङ्गपुरुषयोराधाराधेयभावः सम्बन्धः वर्तते।

प्रयोजनलक्षणलक्षणासारोपा यथा – 'आयुर्घृतम्' अत्र घृतरूपि-कारणस्य आयूरूपकार्ये आरोपात् कार्यकारणभावसम्बन्धेन सम्बन्धिनः आयुस्तादात्म्येन अभेदतया प्रतीतिर्जायते। प्रयोजनम् अन्नादिविलक्षणतया अव्यभिचारतया आयुषः वृद्धिः फलमिति।

अन्यानि उदाहरणानि यथा-

1. 'राजा असौ गच्छतिइत्यत्र राजकीयपुरुषे गते सति इत्यर्थे तद् वाक्यं ' प्रयुक्तम्। राजा असौ गच्छतीत्यत्र असाविति सर्वनामपदाल्लक्ष्यार्थ-पुरुषनिर्देशात् तस्य राज्ञा सह अभेदारोपात्सारोपा अस्ति। इयं सारोपा

1. तत्रैव, पृ.४०

स्वस्वामिभावसम्बन्धवशात् आगता। स्वपदात्पुरुषः स्वामिपदेन राजा इति निर्दिष्टम्। राजसदृशः तदीयोज्ज्वलदेशः अथवा तत्सदृश-अनुल्लङ्घ्यस्वसामिभावशासनमिति प्रयोजनम्।

2. अवयवावयविभावस्य अग्रमात्रेऽवयवभागे 'हस्तोऽयम्' इत्यत्र अवयवावयविभावलक्षणसम्बन्धः। हस्तः अवयवी अवयवाः तदग्रभागाः। तत्सम्बन्धात् केवलम् अवयविनः प्रसिद्धिरस्ति। अतः रूढिसारोपालक्षणा भवति।
3. 'ब्राह्मणेऽपि तक्षौऽसौ' इत्यत्र त्वष्टृकर्मरतं विप्रं प्रति इदं वाक्यं प्रयुक्तम्। अत्र त्वष्टृसदृशकार्यकरणमेव तात्कर्म्यसम्बन्धेन अत्र प्रयोजनवती सारोपा लक्षणा वर्तते।
4. इन्द्रार्थासु स्थूणासु 'अमी इन्द्राः' अत्रोदाहरणे इन्द्रनिमित्तकासु स्थूणासु इन्द्रत्वं तादर्थ्यसम्बन्धेन भवति। प्रयोजनवतीसारोपालक्षणलक्षणा वर्तते। एवं प्रकारेण सारोपाविषयकलक्षणायाः उदाहरणानि निरूप्य अधुना ग्रन्थकारः साध्यवसानां सोदाहरणं प्रतिपादयति।
5. रूढि-उपादानलक्षणासाध्यवसाना– 'श्वेतो धावति'। अत्र विषयिणा श्वेतपदेन अश्वरूपविषयस्य निगिरणं कृतम्। ततः शब्दशः अनुक्ततया प्रयोजनाभावात् साध्यवसाना।
6. प्रयोजनवती-उपादानलक्षणासाध्यावसाना– 'कुन्ताः प्रविशन्ति' इत्यत्र विषयिणा कुन्तबहुवचनान्तपदेन कुन्तधारिपुरुषस्य निगिरणतया प्रयोजनवती उपादानलक्षणा साध्यवसाना भवति। अतिगहनता च प्रयोजनम्।
7. रूढिलक्षणासाध्यवसाना– 'कलिङ्गः साहसिकः' इत्यत्र कलिङ्ग-देशरूपेण विषयिणा तत्स्थितपुरुषविशेषविषयस्य निगीर्णत्वात् रूढिमूलक-लक्षणलक्षणासाध्यवसाना वर्तते।
8. प्रयोजनवती लक्षणलक्षणासाध्यवसाना – 'गङ्गायां घोषः' इत्यत्र विषयिणा गङ्गापदेन तीररूपार्थस्य विषयस्य निगीर्णं विहितम्। तेन प्रयोजनवती लक्षणलक्षणा साध्यवसाना। प्रयोजनं तु शैत्यपावनत्वादि।

अनेन प्रकारेण सारोपासाध्यवसानयोः मिथः चातुर्विध्यात् लक्षणा अष्टविधा जायते। एषैव लक्षणा सादृश्यभिन्नसम्बन्धात् सादृश्य-सम्बन्धाच्च षोडशत्वं धत्ते। सादृश्यसम्बन्धलक्षणा गौणी सादृश्येतर-सम्बन्धा लक्षणा शुद्धा भवति। यथाह-

सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोडशभेदिताः[1] ॥

इति। सादृश्यसम्बन्धः सादृश्येतरसम्बन्धः कार्यकारणभावादिरिति अस्ति भेदकम् अनयोः नामकरणे।

१. रूढि-उपादानलक्षणासारोपा गौणी – 'एतानि तैलानि हेमन्ते सुखानि'। अत्र एतानीति सर्वनामपदेन सार्षपादिविविधस्नेह-पदार्थानाम् उपस्थित्या विषयस्य अनिगीर्णतया सारोपा, तैल-शब्दस्य च तिलभवस्नेहमात्रस्य बोधकतया प्रसङ्गे तैलशब्दस्य सुखमयत्वरूपस्य अविवक्षया मुख्यार्थबाधात्, प्रयोजनाभावाद्रूढिः तिलभवोत्पन्नस्नेहपदार्थसादृश्यसम्बन्धेन गौणी, सर्षपोत्पन्नस्नेह-रूपस्य अन्यार्थस्य ग्रहणेन उपादानात्वम्।

२. प्रयोजनवती-उपादानलक्षणासारोपागौणी – 'एते राजकुमारा गच्छन्ति' अत्र राजकुमारसदृशेषु तद्भृत्यादिषु गच्छत्सु, राजकुमाराः इति पदप्रयोगात् मुख्यार्थबाधः, आभिजात्यानां गमनकार्यसम्बन्धात् अराजकुमाराणाम् ग्रहणेन उपादानलक्षणा, सर्वनामपदात् राजकुमारेतराणाम् प्रतीत्या विषयस्य अनिगीर्णतया सारोपालक्षणा, शौर्यादिसम्बन्धात् गौणी, प्रयोजनं तदतिशयबोधः।

३. रढि-उपादानलक्षणासाध्यवसानागौणी – 'तैलानि हेमन्ते सुखानि'। पूर्वोक्तोदाहरणवत् विषयिणा तैलानीति पदेन विषयस्य निगिरणात् एतानीति शब्दस्यानुपादानात् साध्यवसाना भवति।

---

1. सा.द.ल.टी, पृ.४४

४. प्रयोजनवती-उपादानलक्षणासाध्यवसाना गौणी – 'राजकुमाराः गच्छन्ति'। अत्र सर्वनाम्नः एतच्छब्दस्य अनुपादानात् विषयस्य निगिरणं कृतम्। ततः प्रयोजनोपादानसाध्यवसाना गौणी भवति। प्रयोजनञ्च राजकुमारतुल्या आदरणीयता।

५. रूढिलक्षणलक्षणासारोपागौणी – 'राजा गौडेन्द्रं कण्टकं शोधयति' राजा गौडदेशीयं क्षुद्रशत्रुं शोधयतीत्यर्थः। अत्र कण्टकशब्दस्य वृक्षस्य तीक्ष्णाग्रभागः मुख्यार्थः। कण्टकस्य गौडेन्द्रेण सह अभेदसम्बन्धात् मुख्यार्थबाधो भवति। कण्टकस्य स्वार्थसमर्पणात् लक्षणलक्षणा, गौडेन्द्रस्य विषयस्य शब्दतः कथनेन निगिरणाभावेन सारोपा, प्रयोजनराहित्यात् रूढिः, क्षुद्रदुःखदातृत्वं सादृश्यसम्बन्धः इत्यतः रूढिलक्षणलक्षणासरोपागौणी।

६. प्रयोजनवतीलक्षणलक्षणासारोपा गौणी – 'गौर्वाहीकः इत्यत्र गोर्वाहीकयोः विजातीययोः द्वयोः अभेदरूपान्वयानुपपत्तेः मुख्यार्थबाधात् लक्षणा। गौरिति पदेन विषयिणा वाहीकविषयस्य अनिगीर्णत्वात् वाहीक इति शब्दतः उपपादनेन सारोपा, गोगतजाड्यमान्द्यादिगुणसदृशवाहीकगतगुणेषु सादृश्यसम्बन्धेन आरोपात् गौणी। अज्ञत्वातिशयप्रतीतिः प्रयोजनम्।

७. रूढिलक्षणलक्षणासाध्यवसानागौणी– 'राजा कण्टकं शोधयति' अत्र राजेति पदेन विषयिणा गौडेन्द्ररूपस्य विषयस्य निगीर्णत्वात् साध्यवसाना।

८. प्रयोजनवतीलक्षणलक्षणा साध्यवसाना गौणी 'गौर्जल्पति'। अत्र पशौ जल्पनस्य स्पष्टवाक्योच्चारणस्य असम्भवात् मुख्यार्थे बाधिते गोपदस्य स्वार्थपरित्यागात् लक्षणलक्षणा, विषयिणा (आरोप्यमाणेन) गोपदेन वाहीकस्य आरोपविषयस्य निगिरणात् साध्यवसाना। जाड्यादेः सादृश्यसम्बन्धात् गौणी। जाड्याद्याधिक्यं प्रयोजनम्। एवं लक्षणा रूढिमूला अष्टविधा प्रयोजनमूला च अष्टविधा भवति। द्वयोः षोडशप्रकाराः स्थूलरूपेण दर्शिताः।

पुनश्च भेदाः। व्यङ्ग्यस्य गूढागूढत्वाद् द्विधा स्युः फललक्षणाः[1]। गूढत्वञ्च 'काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रसंवेद्यत्वम्' अर्थात् सहृदय-हृदयजनसंवेदन-विषयत्वमिति। यथा-

'उपकृतं बहु तत्र किमुच्यते' – इत्यादिः अपकारिणं सखायं प्रति कस्यचन अपकृतस्य मित्रस्य उक्तिः। तेन उपकृतादीनां वाक्यार्थानाम् अपकारार्थे सन्निवेश्य अपकाराधिक्यं तन्निन्दा इति व्यङ्ग्यं प्रकरण-पर्यालोचनेन एव सहृदयहृदयभावनाविषयं गूढं भवति।

अगूढत्वम् – अतिस्फुटतया सर्वजनसंवेदनविषयः।

यथा– 'उपदिशति कामिनीनां यौवनमद एव ललितानि' इत्यत्र रमणीयगतयौवनमदज्ञापकश्रृङ्गारादिचेष्टा इति मुख्यार्थः। उपदेशश्च चेतन-निष्ठधर्मः यौवनमदस्याचेतनत्वात् तदनुपपत्तितया लक्षणया आविष्करणं प्रकटनमिति लक्ष्यार्थः ज्ञाप्यते। उपदिशतीत्यस्यार्थः आविष्करोतीति। आविष्काराधिक्यं वाच्यार्थसदृशं स्पष्टत्वेन प्रतीयते इति व्यङ्ग्ययम् अगूढं वर्तते। उपर्युक्तां प्रयोजनमूलकलक्षणां निरूप्य तस्याः पुनः धर्मिधर्मनिष्ठतया विभागः क्रियते। यथोक्तं दर्पणकारेण –

धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा[2]॥

एवंविधा षोडशरूपा लक्षणा प्रयोजनस्य पुनः धर्मिगततया धर्मगततया च द्विधा भूत्वा द्वात्रिंशत्प्रकारा भवति। धर्मिगतप्रयोजनस्य उदाहरणम्–

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि ! धीरा भव[3] ॥

---

1. सा.द.पृ.५९
2. सा.द., पृ.५१
3. तत्रैव, पृ.५१-५२

इत्युक्तम्। अत्र जानक्यापहरणाद् अत्यन्तदुःखसहिष्णुरूपे रामधर्मिणि लक्ष्यार्थे दुःखसहिष्णुत्वातिशयरूपप्रयोजनात् अत्र धर्मिगतप्रयोजनवती लक्षणा व्यवहार्या। धर्मगतप्रयोजनस्य उदाहरणम् – "गङ्गायां घोषः" इत्यत्र तटरूपे लक्ष्यार्थे शीतलत्वपावनत्वादिरूपधर्मस्य अतिशयप्रतीतिः फलं वर्तते। धर्मगतप्रयोजनवतीलक्षणा व्यवहार्या इति।

इत्थं प्रयोजनवत्याः लक्षणायाः द्वात्रिंशतं भेदान् रूढिलक्षणायाः अष्टौ भेदान् सङ्कलय्य चत्वारिंशद्भेदोपपन्ना लक्षणा भवति। तादृशी लक्षणा पदवाक्यनिबन्धनतया अशीतिं भेदान् धत्ते। यथा दर्पणकारः जगाद –

पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा[1]।

पदनिष्ठलक्षणायाः उदाहरणम्-'गङ्गायां घोषः' अत्र गङ्गापदे लक्षणा भवति।

वाक्यनिष्ठलक्षणायाः उदाहरणम्-'उपकृतं बहु तत्र किमुच्यते' समग्रेऽपि वाक्ये लक्षणा वर्तते। यथा-उपकृतसुजनतादीनि वाक्यानि लक्षणास्थलानि सन्ति। अशीतिर्भेदा जायन्ते इति लक्षणाभेदविषयकं मतं व्यधात् विश्वनाथः। तदुक्तलक्षणाभेदाः चित्रे उपस्थाप्यन्ते-

| |
|---|
| अशीतिभेदा लक्षणा |
| रूढिमूला (कलिङ्गः साहसिकः) प्रयोजनमूला (गङ्गायां घोषः) |
| १ रूढ्युपादानलक्षणा 'श्वेतो धावति' १ प्रयोजनोपादानलक्षणा 'कुन्ताः प्रविशन्ति' |
| २ रूढिलक्षणलक्षणा - कलिङ्गः साहसिकः- २ प्रयोजनलक्षणलक्षणा गङ्गायां घोषः, -'उपकृतं बहुतत्रकिमुच्यते..' |
| ३ रूढ्युपादानलक्षणासारोपा- 'अश्वः श्वेतो धावति' ३ प्रयोजनो- पादान-लक्षणासारोपा- 'एते कुन्ताः प्रविशन्ति' |
| ४ रूढिलक्षणलक्षणासारोपा कलिङ्गः पुरुषो युध्यते ४ प्रयोजनलक्षण-लक्षणासारोपा-'आयुर्घृतम्' |

1. तत्रैव, ५३

५ रूढ्युपादानलक्षणासारोपागौणी- 'एतानि तैलानि हेमन्ते सुखानि' ५ प्रयोजनोपादानलक्षणासारोपागौणी -'एते राजकुमारा गच्छन्ति'
६ रूढ्युपादानलक्षणासाध्यवसानागौणी- 'तैलानि हेमन्ते सुखानि' ६ प्रयोजनोपादानलक्षणासाध्यवसानागौणी -'राजकुमारा गच्छन्ति'
७ रूढिलक्षणलक्षणासारोपागौणी - 'राज गौडेन्द्रं कण्टकं शोधयति ७ प्रयोजनलक्षणलक्षणा-सारोपागौणी – 'गौर्वाहीकः'
८ रूढिलक्षणलक्षणासाध्यवसानागौणी 'राजा कण्टकं शोधयति' ८ प्रयोजनलक्षणलक्षणासाध्यवसनागौणी 'गौर्जल्पति'
एवं रूढेः प्रयोजनस्य च अष्टौ अष्टौ भेदान् आहत्य लक्षणा षोडशविधा जायते। प्रयोजनस्य गूढागूढभेदेन केवलस्य प्रयोजनस्य षोडशभेदाः सिद्ध्यन्ति, तत्रापि गूढागूढप्रयोजनं धर्मिधर्मगततया द्विधा प्रसृत्य षोडशविधा प्रयोजनमूला लक्षणा द्वात्रिंशत्प्राकारान् विन्दते। अनेन रूढिमूलकान् अष्टभेदान् प्रयोजनमूलकान् द्वात्रिंशद्भेदान् समाहृत्य एवं लक्षणा चत्वारिंशत्प्रकारोपपन्ना जायते। सा पुनः पदवाक्यगततया द्विधा प्रकीर्य अशीतिभेदयुता जायते इति।

**कविकर्णपूरस्य लक्षणाभेदाः**

अलङ्कारकौस्तुभे कविकर्णपूरः षड्विधां लक्षणां स्वीचकार। सः व्यङ्ग्यमुखेन लक्षणां गूढव्यङ्ग्याम् अगूढव्यङ्ग्यां गतव्यङ्ग्याम् अवोचत्। तत्र सर्वप्रथमं लक्षणायाः रूढिप्रयोजनवशात् उभौ भेदौ करोति। तत्र प्रयोजनवत्याः लक्षणायाः सारोपा साध्यवसाना चेति भेदौ। तौ द्वावपि सादृश्यसम्बधात् सम्बन्धान्तरात् क्रमेण गौणीशुद्धयुक्तौ भवतः। पुनः उपर्युक्ता लक्षणा उपादानलक्षणलक्षणाभ्यां द्विविधा भवति। एवं रीत्या लक्षणा सारोपादिभिः चतुर्विधा भवति। ततः उपादानलक्षणा लक्षणलक्षणा इति भेदद्वयं समाहृत्य साकल्येन लक्षणा षड्रूपा भवति। सैव प्रयोजनरूपव्यङ्ग्यस्य गूढगतागूढैः त्रिधा भवति।

यथोक्तम् –

पूर्वैश्चतुर्भिर्भेदैः सा द्वाभ्यामाभ्याञ्च षड्विधा।
गूढव्यङ्ग्या गतव्यङ्ग्या व्यक्तव्यङ्ग्येति सा त्रिधा[1] ॥

एतन्मते रूढिः केवलं शक्तितुल्या वर्तते व्यङ्ग्यरहिता रूढिस्तु निरर्थका। सङ्क्षिप्तरूपेण इमे भेदा निम्नलिखिताः सन्ति।

लक्षणाषड्विधा
रूढिः (२) प्रयोजनम् (४)
उपादानलक्षणा लक्षणलक्षणा सारोपा साध्यवसाना
सादृश्यसम्बन्धा सम्बन्धान्तरा सादृश्यसम्बन्धा सम्बन्धान्तरा

**मन्दारमरन्दचम्पूकाव्यकारकृष्णकविमते लक्षणाभेदः**

श्रीकृष्णकविनामा मन्दारमरन्दचम्पूकाव्ये वृत्तिविषयनिरूपणावसरे लक्षणां संलक्ष्य तत्प्रभेदान् न्यरूपयत्। एषः प्रथमतः लक्षणायाः रूढिपूर्वा फलपूर्वा इति भेदं करोति। रूढिपूर्वा व्यङ्ग्येन रहिता, फलपूर्वा तु व्यङ्ग्यसहिता भवति। तत्रापि रूढेः गौणी शुद्धा भेदौ भवतः। गौणीपदस्य व्याख्यां करोति – शक्यसादृश्यसम्बन्धरूपा गौणीत्युदीरिता। शुद्धा तु सादृश्यभिन्नशक्यसम्बन्धरूपिणी भवति इत्यनयोः भेदकधर्मः[2] इति।

सादृश्यसम्बन्धात् गौणी सादृश्येतरसम्बन्धात् शुद्धेति वाक्यसारः। फलपूर्वायाः जहती, अजहती,जहत्यजहती, सारोपा,साध्यवसाना इति पञ्च भेदा भवन्ति। सारोपापि गौणीशुद्धरूपात् द्विधा भवति। फलपूर्वायां यत् फलमस्ति तदेव प्रयोजनव्यङ्ग्यं वा कथ्यते। व्यङ्ग्यं गूढविषयत्वेन सहृदयहृदयग्राहि अगूढविषयत्वेन सामान्यहृदयमात्रग्राहि भूत्वा द्विविधं भवतीति।

**मतभेदविमर्शः-**

प्राचीनानां मम्मटादीनां मते लक्षणाभेदाः षट् सन्ति। परम्

1. अ.कौ., पृ.४७
2. म. म.च. पृ.१७८

अर्वाचीनस्य अस्य मते तु पञ्च भेदाः सन्ति। मम्मटादिमते लक्षणा-प्रयोजकहेतुतया भेदा न गणिताः, किन्तु एतन्मते रूढिप्रयोजनमुखेनैव लक्षणा विभक्ता इति। प्राचां मते उपादानलक्षणलक्षणा इति शुद्धाभेदाः कृताः त एव कृष्णकविमते प्रयोजनवतीति नामान्तरेण स्वीकृताः। इतोऽपि जहत्यजहतीइति अभिनवः भेदः आविष्कृतः इति मतान्तरमस्ति। एतन्मते सारोपाया एव गौणीशुद्धेति भेदौ भवतः। किन्तु पूर्वाचार्यैस्तु सारोपसाध्यवसानयोः द्वयोः गौणीशुद्धेति भेदः अभिमतः। एषः लक्षितलक्षणाप्रसङ्गे द्विरेफादि उदाहरणं प्रास्तौत्। यच्च मुकुलभट्टादिना निर्दिष्टमिति एवंविधः मतभेदः दृष्टिपथमारोहति। पञ्चविधा लक्षणा सचित्रं दर्श्यते।

| |
|---|
| लक्षणा सप्तविधा |
| रूढिपूर्वा (व्यङ्ग्यरहिता) फलपूर्वा (व्यङ्ग्यसहिता) |
| गौणी शुद्धा जहती अजहती जहत्यजहती सारोपा (२) साध्यवसाना |
| गौणी शुद्धा |

**धर्मसूरिमते लक्षणाभेदः**

साहित्यरत्नाकरे परमजैनाचार्यः धर्मसूरिः लक्षणाभेदनिरूपणावसरे यन्मतमुपस्थापयामास तद् वृत्तिवार्तिककारमते न सङ्गच्छते। प्रथमम् एषः लक्षणां रूढ्या प्रयोजनवत्या च द्विधा विभजते। ततः निरूढालक्षणायां ग्रन्थकारस्य निर्भरता नास्ति निष्प्रयोजनलक्षणाभावात्। तत्रापि स प्रयोजनवतीं शुद्धागौणीतः द्वेधा करोति। गुणसादृश्यवशात् गौणी तदितरसम्बन्धनिमित्तिका शुद्धा। सा शुद्धा पुनर्द्विविधा उपचारमिश्रिता उपचारामिश्रिता चेति। उपचारः – उपचारो नाम अतत्त्वे तत्त्वव्यपदेशः इति। तन्मते स कार्यकारणभाव-तादर्थ्य-स्वस्वामिभाव-अवयवावयविभाव-तात्कर्म्यरूपैः पञ्चधा भवति। सा च उपचारमिश्रिता लक्षणा पुनर्द्विधा, सारोपा साध्यवसाना चेति। उपचारा-मिश्रितालक्षणा च त्रिविधा जहत्स्वार्था अजहत्स्वार्था जहदजहत्स्वार्हा इति। गौणी पुनः सारोपा-साध्यवसानरूपात् द्विधा भवति। अनया रीत्या शुद्धायाः पञ्च गौण्याः द्वौ साकल्येन लक्षणा सप्तविधा उपपद्यते। लक्षणाभेदाः चित्रद्वारा

प्रस्तूयन्ते[1] –

| |
|---|
| लक्षणा सप्तविधा |
| निरूढा प्रोजनवती |
| शुद्धा (५) गौणी (२) |
| उपचारामिश्रिता उपचारमिश्रिता सारोपा साध्यवसाना |
| १.जहत्स्वार्था २. अजहत्स्वार्था ३. जहदजहत्स्वार्था १.सारोपा २. साध्यवसाना |

**अप्पय्यदीक्षितमते लक्षणाभेदः**

अप्पय्यदीक्षितः वृत्तिवार्तिकग्रन्थे वृत्तेः निरूपणावसरे लक्षणावृत्तिं व्याचक्षीय प्रथमं तां गौणीशुद्धारूपेण विभजते। ततः द्विविधापि लक्षणा निरूढाफललक्षणाभ्यां द्विप्रकारा भवति। गौण्याः निरूढा फललक्षणा शुद्धाया अपि निरूढा फललक्षणा इति भेदो भवति। वृत्तिवार्त्तिककारमतेऽपि गौणीशुद्धयोः विभाजकधर्मः क्रमशः सादृश्यमूलकः तदितरमूलकः च भवति। पुनः शुद्धाफललक्षणायाः पञ्चभेदाः भवन्ति- जहल्लक्षणा, अजल्लक्षणा, जहदजहल्लक्षणा, सारोपा, साध्यवसाना इति। गौण्यपि सारोपा साध्यवसाना इत्यतः द्विरूपा भवति। एवं समस्तान् भेदोपभेदान् सङ्कलय्य लक्षणा सप्तप्रकारा जायते। प्रत्येकमपि प्रभेदः सोदाहरणं निम्नरूपेण उल्लिखितोऽस्ति।

| |
|---|
| लक्षणा सप्तभिदा |
| १ गौणी २. शुद्धा |
| १.निरूढा २.फलक्षणा १. निरुढा २ फलक्षणा (५) |
| उदा-लावण्यादयः १.सारोपा २. साध्यवसाना जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा सारोपा साध्यवसाना |
| उदा- मुखेन्दुः उदा-अन्तरिक्षम् १.उदा-सुरदीर्घिकायां कल्पद्रुमाः उदा-कुन्ताःप्रविशन्ति १.उदा-ग्रामो दग्धः उदा-आनन्दः उदा-अन्तर |

1. साहि., पृ.१११-११२

| |
|---|
| २.उदा-उपकृतं बहुतत्र २.पुष्पितं वनम् |

**मतभेदविमर्शः**

मम्मटादीनाम् आलङ्कारिकाणां मतानुसारं शुद्धान्तर्गते उपादान-लक्षणलक्षणे च गौण्यन्तर्गते सारोपा साध्यवसाना इति लक्षणाविभागः कृतो वर्तते। परम् अप्पय्यदीक्षितमते प्रथमतः लक्षणायाः विभागः गौणीशुद्धारूपतः जातः। एषः गौणीप्रभेदान्तर्गतत्वेन निरूढाफललक्षणे स्वीचकार। शुद्धान्तर्गततया च निरूढा फललक्षणेति विभज्य तत्र शुद्धाफललक्षणायां जहदादीन् पञ्चभेदान् अभ्युपगच्छति। पुनश्च एतन्मते लक्षणाप्रयोजकहेतुत्वेन रूढिप्रयोजनयोः लक्षणाभेदगौणीशुद्धयोः अन्तर्भाविता। पुनः मम्मटादेः मते उपादानलक्षणायाः लक्षणलक्षणायाश्च स्वीकारः भेदतया अस्ति। एतन्मते तावेव अजहल्लक्षणा जहल्लक्षणा इति नाम्ना कथितौ, दीक्षितेन पुनः जहद-जहल्लक्षणा इत्ययं भेदः पार्थक्येन अभ्यसितः। इत्थम् उभयेषामप्या-लङ्कारिकाणां मतभेदः अलक्षि।

**जगन्नाथमते लक्षणाभेदः**

पण्डितराजो जगन्नाथः रसगङ्गाधरे प्रथमतः ध्वनेः अभिधामूलो लक्षणामूलः चेति भेदं स्वीकरोति। अभिधामूलस्य लक्षणामूलस्य एव नाम क्रमशः विवक्षितान्यपरवाच्यम् अविवक्षितवाच्यम् इति वर्तते। ग्रन्थकारः द्वितीयानने लक्षणामूलध्वनौ शब्दशक्तिप्रकरणं विवेचयामास। ग्रन्थकारोक्तं किमपि विवेचनं भवतु काव्यस्वरूपं, काव्यपरिष्कारः, रसप्रकरणं शब्दशक्ति-विवेचनं वा सर्वमपि अत्यन्तं रमणीयकं विद्यते। अत्र प्रतिपादनशैल्याः यद् वैलक्षण्यं अभिनवविचारसन्ततिः वा सहृदयहृदयसंवेदनविषयतया अस्य बन्धस्य इतोऽपि उपादेयातिशयः शोभते। एवमेव लक्षणाभेदप्रकरणेऽपि विशदतया मतमतान्तरोपपादनपुरस्सरं तद्भेदान् निरूपयामास। एषः प्रत्येकं लक्षणाभेदं सोदाहरणं शाब्दबोधपूर्वकं प्रत्यपीपदत्। तत्र प्रथमं भेदोपभेदपूर्वकम् अभिधां निरूप्य शक्यसम्बन्धो लक्षणा इति लक्षणावृत्तेः स्वरूपकथनानन्तरं तस्याः भेदान् करोति-तस्याः सर्वप्रथमं द्विधा भागः कृतः निरूढा प्रयोजनवती

च। ततः प्रयोजनवती पुनः द्विधा भवति-गौणी शुद्धा चेति। ततः गौणी सारोपासाध्यवसानरूपेण द्विप्रकारा भवति। शुद्धायाश्च जहत्स्वार्था अजहत्स्वार्था सारोपा साध्यवसाना इति चत्वारो भेदाः सञ्जायन्ते। एवं रीत्या प्रयोजनवत्याःषड्भेदाः, निरूढा च एकरूपा इति आहत्य लक्षणायाः सप्तभेदा उक्ता ग्रन्थकर्त्रा। जगन्नाथः उपर्युक्तभेदान् दर्शयित्वा उदाहरणेन स्पष्टयति। प्रथमं लक्षणायाः निरूढभेदस्य उदाहरणं क्वचित् सादृश्यमूलकं कुत्रचिच्च समवायसम्बन्धमूलकम् इत्याह। प्रथमस्य-अनुकूलः, प्रतिकूलः, अनुलोमः, प्रतिलोमः, लावण्यम् इत्यादि। आदिपदेन चित्रगतगजसिंहादेः बोधकाः गजप्रभृतिपदानि विवक्षितानि। द्वितीयस्य-नीलादयः, अत्र आदिपदेन सर्वेषां नील-पीत-कृष्णादीनां गुणवाचकपदानां ग्रहणं येषां च गुणिनां बोधनेच्छया प्रयोगो भवति।

सादृश्यमूलकम् उदाहरणम्- '**धर्मस्यायमनुकूलः**' अत्र कूलमनुगतः इति व्युत्पत्तिबलेन कूलानुगतत्वविशिष्टो मुख्योऽर्थः(नदीतटानुगामी)। तस्य बाधे, एकवस्तुप्रवणत्वरूपेण सादृश्यसम्बन्धेन लक्षणया अनुगुणरूपोऽर्थः प्रतिपाद्यते।

1. '**धर्मस्यायं प्रतिकूलः**' अत्र कूलं प्रतिगतः इति व्युत्पत्त्यर्थस्य कूलविरुद्धरूपार्थस्य शक्यार्थस्य बाधे सति तस्य विरुद्धत्वात्मकेन सादृश्यसम्बन्धेन विमुखरूपार्थः लक्ष्यार्थो भवति।
2. '**अनुलोमः**' अत्र लोम अनुगतमिति व्युत्पत्तिलभ्यार्थः आनुपूर्व्या स्थितः कचः इति। तस्य वाच्यार्थस्य 'अनुलोमजातिसङ्करः' इति वाक्यगततच्छब्दवेद्यस्य बाधे सति आनुपूर्व्यात्मकेन सादृश्यसंबन्धेन तथाभूतव्यक्तौ लक्षणा।
3. **'प्रतिलोमः'** इत्यत्र लोम प्रतिगत इति व्युत्पत्त्यर्थः विरुद्धक्रमेण स्थितः कचः इत्यस्ति। तस्य मुख्यार्थस्य 'प्रतिलोमजातिसङ्करः' इति वाक्यगततच्छब्दवेद्यस्य बाधे सति सादृश्यसम्बन्धेन विरुद्धक्रम-जातिविशेषजने लक्षणा भवति।
4. **'लावण्यम्'** इत्यत्र लवणस्य भावः इतिव्युत्पत्तिलभ्यार्थः। लवण-

भावस्य वाच्यार्थस्य सौषम्यरूपार्थे बाधे सति हृदयङ्गमत्वसादृश्यसम्बन्धेन तस्मिन्नर्थे लक्षणा भवति।

एतानि उक्तानि सर्वाण्युदाहरणानि सादृश्यसम्बन्धमूलकानि सन्ति।

निरूढालक्षणाया अन्यसम्बन्धमूलकानि उदाहरणानि-नीलपीतकृष्णादीनि। 'नीलो घटः' 'नीलरूपम्' इति उभयविधस्य व्यवहारः प्रवर्तते। गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वति इति कोशोक्तिः प्रमाणम्[1]। अतस्तस्यां स्थितौ तयोः पदयोः शक्तिः गुणे गुणिनि वा कुत्र मन्तव्या इति चेत् गुणे शक्तिः स्वीकार्या। यतोहि गुणे शक्त्यङ्गीकारे गुणगतनीलत्वादिजातेः शक्यतावच्छेदकत्वेन लाघवं भवति। गुणिनि च शक्तेः स्वीकारे आश्रयभेदात् भिन्ननीलादिगुणानां शक्यतावच्छेदकतयाङ्गीकारे गौरवापत्तिः। एवं नीलो घटः इत्यत्र नीलशब्दस्य नीलगुणे, घटशब्दस्य घटत्वविशिष्टद्रव्ये शक्तिरस्ति। इत्यतः गुणद्रव्ययोः सामानाधिकरण्येन अभेदसम्बन्धेन अन्वयस्यानुपपत्त्या मुख्यार्थस्य बाधे, नीलगुणरूपमुख्यार्थस्य समवायवृत्त्या नीलादिशब्दैः नीलत्वादिगुणविशिष्टा लक्ष्यार्था बोध्यन्ते। अनादिप्रयोगप्रवाहरूपा रूढिः अत्र कारणम्। पूर्वोक्तोदाहरणानि निरूढालक्षणाया भवन्ति। इति ग्रन्थकारोक्तदिशा ज्ञायते।

ग्रन्थकारः उक्तोदाहरणेषु मतान्तरं प्रस्तौति-सादृश्यमूलकोदाहराणतया गौणी तद्भिन्नसम्बन्धमूलकोदाहरणतया शुद्धा इति निरूढालक्षणायाः भेदाः स्वीकृताः। तत्र ग्रन्थकर्तुः असम्मतिः प्रतीयते। अतः गौणीशुद्धयोः निरूपणावसरे निरूढालक्षणायाः गौणी शुद्धेति क्रमो न स्यात्। इति जगन्नाथः अभिप्रैति।

अधुना षड्विधप्रयोजनवत्याः भेदान् निरूपयति। तत्र गौणी शुद्धा चेति।

**गौणी**-सादृश्यसम्बन्धाज्जायमाना लक्षणा गौणी।

**शुद्धा**-सादृश्येतरसम्बन्धाज्जायमाना लक्षणा शुद्धा।

गौण्याः सोदाहरणं भेदौ -

---

1. अमरकोशः

१.**सारोपा**-
विषयविषयिणोः पृथङ्निर्दिष्टयोरभेद आरोपः[1]।

यत्र विषयः (यत्र आरोपो भवति) विषयी (यस्य आरोपः) च, तयोः भिन्नतया निर्देशं कृत्वा क्रियमाणः आरोपः सारोपा। उदाहरणम्-'मुखं चन्द्रः' इति। अत्र चन्द्रपदस्य चन्द्रसदृशे लक्षणा भवति, यतो हि चन्द्रपदस्य इन्दुरूपमुख्यार्थस्य मुखेन सह अभेदान्वयः बाधितः। एषा सादृश्यसम्बन्ध-मूलतया गौणी, मुखरूपविषयस्य चन्द्ररूपविषयिणश्च भिन्नतया उभयोः वर्णनेन चन्द्रस्य मुखे आरोपाद् सारोपा भवति। इयमेव रूपकालङ्कारस्य बीजम्।

२. **साध्यवसाना**-अपृथङ्निर्दिष्टे विषये विषय्यभेदोऽध्यवसानम्[2]। यत्र विषयविषयिणोः पृथङ्- निर्देशः न भवति, केवलं विषयिण एव कथनम् आरोपाभावः तत्र साध्यवसानात्मको भेदः।

उदाहरणम्- 'पुरेऽस्मिन् सौधशिखरे चन्द्रराजी विराजते'। अस्मिन्नगरे अट्टालिकाश्रृङ्गेषु चन्द्रपङ्क्तिः वर्तते। अत्र चन्द्रश्रेणिः इत्यनेन कामिनीनां सुन्दरमुखश्रेणिः शोभते इति गृहीतम्।

चन्द्रपदस्य मुखे सादृश्यसम्बन्धात् लक्षणास्ति। यतोहि अट्टालिका-शिखरेषु चन्द्रपङ्क्तेः अवस्थितेः बाधिततया अत्र विषयस्य मुखस्य पृथक् अकथनतया चन्द्रराजी इति पदेनैव तस्य बोधः। अतः एषा साध्यवसाना कथ्यते।

शुद्धायाः जहत्स्वार्था अजहत्स्वार्था सारोपा साध्यवसाना चेति भेदाः कृताः। परन्तु एते चत्वारो भेदा अलङ्कारतया परिणताः सन्तः पार्थक्येन नोपात्ताः।

शुद्धायाः भेदाः

३. **जहत्स्वार्था**-इत्यस्य स्वरूपं ग्रन्थकारेण नोक्तम्- जहत् त्यजन् स्वार्थः यत्र सा जहत्स्वार्था। उदाहरणम्-

---

1. रस. द्वि.आ.पृ.१६८
2. रस. द्वि.आ.,पृ.१६८

कृतं त्वयोन्नतं कृत्यमर्जितं चामलं यशः।
यावज्जीवं सखे ! तुभ्यं दास्यामो विपुलं यशः[1]॥

इदं कस्यचन अपकृतस्य सख्युः अपकर्तारं बन्धुं प्रति वचनम्। अतः उन्नतमित्यादिपदार्थे बाधिते तेषां पदानां हीनार्थे निन्दार्थे च लक्षणा क्रियते। तस्माद् वाक्यार्थः भवति-त्वया परम् निन्दनीयकार्यं कृतम् मलिना कीर्तिः च प्राप्ता अतो वयं त्वां यावज्जीवं शपिष्यामहे तिरस्करिष्यामः इति। एतस्मिन्नर्थे उन्नतमित्यादिपदोक्तानां वाच्यार्थानां सम्बन्धः नितरामनुपपन्नः। अत उक्तपदैः स्वार्थं त्यक्त्वा हीनाद्यर्थः स्वीकृतः। तस्मात् कारणात् इयं जहत्स्वार्थालक्षणा भवति। तव पापातिशयः कथमपि वक्तुं न शक्यते इति व्यङ्ग्यत्वम्।

४. **अजहत्स्वार्था-**अत्रापि नाम्ना पदार्थः स्फुटः यत् पदानि यत्र स्वार्थं न जहति त्यजन्ति तत्र सा अजहत्स्वार्था।

उदाहरणम्-

बधान द्रागेव द्रढिमरमणीयं परिकरं
किरीटे बालेन्दुं नियमय पुनः पन्नगगणैः।
न कुर्यास्त्वं हेलामितरजनसाधारणधिया।
जगन्नाथस्यायं सुरधुनि समुद्धारसमयः[2]॥

अत्र जगन्नाथः पुरुषविशेषः। वक्तुः आत्मनामग्रहणं शास्त्रविरुद्ध-मित्यतः तात्पर्यानुपपत्तेः मुख्यार्थबाधः। लक्षणया जगन्नाथपदस्य विविध-पापकारिजगन्नाथात्मकव्यक्तिविशेषार्थः प्रतिपाद्यते। प्रयोजनं च पदान्तरा-प्रतिपाद्यपापकत्वम्। इयमेव अजहत्स्वार्था उपदानलक्षणापरपर्यायेण अपि व्यवह्रियते।

शुद्धायाः लक्षणायाः भेदयोः सारोपासाध्यवसानयोः उदाहरणं पृथक्तया ग्रन्थकारः न प्रादात्। तेन प्राचीनैरस्मिन् प्रसङ्गे प्रदर्शितं लक्ष्यं जगन्नाथस्यापि सम्मतमिति भाति।

---

1. तत्रैव, पृ.१३०
2. तत्रैव, पृ.१३१

जगन्नाथोक्तलक्षणाभेदाः चित्रद्वारा प्रदर्श्यन्ते

| |
|---|
| लक्षणा सप्तभिदा |
| १ निरूढा २. प्रोजनवती |
| सादृश्यमूलकोदाहरणम् १. अनुकूलः **१. गौणी** |
| २. प्रतिकूलः १. सारोपा साध्यवसाना |
| ३. अनुलोमः 'मुखं चन्द्रः''पुरेऽस्मिन् सौधशिखरे चन्द्रराजी विराजते' |
| ४. प्रतिलोमः**शुद्धा**. |
| ५. लावण्यम्जहत्स्वार्था अजहत्स्वार्था सारोपा ४.साध्यवसाना |
| समवायमूलकोदाहरणम्- १.नीलः'कृतं त्वयोन्नतं कृत....' उदा-'बधान द्रागेव.' |
| २. पीतः |
| ३. कृष्णः |

**कर्णपूरमते लक्षणाभेदः**

कर्णपूरः हेमचन्द्रादय इव मम्मटमतानुगामी वर्तते। क्वचित् अस्य मतं मम्मटमताद् भिद्यते। स अलङ्कारसारे द्वितीयोल्लासे लक्षणाप्रभेदान् प्रत्यपादयत्। किञ्च हेमचन्द्रविश्वनाथादिरिव रूढिस्थले लक्षणाव्यवहारं नाङ्ग्यकरोत्[1]। अतः रूढिं लक्षणाहेतुतया अमन्वानः प्रयोजनपरतया लक्षणाप्रभेदान् अजीगणत्। केवलं मम्मटोक्तलक्षणाभेदान् स्वीकृत्य शुद्धायाः जहदजहद्भेदम् अतिरिक्ततया अङ्गीकृत्य फललक्षणायाः सप्तभेदान् स्वीकृतवान्। इमे एव भेदाः गूढागूढमुखेन चतुर्दशत्वं प्राप्नुवन्ति। निरूढायाः एकेन भेदेन, फललक्षणायाः चतुर्दशभेदैः सह लक्षणा पञ्चदशविधा जायते। सर्वेषामपि भेदानां लक्ष्याणि काव्यप्रकाशस्य त्रिवेणिकायाश्च लक्षणा-भेदोदाहरणान्येव अवालम्ब्यन्त।[2]

1. अ..सा., पृ.१२
2. तत्रैव, पृ.१४

**हेमचन्द्रमते लक्षणाभेदः**

अयं काव्यानुशासने कुत्रापि स्पष्टतः लक्षणाभेदविषयिणीं चर्चां नैव अकार्षीत्। परं सर्वत्र मम्मटीयं नयम् अनुससार। एष उपादान-लक्षणालक्षणयोः प्रसङ्गे तान्येव उदाहरणानि प्रास्तौत्। यानि च काव्यप्रकाशकारेण निगदितानि। टीकाकारादेरभिप्रायमधिगम्य काव्यप्रकाशीयमार्गञ्च तत्र दृष्ट्वा इदमेव भाति यत् अनेनापि लक्षणायाः षड्भेदाः स्वीकृताः इति।

विशेषस्तु- हेमचन्द्रस्य मते रूढिः लक्ष्यार्थस्य हेतुः न भवति। कारणं रूढिजः लक्ष्यार्थः वस्तुतः कोऽपि न भवति। अथ च कुशल-द्विरेफ-द्विकादिषूदाहरणेषु निपुणभ्रमरवायसादयः अर्थाः रूढिवशात् लक्षिता इति मन्यते। एतदनुसारमेव रूढिहेतुकानां लक्ष्यार्थानां सिद्धिः क्रियते। ते वास्तविकाः तेषां शब्दानां साक्षात् सङ्केतितार्थाः सन्ति। अत एव कुशलादयः शब्दाः तत्तदर्थानां वाचका न तु लक्षका इति हेमचन्द्रीयमतम्[1]।

**विश्वेश्वरपण्डितमते लक्षणाभेदः**

विश्वेश्वरपण्डितः लक्षणायाःअष्टौ भेदान् इत्थं वर्णयति। लक्षणा द्विविधा निरुढा प्रयोजनवती। प्रयोजनवती च सप्तविधा यथा- तस्याः शुद्धागौणीभेदात् द्विधात्वम्। तत्रापि शुद्धायाः जहत् अजहत् जहदजहत् सारोपा साध्यवसाना। गौणी सारोपासाध्यवसानारूपात् द्विविधा भवति। तस्मात् निरूढायाः एकम्, फलवत्याः सप्त इति आहत्य अष्टौ भेदाः लक्षणायाः भवन्ति[2]।

**मौनिश्रीकृष्णभट्टमते लक्षणाभेदः**

असौ वृत्तिदीपिकायां प्रथमतः शुद्धागौणीभेदात् लक्षणां द्विधा कथयति। तत्र पुनः प्रत्येकं जहत्स्वर्था अजहत्स्वार्था इति भेदौ। पुनः लक्षितलक्षणानामकः अन्यः भेदः अपि एतेन स्वीकृतः[3]।

1. हे. का., वृत्तिभागः, १/८
2. चन्द्रिका, पृ.४२-४३
3. वृ.दी.,पृ.११

**भूदेवशुक्लमते लक्षणाभेदः**

असौ सर्वातिरिक्तशैल्या अभिनवभङ्ग्या रसविलासे लक्षणाप्रकारान् एवमाह- प्रथमं लक्षणायाः द्वौ भेदौ निरूढा फलवतीति। असौ तत्र निरूढां गौणी शुद्धा इति विभज्य फललक्षणायाः जहल्लक्षणा अजहल्लक्षणा सारोपा साध्यवसाना गौणी शुद्धा चेति विभज्य लक्षणायाः अष्टौ भेदान् अभ्युपैति[1]।

**विश्वनाथदेवमते लक्षणाभेदः**

एषः साहित्यसुधासिन्धौ काव्यप्रकाशोक्तभेदानेव निरूप्य तन्मत-मङ्गीकृतवान्।

असौ उत्कलीयः स्वीयस्य ग्रन्थस्य आधारतया साहित्यदर्पणमेव मनुते। एषः साहित्यभूषणस्य प्रणयनात् विश्वनाथीयं प्रबन्धमेव पपाठ। यतोहि एतत्कृत-ग्रन्थबन्धनशैली साहित्यदर्पणशैल्या समा प्रतिभासते। रघुनाथदासः साहित्य-भूषणे कविराजविश्वनाथस्य लक्षणाप्रभेदनिरूपणशैलीम् अनुसृत्यैव तद्विभागान् अकरोत्। एतस्य केचन मौलिका विचारा हृद्याः सन्ति।

१. अरोपितशब्दव्यापारः इति लक्षणास्वीकारे अर्थधर्मस्य शब्दाध्यारोपे किं निमित्तम् इति जिज्ञासायामुच्यते- वृत्त्याः रूपादि, व्यापार-संस्पर्शमन्तरेण अर्थान्तरं न लक्षयितुं क्षमते नो चेत् अन्यप्रमाणद्वारा उपनीतार्थानां लाक्षणिकत्वप्रसङ्गसत्वात्।

२. स्वशक्यसम्बन्धो लक्षणेति नैयायिकमतस्य आलोचनां विदधत् आह स्वं गङ्गा, तस्य शक्यः प्रवाहादिः, तत्सम्बन्धस्तीरम् इति। शक्याद् अशक्यार्थोपस्थितिः लक्षणा इति न वाच्यम्। यतोहि लक्षणा तु तदुपस्थितिहेतुः न तु तदुपस्थितिरेव इति।

३. एषः प्राचीनोक्तेषु रूढिविषयकद्विरेफादिषु उदाहरणेषु लक्षितलक्षणां मन्यते। यत्र तु परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणा इत्युच्यते[2] यथा- द्विरेफादिः। एतन्मतेऽपि साहित्यदर्पणक्रमानुसारं


---

1. विलास.,पृ.८७
2. सा.भू., पृ.३०

लक्षणा अशीतिभेदा निरूपिता।

**हरिदासमते लक्षणाभेदः**

एतस्य मतेऽपि लक्षणा षड्विधा भवति। सूत्रशैल्या काव्यालोकग्रन्थं प्रणीय तत्र प्रथमप्रकाशे लक्षणायाः प्रभेदान् उपापादयत्। एषः मम्मट इव लक्षणायाः षड्भेदान् अभ्युपागमत्। एषः लक्षणाभेदनिरूपणावसरे मम्मटसरणिम् अनुससार। प्रथमतः लक्षणा द्विविधा- शुद्धा गौणी चेति। तत्र गौण्याः सारोपा साध्यवसाना च भेदौ। शुद्धायाः उपादानलक्षणा, लक्षणलक्षणा, सारोपा, सध्यवसाना चेति चत्वारो भेदाः सन्ति। पुनः व्यङ्ग्यदिशा लक्षणा त्रिधा भवति- अव्यङ्ग्या गूढव्यङ्या अगूढव्यङ्ग्या चेति[1]।




उदा०-मञ्चाः क्रोशन्ति, कुन्ताः प्रविशन्ति उदा०-मुखं चन्द्रः

चित्रम् -

**उपादानलक्षणालक्षणलक्षणासारोपा साध्यवसाना सारोपा साध्यवसाना**

उदा०-यष्टयः प्रविशन्ति उदा०-गङ्गायां घोषः उदा०आयुर्घृतम् उदा०-आयुरेवेदम् उदा०-गौर्वाहीकः उदा०-गौरयम्

**नरसिंहमते लक्षणाभेदः**

नरसिंहः नञ्जराजयशोभूषणे लक्षणां चतुर्धा व्यभजत। यथा- लक्षणायाः सम्बन्धनिबन्धना सादृश्यनिबन्धना इति उभौ भेदौ, सम्बन्धनिबन्धनायाः

---

1. का.लो, पृ.८१-८४

जहद्वाच्या अजहद्वाच्या इति सादृश्यनिबन्धनायाः सारोपा साध्यवसाना चेति विभागं स्वीचकार। तस्मात् एतन्मते लक्षणा चतूरूपा शिष्यते[1]।

**साहित्यसारग्रन्थसम्मता लक्षणाभेदः**

लक्षणायाः चत्वारो भेदा उपलभ्यन्ते। यथा- गौणी शुद्धा विरुद्धा लक्षितलक्षणा चेति। पुनः अत्र निरूढाप्रयोजनवतीरूपेणापि द्वौ भेदौ व्याख्यातौ। प्रयोजनवत्याः गौणी शुद्धेति भेदौ कृतौ, एवं तौ प्रत्येकं सारोपासाध्यवसानाभ्यां द्वैविध्यं धत्तः। गौण्याः विशिष्टलक्ष्या, विशिष्टलक्षका सहेतुलक्षणा निर्हेतुलक्षणा इति चत्वारो भेदाः कृताः इति [2]।

**आशाधरभट्टमते लक्षणाभेदः**

आशाधरभट्टः वृत्तिविषयकौ द्वौ ग्रन्थौ अरीरचत्। तौ च त्रिवेणिका कोविदानन्दविमर्शः इति। असौ जगन्नाथोत्तरकाले शब्दशक्तिनिरूपणे सप्तदशशतब्द्याम् अत्यन्तं प्रख्यात आसीत्। एषः उभयस्मिन् ग्रन्थे लक्षणावृत्तिं सविशदं विवेचयामास। जगन्नाथस्य लक्षणास्वरूपं निरस्य तस्याः षट्त्रिंशत्भेदान् विवेचयितुम् उपक्रान्तोऽभवत्। एषः लक्षणाप्रयोजकत्वेन मुख्यार्थादिं स्वीचकार। प्रथमं लक्षणा जहती अजहती जहदजहतीरूपात् त्रिधा भवति। जहत्यां शक्यभिन्नस्य, अजहत्यां शक्यविशिष्टस्यान्यस्य, जहदजहत्यां शक्यैकभागस्य च ग्रहणम्। अन्तिमा शक्यस्य कस्यचन अंशस्य ग्रहणेन कस्यचित्त्यागः इति जहदजहती लक्षणा कथ्यते। प्रथमायां च शक्यस्य सर्वथा त्यागात् तस्या नाम जहती। मध्यमायां तु शक्यस्य त्यागो न भवति अपितु तद्विशिष्टस्य अन्यस्य ग्रहणमिति सा लक्षणा अजहती। एवं त्रिविधा सा रूढिप्रयोजनमूलतया पुनर्द्विधा भूत्वा षोढा भवति। तत्र रूढा अनादिसिद्धा, प्रयोजनवती तु आधुनिकपुरुषोत्प्रेक्ष्या। एवं षड्विधा अपि सारोपाध्यवसानमूलत्वेन द्वेधाकृत्य द्वादशधा जायते। यत्र विषयविषयिणोः सामानाधिकरण्येन निर्देशस्तत्र सारोपा। प्रयोजनवत्यां सारोपायां सादृश्यशैथिल्यस्या-

1. नञ्जरा, पृ.१५
2. साहित्यसारः, पृ.४०-४५-५०

भावः प्रयोजनम्। यत्र निर्दिष्टेन विषयिमात्रेण विषयस्य ज्ञानं तत्र साध्यवसाना। प्रयोजनसाध्यवसानायां सादृश्यातिशयः प्रयोजनम्। उक्ता द्वादशविधा शुद्धागौणीभेदात् द्विधा विभजमाना चतुर्विंशतिधा जायते। यत्र सादृश्य-सम्बन्धस्तत्र गौणी, यत्र च सादृश्येतरसम्बन्धस्तत्र शुद्धा। शुद्धासारोपायां शुद्धासाध्यवसानायां प्रयोजनवत्यां सादृश्यशैथिल्यं तदतिशयो वा प्रयोजनं न मन्तव्यं तत्र सादृश्यसम्बन्धाभावात्। अतस्तत्र अव्यभिचरितकार्यकारणभावादि गौणीतः भिन्नमेव प्रयोजनम्। तत्रापि प्रयोजनस्य गूढागूढतया द्वादशभेदा प्रयोजनवती द्विधाभूत्वा चतुर्विंशतिप्रकारा तिष्ठति। एवं रूढायाः द्वादश प्रयोजनवत्याः चतुर्विंशतिरिति सम्मेल्य लक्षणायाः षट्त्रिंशद्भेदा जायन्ते। क्वचित् जयदेवानुसरणिरपि अनेन अनुसृता वर्तते। तद्वत् असावपि नानाविधधर्मावलम्बेन लक्षणाविभागान् स्वीकरोति।

**लक्षणा**

**प्रथमप्रकारः-** १.जहती- 'ओङ्कारलिङ्गं रेवायाम्'

२.अजहती- 'शोणैरर्च्यं दिनोदये'

३.जहदजहती- 'यतः प्रफुल्लाः पद्मिन्यः'

**द्वितीयप्रकारः** -निरूढाप्रयोजनवत्यौ अपि जहदादिरूपात् पृथक्तया त्रैविध्यं भजेते।

१.निरूढाजहती-उदा०'स्तुवन्तिवाग्भिरर्चन्ति' २.निरुढा-अजहती-उदा०-'पाणिभिरर्चन्ति' ३.निरुढाजहदजहती-उदा०-'नीलललोहितम्'।

आशाधरभट्टः निरूढालक्षणप्रसङ्गे स्वं नूतनं मतं ददाति। - क्वचिद् विवक्षावशाद् निरूढायामपि प्रयोजनम् आमनति। उदाहरणाय 'तत्राङ्गभूषणं वन्दे देव देवं हृदि स्थितम्'। अत्र हृच्छब्दस्य मनसि लक्षणा वर्तते, सा च निरूढा सन्निधिप्रतीतिरूपं फलमत्र विवक्षितम्। तत्र कोशादौ यद्यपि निरूढा शब्दाः उपदिष्टास्तथापि, इयं शक्तिर्विलक्षणा। कादम्बिन्याम् निरूढाविषये मतद्वयमस्ति। तत्र हि एकस्मिन्मते स्वान्तादिशब्देषु निरूढालक्षणा शक्तिश्च प्रोक्ता वर्तते। इति

१. गूढ-प्रयोजनवतीजहती-उदा०-'प्रसादास्सन्ति रेवायां' २. प्रयोजनवती-

अजहती-उदा०'यष्टयः प्रविशन्ति' ३.प्रयोजनवतीजहदजहती-उदा०-'शम्भौ अम्भः क्षिपन्ति च'।

अगूढप्रयोजनम्-

१.जहती-'यःश्रुत्योकुण्डलेधत्ते'

२.अजहती-'यच्छ्रुतिचक्षुषोःस्थिते'।

३.जहदजहती-'तन्नागभूषणं वन्देदेवदेवं हृदिस्थितम्'

**तृतीयप्रकारः** १.सारोपा-मुखंचन्द्रः, २.साध्यवसाना-चन्द्रोऽयम्

**चतुर्थप्रकारः**

१.शुद्धासारोपा-'शिवं शम्भुं भजेत्' २.शुद्धासाध्यवसाना-'शिवंभजेत्'

३.गौणीसारोपा-'स्त्रीरत्नं गिरिजा'

४.गौणीसाध्यवसाना-'सैषा रत्नं संसारवारिधेः'

५.प्रयोजनवतीशुद्धासारोपा-'मुक्तिःशिवस्य पूजैव'।

६.प्रयोजनवतीशुद्धासाध्यवसाना – 'हे मुक्ते! मा जहीहि माम्'।

७.प्रयोजनवतीगौणीसारोपा-'शिवपूजा मम प्राणाः'।

८.प्रयोजनवतीगौणीसाध्यवसाना-'हेप्राणाः! विरताः स्थ मा।

यथा-

> स्त्रीरत्नं गिरिजा सैष रत्नं संसारवारिधेः।
> निरूढा गौणसारोपाऽन्या च सादृश्ययोगतः
> मुक्तिः शिवस्य पूजैव हे मुक्ते मा जहीहि माम्।
> फलिनी शुद्धसारोपाऽन्या च बीजफलत्वतः॥
> शिवपूजा मम प्राणाः हे प्राणःविरताः स्थमाः॥
> फलिनी गौणसारोपा परा च सदृशत्वतः[1]

त्रिवेणिकायां महोदयेन सम्बन्धमुखेनापि लक्षणाभेदाः प्रतिपादिताः।

सम्बन्धमुखेनापिलक्षणाविभागा इत्थं विहिता वर्तन्ते। - शक्यसम्बन्धः लक्षणायाः सहकारी भवति, सः यद्यपि नानाविधस्तथापि समासेन त्रेधा भवति।

---

1. कोवि., पृ.२/१४,१५,१६

१समवायः२ संयोगः३ विशिष्टबुद्धिजनकः इति।

समवायस्तु द्वयोः अविविक्तयोः पदार्थयोः कश्चनसम्बन्धविशेष एव। सः अवयवावयविभावः गुणगुणिभावः क्रियाक्रियावद्भावः जातिव्यक्तिभावः विशेषनित्यद्रव्यभावः चेति समवायस्य इमे भेदा भवन्ति।

एकैकस्य उदाहरणं प्रदर्शितमस्ति।

अवयवावयविभावः-शाखामृगः, वनमृगः।

गुणगुणिभावः-सुरभिफलेषु मानसम्, शर्करामास्वादयति।

क्रियाक्रियावद्भावः-भागत्यागलक्षणोदाहरणं ग्राह्यम्।

जातिव्यक्तिभावः-क्षत्रजातिरूपाय भुजाभ्याम्।

२.संयोगसम्बन्धमुखेन-ओङ्कारलिङ्गं रेवायाम्, आत्मानमलङ्करोति, वटे गावः सुशेरते।

३. विशिष्टबुद्धिजनकः (विशेषणविशेष्यावगाहिनी बुद्धिः)- राजकीये पुरुषे राजपदप्रयोगः राजत्वविशिष्टपुरुषविशेष्यकः स्वस्वामिभावःसम्बन्धः इति[1]। एवंरीत्या आशाधरभट्टप्रतिपादित- लक्षणाप्रभेदनिरूपणम् उभाभ्यां ग्रन्थाभ्यां प्राप्यते।

---

1. त्रिवे.,पृ.१७

**लक्षणा षट्त्रिंशद्विदा (३६)**
जहती अजहती जहदजहती
रूढि प्रयोजनवती रूढि प्रयोजनवती रूढि प्रयोजनवती
सारोपा साध्यवसाना सारोपा साध्यवसाना सारोपा साध्यवसाना सारोपा साध्यवसाना सारोपा साध्यवसाना सारोपा साध्यवसाना शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी शुद्धा गौणी
गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू. गूढ्. अगू गूढ्. अगू. गूढ्. अगू. गूढ्. अगू.
एवं रीत्या प्रत्येकं शुद्धागौण्योः गूढागूढतया विभागः अक्रियत।

## ४. उभयेषामप्यालङ्कारिकाणां तदीयग्रन्थानुरोधात् लक्षणाविषयको मतभेदविमर्शः।

मम्मटाचार्यस्य मुकुलभट्टप्रदर्शिते उपादानलक्षणाप्रसङ्गे उदाहरणद्वये असन्तोषः बुद्ध्यते। यच्च तेन उपादाननिरूपणावसरे काव्यप्रकाशे प्राकाशि। मुकुलभट्टस्य निरूपितायाः उपादानलक्षणायाः प्रथमे उदाहरणे आक्षेपं कथयति यत् 'गौरनुबन्ध्यः' अत्र श्रुतिप्रतिपदितवाक्ये यज्ञकर्मणि गवालम्भनं कर्तव्यम् इत्यर्थे वाक्यमुपात्तम्। गोशब्दस्य अभिधेयता गोत्वम् तदानयनं बाधितम्, तस्मात् गोशब्दार्थेन गोत्वेन जातिवान् व्यक्तिविशेषः लक्षणया आक्षिप्यते विशेष्यं नाभिधागच्छेत् क्षीणशक्तिर्विशिषणे[1] इत्युक्ते विशेषणावबोधे एव अभिधायाः विरततया विशेष्यप्रतिपादने असामर्थ्यं भवति इति मुकुलभट्टाशयः।

प्रयोजनाभावात् रूढेरभावात् च लक्षणायाः अप्रसङ्गतया व्यक्त्या सह जातेः अविनाभावित्वात् व्यक्तिः आक्षिप्यते इति मम्मटाचार्यः समाधाय तत्र लक्षणास्थलमेव न दर्शयति।

---

1. का.प्र, नागेश्वरी, पृ. २/१५

मुकुलभट्टस्य द्वितीयमुदाहरणम् –'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र दिवा अभुञ्जानस्य देवदत्तस्य पीनत्वार्थस्यानुपपन्नतया तस्य पीनत्वार्थोपपत्तये लक्षणया रात्रिकालिकभोजनरूपार्थः बोध्यते। तस्मादत्रापि मुकुलभट्टमते लक्षणा।

अत्र श्रुतार्थापत्तेः अर्थापत्तेः इति अर्थापत्तिप्रमाणविषयतया रात्रिभोजनं लक्षणया न गतार्थ्यते इति मम्मटाशयः। मीमांसकमते अर्थापत्तिः प्रमाणान्तरम्। यथा अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनम् अर्थापत्तिः[1]। अनुपपन्नमर्थं दृष्ट्वा तदुपपादकीभूतार्थान्तरस्य कल्पना तत्र दृष्टार्थापत्तिः यत्र अनुपपद्यमानार्थं श्रुत्वा तदुपपादकीभूतार्थान्तरस्य कल्पना तत्र श्रुतार्थापत्तिः। अत्र मम्मटेन उभयविधयोः अर्थापत्त्योः विषयः कथितः। तस्मात् लक्षणा-प्रसङ्गः अपाकृतः।

शुद्धागौणीलक्षणाविषयकं मतम्

**मम्मटीयमतम्** - शुद्धागौणीलक्षणायाः परस्परं भेदकधर्मः कः? इत्यनेन मुकुलभट्टमम्मटयोः मिथः मतभेदः अस्ति। उपचारेणामिश्रितत्वात् इत्युक्त्वा मम्मटाचार्यः उपचारं शुद्धागौण्योः भेदकधर्मं मनुते। उपचारपदार्थं दर्पणकारः एवमाह- 'उपचारो हि नाम अत्यन्तं विशकलितयोः पदार्थयोः सादृश्याति-शयमहिम्ना भेदप्रतीतिस्थगनमात्रम्' अत्यन्तं भिन्नयोः द्वयोः पदार्थयोः सादृश्याधिक्येन भेदप्रतीतेः अभावः उपचारः कथ्यते। यथा-'सिंहो माणवकः' द्वयोः सिंहमाणवकयोः विरुद्धपदार्थयोः माणवके शूरक्रूरतादेः सादृश्याधिक्य-महिम्नः सिंहो माणवकः इति व्यवहारः कृतः। इत्यतः उपचारमिश्रिता गौणी उपचारशून्या शुद्धा इति द्व्योःनियामकधर्मः उपचारस्तिष्ठति मम्मटमते।

**मुकुलभट्टीयमतम्**[2] अस्य अस्मिन् विषये स्वतन्त्रविचारो लक्ष्यते। असौ उपचारं गौणीशुद्ध्योः भेदकधर्मतया न स्वीकरोति। यतः उपचारमिश्रणन्तु शुद्धागौण्योः भवति। अतः शुद्धोपचारात् गौणोपचारात् इति भेदं विधाय ततः

1. का.प्र, विश्वेश्वरी, पृ.२/६१
2. शब्दशक्तिव्यापारविचारः, पृ.९

सारोपासाध्यवसाने इति भेदौ आमेने। शुद्धोपचारः कार्यकारणभावादि-सम्बन्धिकः, अन्यवस्तुनि अन्यवस्तुनः प्रयोगः। गौणोपचारे तु अन्यवस्तुनि अन्यवस्तुनः प्रयोगः, उपमानोपमेयभावकः उपमानगतगुणसदृशगुणयोग-लक्षणात् सम्भवतीति। यथा- गौर्वाहीकः गोगतजाड्यमान्द्यादिसदृशगुणयोगात् उपमानोपमेयभावेन वाहीके गोशब्दः उपचर्यते, गौणोपचारः। आयुर्घृतमित्यादौ कार्यकारभावसम्बन्धेन आयुश्शब्दः घृते उपचर्यते।

**अन्यदीयमतम्**

केषाञ्चन मते शब्दस्य शब्दस्योपरि उपचारः न तु अर्थस्य अर्थस्योपरि। कथितमपि शब्दोपचारस्य अर्थोपचारेण सह अविनाभावि-सम्बन्धत्वात् अर्थोपचारः शब्दोपचारं विना शुद्धोपचारः अर्थोपचारं विना न कल्प्यते इति। अतः तन्मतमयुक्तं निर्भ्रान्तञ्च इति। मुकुलभट्टः उपचारं विहाय ताटस्थ्यं शुद्धागौण्योः भेदकधर्मं मनुते। ताटस्थ्यं नाम लक्ष्यार्थस्य लक्षकस्य भेदः, अर्थात् गौण्यां सादृश्यातिशयमहिम्ना लक्ष्यस्य लक्षकस्य अभेदप्रतीतिः भवति, शुद्धायां तु लक्ष्यलक्षकयोः अभेदः न अपितु भेदः 'ताटस्थ्यं' भवति।

यथा-गौर्वाहीकः इत्यादौ गोवाहीकयोः भिन्नपदार्थयोः भेदे सत्यपि अभेदप्रतीत्यर्थं तयोः द्वयोः पदयोः सामानधिकरण्येन प्रयोगोऽभवत्। शुद्धायाम् उपादानलक्षणलक्षणायां कुन्ताः प्रविशन्ति, गङ्गायां घोषः इत्यादौ तु द्वयोः अपि पदार्थयोः लक्ष्यलक्षकयोः अभेदः नास्ति, किञ्च भेदरूपं ताटस्थ्यमेव ज्ञायते इति तटस्थे लक्षणा शुद्धा इत्यमुं सिद्धान्तं पुष्णाति मुकुलभट्टः। अतः मम्मटसिद्धान्तात् मौकुलिको मतभेदः इयानेव विद्यते यत् शुद्धायां तु लक्ष्यलक्षकभेदः गौण्यामभेदः, मम्मटीयः सिद्धान्तस्तु शुद्धायां लक्ष्यलक्षक-योरभेदः एव। तस्मात् उभयालङ्कारिकाणा इदमेव मतवैभिन्न्यं दृश्यते।

**मम्मटदिशा ताटस्थ्यसिद्धान्तखण्डनम्**[1]

मम्मटः उपादानलक्षणलक्षणामुखेन शुद्धायाः द्वौ भेदौ व्याख्यात्। ततः गौण्याः निरूपणात् पूर्वं द्वयोः शुद्धागौण्योः स्थलं स्पष्टयति। तत्रैव मुकुलभट्टीयं

1. काव्यप्र, नागेश्वरी, पृ.२/.१५

ताटस्थ्यसिद्धान्तं निरसन् कथयति। अनयोः लक्ष्यस्य लक्षकस्य च गङ्गाजलप्रवाहरूपस्य लक्षकस्य तीररूपस्य लक्ष्यस्य च भेदरूपं ताटस्थ्यं न भवति। यतोहि तटादीनां लक्ष्यार्थानां गङ्गादिशब्दद्वारा प्रतिपादने गङ्गात्व-प्रतीत्यां लक्ष्यलक्ष्ययोः तीरजलप्रवाहयोः अभेदरूपत्वप्रतिपत्त्यां सत्यामेव शैत्यपावनत्वादिधर्मातिशयानाम् अभीष्टप्रयोजनानां प्रतीतिः भवितुं शक्या। अन्यथा तटे गङ्गात्वस्य जलप्रवाहस्य वा अभेदप्रतीतेः अनङ्गीकारात् केवलं गङ्गासम्बन्धमात्रस्य प्रतीत्या गङ्गायां घोषः इति लाक्षणिकशब्दकथना-पेक्षया गङ्गातटे घोषः इति मुख्यशब्दस्य कथनेन लक्षणायाः को भेदः, अतः शुद्धायां लक्ष्यलक्षकयोः भेदः न स्वीकार्यः इत्युक्त्वा तन्मतं निरकरोति।

२. मम्मटाचार्यविश्वनाथयोः लक्षणाभेदविषये मतभेदः अस्ति।

१. मम्मटमते लक्षणाभेदः रूढिव्यङ्ग्यभेदमुखेन अभीष्टः नास्ति।

विश्वनाथमते तु रूढिप्रयोजनरूपाभ्यामेव लक्षणायाः प्रथमं भेदः कृतः।

मम्मटमते कुशलपदे लक्षणा भवति। विश्वनाथमते तु कुशलपदार्थः दक्षरूपः कोशादिग्रन्थदिशा वर्तते तत्र लक्षणा न स्वीकृता। मम्मटमते व्यङ्ग्यदृष्टेः लक्षणा त्रिविधा चर्चिता, किन्तु सापि उक्तभेदेष्वेव अन्तर्भूता।

विश्वनाथमते तु व्यङ्ग्यं द्वेधाकृत्य प्रयोजनवत्याः षोडशभेदाः कथिताः।

इत्थमत्र गभीरं लक्षणाभेदविचारः यथाप्रविधिव्याकरणादिशास्त्रेभ्यः लक्षणाभेदाङ्कुरमन्विष्य व्यधायि।

# परिशिष्टम्

**i. परिशिष्टम्**

**उद्धृतलक्षणालक्षणसूची**

काव्यशास्त्रिणां तदितरशास्त्रकाराणाञ्च अध्ययनसौकर्याय तदीय-ग्रन्थोल्लेखपूर्वकं लक्षणावृत्तेः लक्षणानि दिङ्मात्रम् उपस्थाप्यन्ते –

**अलङ्कारशास्त्रम्-**

**प्राचीनालङ्कारिकाः**

**सङ्ख्याशास्त्रकाराः ग्रन्थाः लक्षणानि**

1. उद्भटः, अलङ्कारसारसङ्ग्रहः- 'श्रुत्या सम्बन्धविरहात् यत्पदेन पदान्तरम् गुणवृत्तिप्रधानेन युज्यते तु रूपकं तु तत्'
2. प्रतीहारेन्दुराजः, लघुवृत्तिः- (का.अं.सा.सं.) 'विरुद्धार्थाभिधायिनोः समानाधिकरणयोः शब्दयोर्निरन्तरार्थनिष्ठेन अभिधाव्यापारेण अनुपपद्यमानान्योन्यसमन्वयत्वाद्यद्येकस्य लक्षणया गुणवृत्तित्व-मभिधीयत'।
3. वामनाचार्यः, काव्यालङ्कारसूत्रवृत्तिः -'सादृश्याल्लक्षणावक्रोक्तिः'
4. आनन्दवर्धनः, ध्वन्यालोकः- 'भाक्तमाहुस्तमन्ये अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः'।
5. मुकुलभट्टः, अभिधावृत्तिमातृका - 'अर्थावसेयस्य पुनर्लक्ष्यमाणत्व-मुच्यते'।
6. अभिनवगुप्तपादाचार्यः, लोचनम् - 'मुख्यार्थबाधादिसहकार्यपेक्षार्थ-प्रतिभासनशक्तिर्लक्षणाशक्तिः'।
7. महिमभट्टः, व्यक्तिवेकः - 'अन्त्योऽनुमेयो भक्त्या तु तस्य व्यङ्ग्यत्व-मुच्यते। भक्तेः प्रयोजनांशो यश्चमत्कारित्वलक्षणः'।
8. भोजराजः, श्रृङ्गारप्रकाशः- ''स्वार्थाविनाभूतार्थान्तरोपलक्षणा तु लक्षणेति।

9. राजानकमम्मटः ,काव्यप्रकाशः- शब्दव्यापारविचारः 'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया'॥अर्वाचीनालङ्कारिकाः
10. रुय्यकः, साहित्यमीमांसा-'अभिधेयाविनाभूतं स्पृशन्ती लक्षणोच्यते'।
11. हेमचन्द्रः, काव्यानुशासनम्- 'मुख्यार्थसम्बन्धस्तत्त्वेन लक्ष्यमाणो लक्ष्यः'।
12. केशवमिश्रः, अलङ्कारशेखरः- 'लक्षणा शक्यसम्बन्धः'।
13. जयदेवः, चन्द्रालोकः - 'मुख्यार्थस्याविवक्षायां पूर्वार्वाची च रूढितः। प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता'।
14. विद्याधरः, एकावली- 'मुख्यार्थानुपपत्तौ तद्योगे रूढितोऽथ वापि फलात्। अन्योऽर्थो यदि लक्ष्यो भवति तदा लक्षणाभिमता'।
15. विद्यानाथः, प्रतापरुद्रयशोभूषणम्-'वाच्यार्थानुपपत्त्या तत्सम्बन्धिन्या-रोपितः शब्दव्यापारो लक्षणा इति लक्षणालक्षणम्'।
16. विश्वनाथः, साहित्यदर्पणः-'मुख्यार्थबाधे तद्युक्तः ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वाऽसौ लक्षणाशक्तिरर्पिता'।
17. श्रीकृष्णकविः, मन्दारमरन्दचम्पूः- 'तात्पर्यविषयीभूतार्थान्वयानु-पपत्तिः। शक्यभिन्नार्थधीहेतुर्व्यापारो लक्षणेष्यते'।
18. धर्मसूरी, साहित्यरत्नाकरः - 'वाच्यार्थबाधे तद्योगे रूढितो वा प्रयोजनात्। यथाऽन्यं बोधयेच्छब्दो व्यापृत्या साऽस्य लक्षणा'।
19. अप्पय्यदीक्षितः, वृत्तिवार्तिकम् - 'सा च मुख्यार्थसम्बन्धेन शब्दस्य प्रतिपादकत्वम्'।
20. पण्डितराजजगन्नाथः, रसगङ्गाधरः - 'शक्यसम्बन्धो लक्षणा'।
21. कविकर्णपूरः, अलङ्कारकौस्तुभम् - 'मुख्यार्थबाधे शक्यस्य सम्बन्धे यान्यधीर्भवेत् रूढ्या प्रयोजनेनापि उक्ता सा द्विधा मता'।
22. बालकृष्णभट्टः, अलङ्कारसारः- 'लक्षणा स्वशक्यसम्बन्धः'।
23. विश्वेश्वरपण्डितः, रसचन्द्रिका -'शक्यसम्बन्धो लक्षणा'।

24. भूदेवशुक्लः, रसविलासः - 'शक्यसम्बन्धेनाऽशक्यार्थप्रतिपादकत्वं शब्दनिष्ठं लक्षणा'।
25. विश्वनाथदेवः, साहित्यसुधासिन्धुः- 'यत्र मुख्यार्थबाधः स्यात्तात्पर्याविषयान्वये'।
26. रघुनाथदासः, साहित्यभूषणम् -'मुख्यार्थबाधे तद्योगे रूढितो वा प्रयोजनात्। यद्व्यापृत्त्या रवोऽन्यार्थबोद्धा सा लक्षणार्पिता'
27. हरिप्रसादः, काव्यालोकः- 'लक्षणारोपिता क्रिया'।
28. नरसिंहः, नञ्जराजयशोभूषणम्- 'शक्यार्थस्यानुपपत्त्या तत्सम्बन्धिनि आरोपितशब्दव्यापारो लक्षणा'।

कोविदानन्दः-

'शक्यार्थबाधे सङ्कोचः प्रसारः प्लुतिरेव च।
सङ्केतस्य स्मृता वृत्तिर्लक्षणा योगसम्भवे
त्रैविध्यमेतच्छक्तेर्वालक्षणावृत्तिरिष्यते।
वृत्तिः सङ्केतयोः केचिन्मन्यन्त उभयोरपि॥

**व्याकरणशास्त्रम्**

नागेशभट्टः, लघुमञ्जूषा- 'आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्वयशक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणा'

भर्तृहरिः ,वाक्यपदीयम्-'श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते।
मुख्यं तमर्थं मन्यन्ते गौणं यत्नोपपादितम्'

जयादित्यवामनौ, काशिकावृत्तिः -'गुणनिमित्ता कल्पनागुणनिमित्त- कल्पना सा पुनरुपचारात्मिकैव वेदितव्या', लक्ष्यतेऽनयेति लक्षणा, सा पुनरिहोपचार एव।

**तर्कशास्त्रम्**

महर्षिगौतमः, न्यायसूत्रम्, - 'सहचरणस्थानतादर्थ्यवृत्तमानधारण-सामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः'

विश्वनाथपञ्चाननः, न्यायसिद्धान्तमुक्तावली- 'लक्षणा शक्यसम्बन्ध-

स्तात्पर्य्यानुपपत्तितः'

गदाधरभट्टाचार्यः, शक्तिवादः - 'सङ्केतो लक्षणा चार्थे पदवृत्तिः'

**मीमांसाशास्त्रम्**

महर्षिजैमिनिः, मीमांसासूत्रम्- 'तत्सिद्धिजातिसारूप्यप्रशंसाभूम-लिङ्ग- समवायैर्गौणी'

शबरस्वामी, शाबरभाष्यम् - 'यस्तु खलु प्रतीतादर्थात्केन-चित्सम्बन्धेन गम्यते, स पश्चाद्भावाज्जघनमिव भवति जघन्यः। गुणसम्बन्धाच्च गौण इति।'

कुमारिलभट्टः, श्लोकवार्तिकम् - 'अभिधेयविनाभूते प्रतीतिर्लक्षणे-ष्यते लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता'

प्रभाकरः, वाक्यार्थमातृका - 'वाच्यस्यार्थस्यवाक्यार्थे सम्बन्धानु-पपत्तितः। तत्सम्बन्धवशप्राप्तस्यान्वयाल्- लक्षणोच्यते'

**ii. परिशिष्टम्**

**उद्धृतकारिकासूची**

**अभिधावृत्तिमातृकाग्रन्थकारिकाः**-

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते॥१॥
तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः।
शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता॥ २॥
उपादानाल्लक्षणाच्च शुद्धा सा द्विविधोदिता।
स्वसिद्ध्यर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत्॥ ३॥
उपादानं, लक्षणं तु तद्विपर्यासतो मतम्।
आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः॥४॥
प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः।
तटस्थे लक्षणा शुद्धा स्यादारोपस्त्वदूरगे॥५॥
निगीर्णेध्यवसानं तु रूढ्यासन्नतरत्वतः।
वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात्॥६॥

लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः।
अन्वयेऽभिहितानां सा वाच्यत्वादूर्ध्वमिष्यते॥७॥
अन्वितानां तु वाच्यत्वे वाच्यत्वस्य पुरः स्थिता।
द्वये द्वयमखण्डे तु वाक्यार्थपरमार्थतः॥८॥
नास्त्यसौ कल्पितेऽर्थे तु पूर्ववत् प्रविभज्यते।
मुख्यार्थासंभवात्सेयं मुख्यार्थासत्तिहेतुका॥९॥
रूढेः प्रयोजनाद्वापि व्यवहारे विलोक्यते।
सादृश्ये वैपरीत्ये च वाच्यस्यातितिरस्क्रिया॥१०॥
विवक्षा चाविवक्षा च संबन्धसमवाययोः।
उपादाने विवक्षात्र लक्षणे त्वविवक्षणम्॥११॥
तिरस्क्रिया क्रियायोगे क्वचित्तद्विपरीतता
विवर्तमानं वाक्तत्त्वं दशधैवं विलोक्यते॥ १२॥
संहृतक्रमभेदे तुतस्मिंस्तेषां कुतो गतिः।
इत्येतदभिधावृत्तं दशधात्र विवेचितम्॥१३॥
पदवाक्यप्रमाणेषु तदेतत् प्रतिबिंबितम्।
यो योजयति साहित्ये तस्य वाणी प्रसीदति॥१४॥
भट्टकल्लटपुत्रेण मुकुलेन निरूपिता।
सूरिप्रबोधनानेयमभिधावृत्तिमातृका॥१५॥

**शब्दव्यापारविचारग्रन्थकारिकाः -**

जातिः क्रिया गुणः संज्ञा वाच्योऽर्थः समितध्वनिः।
तद्बोधे रूढितोऽर्थाद् वा लक्षणीयस्तदन्वितः॥१॥
स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥२॥
सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा।
विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥३॥
भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा।
गौणी शुद्धौ च विज्ञेयौ, लक्षणा तेन षड्विधा ॥४॥

निरूढा काचनान्या तु कार्या सा काचिदन्यथा।
उक्तान्वये च सा पश्चादन्वितोक्तौ पुनः पुरः॥५॥
द्वये द्वयमखण्डे तु वाक्यार्थे नास्ति सत्यतः।
प्रज्ञानैर्मल्यवैदग्ध्यप्रस्तादिविधायुजः।
अभिधालक्षणायोगी व्यङ्ग्योऽर्थः प्रथितो ध्वनेः ॥६॥

# सन्दर्भग्रन्थसूची


**अ**

१. अग्निपुराणम्, महर्षिव्यासः, नागपब्लिशर्स दिल्ली, १९८३

२. अभिधावृत्तिमातृका, मुकुलभट्टः, भारतीयविद्याभवनसंस्थानं वाराणसी, २००२

३. अलङ्कारकौस्तुभः, कविकर्णपूरः, सं० काशीनाथपाण्डुरङ्गपरव, प्रा० भा० ग्र० मा०२३-, चौखम्बा संस्कृतप्रकाशनम् दिल्ली, १९८७

४. अलङ्कारमहोदधिः, नरेन्द्रसूरिः, प्राच्यविद्याशोधसंस्थानं बडौदा, १९४३

५. अलङ्काररत्नाकरः, पूना ओरियन्टलएजेन्सी-बुक-,

६. अलङ्कारशेखरः, केशवमिश्रः, निर्णयसागरप्रेस मुम्बई, १९९५

७. अलङ्कारसर्वस्वम्, आचार्यरुय्यकः, सम्पादकरामचन्द्रद्विवेदी-, मोहनलाल, ब० दा० दिल्ली, १९६५७७-

८. अष्टाध्यायी, पाणिनिविरचिता, प्रोगोपालदत्तसम्पादिता, चौखम्भा-सुरभारतीप्रकाशनम्, वाराणसी २०१३

**उ**

९. उज्ज्वलनीलमणिः, रूपगोस्वामी, सम्पादकदुर्गाप्रसाद, चौखम्बा-संस्कृतविद्याप्रकाशनं वाराणसी, १९८५

१०. उणादिसूत्राणि पाणिनि, सं० ति० रा० चिन्तामणि वि० वि० मद्रास १९२७

**ए**

११. एकावली, विद्याधरः, तरलाख्यामल्लिनाथटीकासहिता, सम्पादक-कृष्णप्रसादद्विवेदी, संस्कृतप्राकृतग्रन्थावली मुम्बई, १९०३

क

१२.काव्यप्रकाशः, मम्मटः, हरिशंकरशर्मकृतनागेश्वरीव्याख्योपेतः, काशी संस्कृत ग्रन्थमाला सीरीज - ४९, चौखम्भा संस्कृत सीरीज आफीस वाराणसी – १९६७

१३.काव्यालङ्कारः, भामहविरचितः, सम्पादकौ - बटुकनाथशर्मा & बलदेव उपाध्यायः, हरिदासगुप्त चौखम्भा संस्कृत सीरीज आफीस्, बनारस, काशी संस्कृत सीरीज पुस्तकमाला -६१,१९२८

१४.काव्यादर्शः, दण्डिविरचितः, सं - विश्वनाथन्, श्री बालमनोरमा प्रेस, मैलापोर, मद्रास – १९५९

१५.काव्यालङ्कारः, आचर्यरुद्रटः, चौखम्बाविद्याभवनं वाराणसी, १९६६

१६.काव्यालङ्कारसारसङ्ग्रहः तथा लघुवृत्तिः, आचार्य उद्भटः प्रतिहारेन्दुराजश्च पूना प्राच्यविद्याशोधसंस्कृतसंस्थानं बनहट्टी तथान्ये,१९२५

१७.काव्यालङ्कारसूत्राणि, वामानाचार्यः, सम्पादक- नारायणराम आचार्यः, मो०ला०ब०दा०, १९८३

१८.काव्यप्रकाशः विश्वेश्वरीटीकोपेतः, मम्मटाचार्य ज्ञानमण्डल वाराणसी २००४

१९.काव्यप्रकाशः वामनीटीकोपेतः, वामनाचार्यः मुम्बई १८८९

२०.काव्यानुशासनम्, हेमचन्द्रः, निर्णयसागरप्रेस मुबई, १९०१

२१.कोविदानन्दः, आशाधरभट्टः, इन्दुप्रकाशनं दिल्ली, १९७८

२२.काव्यमीमांसा, आचार्यराजशेखरः, स०सी०डि० दलाल तथा आर्० ए० शास्त्री बडौदा, प्रा० वि० शो० सं० तृ० मु० १९३४ प्र० मु०,१९१६

च

२३.चन्द्रालोकः, आचार्यजयदेवः, चौ० सं० सी० आकादमी वाराणसी, १९५०

ट

२४.टुप्टीका, आचार्यकुमारिलभट्टः, चौखम्बासंस्कृतबुकडिपो वाराणसी, १९०४

त

२५.तत्त्वचिन्तामणिः, गङ्गेशोपाध्यायः, संस्कृत-एशियाटिकसोशायटी कलकत्ता, १९९०

२६.तत्त्वबिन्दुः, आचार्यवाचस्पतिमिश्रः, सम्पादक-श्री गङ्गाधरशास्त्री चौखम्बासंस्कृतसंस्थानं वाराणसी, १९४९

२७.तन्त्रवार्तिकम्, आचार्यकुमारिलभट्टः, चौखम्बासंस्कृतबुकडिपो वाराणसी, १९०३

२८.तर्कभाषा, केशवमिश्रः, साहित्यभण्डार -सुभाषाबाजार, मेरठ, १९७१

२९.तर्कसंग्रहः अन्नंभट्टः सम्पादक-कुप्पुस्वामी शास्त्री, मद्रास, १९५१

३०.तर्कसङ्ग्रहदीपिका, अन्नंभट्टः, उत्तरप्रदेश हिन्दीग्रन्थाकादमी लखनऊ, १९७६

३१.त्रिवेणिका, आशाधरभट्टः, इन्दुप्रकाशन दिल्ली, १९७८

ध

३२.ध्वन्यालोकः लोचनबालप्रियाटीकोपेतः, आनन्दवर्धनः चौखम्बा संस्कृत सीरीज्, वाराणसी, १९४०

न

३३.नाट्यशास्त्रम्, अभिनवभारतीव्याख्योपेतम्, सम्पादकौ - आर्. एस्. नागर्, के. एल्. जोशी, परिमल पब्लिकेशन्स, देहली १९८८

३४.नाट्यशास्त्रम्, सम्पादकौ - शिवदत्तशर्मा & काशीनाथशर्मा, काव्यमाला सीरीज - ४२, निर्णयसागरमुद्रणालयः, मुम्बई १८९६

३५.निरुक्तम्, यास्कमुनिः, सम्पादकः-मुकुन्दझा बख्शी मेहरचन्द्र दिल्ली १९८२

३६.न्यायदर्शनम्, सम्पादकः आशुबोधः नित्यबोधः, प्राच्यभारतीय-ग्रन्थमाला, चौखम्बासंस्कृतप्रकाशनम्, १९८६

३७.न्यायभाष्यम्, वात्स्यायनः, आनन्दाश्रमग्रन्थावली९१, पूना १९२२
३८.न्यायमञ्जरी, जयन्तभट्टः, सम्पादकः- सूर्यनारायणशुक्लः, चौखम्बा-संस्कृतसीरीज-अकादमी वाराणसी, १९८७
३९.न्यायरत्नाकरः, पार्थसारथिमिश्रः, सम्पादकः- गङ्गासागराय रत्नापब्लिकेशन्स रत्नभारतीयग्रन्थमाला-०४, वाराणसी १९९३
४०.न्यायरत्नमाला पार्थसारथिमिश्रः, स०सं० वि०वि० वाराणसी, १९८२
४१.न्यायसिद्धान्तमुक्तावली, विश्वनाथपञ्चानन, चौ०सं०सी० आ० वाराणसी, १९८८

**प**

४२.परमलघुमञ्जूषा- नागेशभट्टः, चौ०सं०सी० आ० वाराणसी, १९७४
४३.पाणिनीयशिक्षा – पाणिनीय, चौ०सं०सी० आ० वाराणसी, १९८७
४४.प्रकरणपञ्चिका-शालिकनाथः, सम्पादक० सुब्रह्मण्यम् शास्त्री दर्शनग्रन्थावली, का० हि० वि०, १९६१
४५.प्रतापरुद्रीयम्- विद्यानाथः, मद्रास १९८७

**ब**

४६.बृहदारण्यकोपनिषद् निर्णयसागरप्रेस पु० मु० बम्बई १९९१
४७.बृहद्देवता शौनक, सम्पादकः-रामकुमाररायः, चौ०सं० स० वारणसी, १९८९

**भा**

४८.भावप्रकाशनम् शारदातनयः, सम्पादकः-मदनमोहनः अग्रवाल सुरभारतीग्रन्थमाला-६३ चौखम्बासुरभारती वाराणसी-१९८३

**म**

४९.महाभाष्यम् महर्षिपतञ्जलिः, चौखम्बा ओरियन्टल नवदेहली-१९८३
५०.मीमांसादर्शनम्, जैमिनिः, (शाबरभाष्यतन्त्रवार्तिकप्रभा-टुप्टीका-सहितम्) आ० स० ग्र०-१९९७

५१.मीमांसाशाबरभाष्यम् शबरस्वामी सम्पादकः- युधिष्ठिरमीमांसकः बहालगढ सोनीपत हरियाणा, १९७७

**य**

५२.योगसूत्रभाष्यवृत्तिः वाचस्पतिमिश्रः पूना आ० सं० ग्र०-४७, १९०४

**र**

५३.रसगङ्गाधरः (प्रथमाननम्), जगन्नाथपण्डितविरचितः, चन्द्रिका-संस्कृतहिन्दीव्याख्योपेतः, व्याख्याकारः पण्डितश्रीमदनमोहनझा, चौखम्भा विद्याभवन, वाराणसी १९७०.

५४.रघुवंशम्, कालिदासविरचितम्, सञ्जीविनीव्याख्यासमेतम्, सं पण्डित रामचन्द्रझा व्याकरणाचार्यः, चौखम्भा कृष्णदास अकादमी वाराणसी २००७

**ल**

५५.लघुशब्देन्दुशेखरः नागेशः चौ० सं० सी० आ० वाराणसी १९२७

**व**

५६.वक्रोक्तिजीवितम् आचार्यलोकमणिदाहलप्रणीतकला-प्रतिकला-व्याख्यानुवादोपेतम् कुन्तकः चौखम्भा अमरभारती प्रकाशन, वाराणसी २०११

५७.वेदान्तसारः सदानन्दयोगी अद्वैताश्रमः, १९७८

५८.व्यक्तिविवेकः रुय्यकसंस्कृतव्याख्यासहितः महिमभट्टः चौखम्बा-कृष्णदासाकादमी २०११

५९.व्यञ्जनासिद्धि और परम्परा डॉ. कृष्णकुमारशर्मा चौखम्बा-कृष्णदासाकादमी २००६

६०.वाल्मीकिरामायणम् रामकृततिलकव्याख्या शिवसहायकृतरामायण-शिरोमणिव्याख्या सं - सत्कारी मुख्योपाध्याय परिमल पब्लिकेशन्स, देहली १९८४

६१.वाक्यपदीयम् पुण्यराजटीकासहितम् भर्तृहरिः सम्पादक-रघुनाथशास्त्री स० सं० वि० वि० वाराणसी

६२.वृत्तिदीपिका मौनिश्रीकृष्णः राजस्थानप्राच्यविद्या संस्थान जोधपुर १९५६

६३.वृत्तिवार्तिकम् अप्पय्यदीक्षित निर्णयसागरप्रेस बम्बई, १९९३

६४.वैयाकरणभूषणसारः- कौण्डभट्टः चौ० सं० स० वाराणसी १९८७

स

६५.सिद्धान्तकौमुदी, भट्टोजिदीक्षितः बालमनोरमाव्याख्यया तत्त्वबोधिनी-व्याख्यया च समन्विता, मोतीलाल बनारसीदास - कोलकत्ता २०१४

६६.साहित्यदर्पणः (लक्ष्मीव्याख्योपेतः) विश्वनाथः चौखम्भासंस्कृत-संस्थानम्, वाराणसी २००१

६७.सर्वलक्षणसंग्रहः, गौरीशङ्करभिक्षु, चौखम्बा संस्कृतप्रकाशनं वाराणसी, २०१०

६८.साहित्यवल्लरी, लेखकः प्रकाशकश्च डा एन्. लक्ष्मीनारायणभट्टः, राष्ट्रिय संस्कृत संस्थान, नवदेहली २०११

६९.साहित्यसुधासिन्धुः- आचार्यविश्वनाथदेवः सम्पादक-भारतीयविद्या-प्रकाशन वाराणसी १९७८

श

७०.शब्दव्यापारविचारः मम्मटाचार्यः सम्पादक-चौ० सं० सि० आ० वाराणसी १९७४

७१.श्रृङ्गारप्रकाशः,भोजदेवविरचितम्, सं - गोमटं रामानुज जोयिसर्, जि. एस्. जोयिसर् कोरनसोर प्रेस, मैसूरु १९५५

७२.श्लोकवार्तिकम्, कुमारिलभट्टः, भारतीयविद्याभवनसंस्थानं वारणसी, २००२

७३.शब्दशक्तिप्रकाशिका जगदीशतर्कालङ्कारः, चौ०सं० सी० आ० वाराणसी १९७३

**हिन्दीपुस्तकें**


७४.संस्कृत शास्त्रों का इतिहास, बलदेव उपाध्याय, वाराणसी, १९६९

७५.संस्कृतवाङ्मय का बृहत् इतिहास, बलदेव उपाध्यायः, उत्तरप्रदेश-संस्कृतसंस्थानम्, २०००

७६.भारतीय साहित्यशास्त्र, बलदेव उपाध्याय तथा रामदीन रीडर, प्रसाद परिषद, काशी, १९५०

७७.संस्कृतकाव्यशास्त्र का अलोचनात्मक इतिहास, अमरनाथपाण्डेयः, चौकखम्बासुरभारतीप्रकाशनं वारणसी, २०११

७८.रुय्यक की साहित्यमीमांसा एक अध्ययन गङ्गाधर त्रिपाठी न्यू भारतीय बुक कोर्पोरेशन दिल्ली २००४

७९.भाषाविज्ञान की भारतीयपरम्परा और पाणिनि देवदत्त कौशिक भारतीयविद्याप्रकाशन १९९१

८०.भाषाविज्ञान की रूपरेखा, सम्पादक देवदत्त कौशिक भारतीय विद्या प्रकाशन, दिल्ली १९९१


**कोषग्रन्थाः**


८१.अमरकोषः, अमरसिंहः, चौखम्बासुरभारती प्रकाशनम् वाराणसी, २००३

८२.मेदिनीकोशः, जगन्नाथशास्त्री, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २००५


**Englishbooks**


८३.History of Classical Sanskrit Literature, M. Krishnamachariar, Tirumala Thirupathi Devasthanam's Press,1937

८४.Some Concepts of the Alankara Shastra, Dr. V. Raghavan, The Adyar Libray, Adyar, 1942

८५. History of Sanskrit poetics- index of authors & works P.V. kane Motilaal Banarasidas publishers Private Limited Delhi 1971
आधुनिकविधिनावलम्बितोपकरणानि

**निर्मितसंस्कृतमयानि-एप्सजालानि**

१. शब्दकल्पद्रुमः
२. वाचस्पत्यम्
३. अमरकोषः
४. अष्टाध्यायीसूत्रावली
५. सिद्धान्तकौमुदी
६. पाणिन्यष्टाध्यायी
७. शब्दरूपमाला
८. धातुरूपमाला

**REFERRED WEBSITES.**

1. http://sanskrit.nic.in/
2. http://shodhganga.inflibnet.ac.in/
3. http://www.sanskritebooks.org
4. https://archive.org
5. https://sa.wikipedia.org/wiki/%E%0A%4AE%E%0A%81%5E%0a%96%4E%0a8%5D%E%0A%4AF%E%0A%4AA%E%0A%83%5E%0A%4B%7E%0A8%5D%E%0A%4A%0E%0A%4AE%E%0A8%5D
6. https://sa.wikisource.org/wiki/%e%0A%4AE%E%0A%81%5E%0A%96%4E%%0A8%5D%E%0A%4AF%E%0A%4AA%E%0A%83%5E%0A%4B%7E%0A8%5D%E%0A%4A%0E%0A%4AE%E%0A8%5D%
7. https://sanskritdocuments.org
8. https://www.scribd.com/
9. Microsoft wordfile 2007
10. Typing font uniode, baraha, language sanskrit2003

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016**